VRITTA RATNAKARA

BY

KEDARA BHATTA

WITH A COMMENTARY BY

PROFESSOR TARANATHA TARKAVACHASPATI

AND

CHANDOMANJARI

BY

PANDIT GANGADASA

EDITED WITH A FULL COMMENTARY

BY

PANDIT JIBANANDA VIDYASAGARA, B. A.

Superintendent Free Sanskrit College, Calcutta.

FOURTH EDITION.



CALCUTTA:

PRINTED AT THE SARASWATI PRESS.

1887.

To be had from Pandit Jibananda Vidyasagara, B. A.
Superintendent Free Sanskrit College, Calcutta.

Digitized by Google

एतानि मुद्रितसंस्कृतपुस्तकानि ।

१	बालबोधव्याकरणम्	२	
२	धातुरूपादर्शः	१॥	
३	शब्दस्तोममहानिधिः	८	
४	सिद्धान्तकौमुदी सरलासहिता	१०	
५	सिद्धान्तबिन्दुसारः (वेदान्त)	॥	
६	लग्नाद्यानयनादिपद्धतिः (वङ्गाक्षरैः)	४	
७	गयाश्राद्धादिपद्धतिः	१	
८	शब्दार्थरत्नम्	॥	
९	वाक्यमञ्जरी (वङ्गाक्षरैः)	।०	
१०	छन्दोमञ्जरी तथा वृत्तरत्नाकर सटीक	॥०	
११	वेणीसंहार नाटक सटीक	॥०	
१२	मुद्राराक्षस नाटक सटीक	॥	
१३	रत्नावली नाटिका सटीक	॥	
१४	मालविकाग्निमित्र सटीक	१	
१५	धनञ्जय विजय सटीक	।०	
१६	महावीरचरितनाटक	॥०	
१७	साङ्गव्रतत्त्वकौमुदी सटीक	२	
१८	वैयाकरणभूषणसार	॥	
१९	लीलावती	॥०	
२०	बीजगणित	॥	
२१	शिशुपालवध सटीक (माघ)	२	
२२	किरातार्जुनीय सटीक	१॥०	
२३	कुमारसम्भव पूर्वखण्ड सटीक	॥०	
२४	कुमारसम्भव उत्तरखण्ड सटीक	॥०	
२५	अष्टकम् पाणिनीयम्	॥०	
२६	वाचस्पत्यम्(बृहदभिधान)	१००	
२७	कादम्बरी सटीक	१॥०	
२८	राजप्रशस्ति		
२९	अनुमानचिन्तामणि तथा अनुमानदीधिति	४	
३०	सर्वदर्शनसंग्रहः	१	
३१	भामिनीविलास सटीक	॥	
३२	हितोपदेश सटीक	॥	
३३	भाषापरिच्छेदसटीकावलीसहित	॥	
३४	बङ्गविवाहवाद	।०	
३५	दशकुमारचरित सटीक	१	
३६	परिभाषेन्दुशेखर	॥०	
३७	कविकल्पद्रुम धातुपाठः	१	
३८	चक्रदत्त (वैद्यक)	१॥०	
३९	उणादिसूत्र सटीक	२	
४०	मेदिनीकोष		
४१	पञ्चतन्त्रम् [मूलमात्र]		
४२	विद्वन्मोदतरङ्गिणी (चम्पूकाव्य)		
४३	माधवचम्पू	।०	
४४	तर्कसंग्रह		
४५	प्रसन्नराघव नाटक		
४६	विवेकचूड़ामणि		
४७	काव्यसंग्रह (संपूर्ण)		
४८	सिद्धान्तशासन सटीक		
४९	ऋतुसंहार सटीक		
५०	विक्रमोर्वशी (सटीक)		
५१	वसन्ततिलक भाण		
५२	गायत्री व्याख्या	॥०	
५३	सांख्यदर्शन (भाष्यसहित)	२	
५४	भोजप्रबन्ध		
५५	नलोदय सटीक		
५६	ईश केन कठ प्रश्न मुण्ड माण्डूक्य (सटीक सभाष्य)		
५७	छान्दोग्य सटीक सभाष्य		
५८	तैत्तिरीय ऐतरेय श्वेताश्वतर (उपनिषद्) सभाष्य सटीक		

Digitized by Google

वृत्तरत्नाकरम् ।

श्रीकेदारभट्टविरचितम् ।

कलिकाता-संस्कृत-विद्यामन्दिराध्यक्ष श्रीतारानाथ
तर्कवाचस्पति-भट्टाचार्य्यकृतविवृति
सहितम् ।

तथा ।

छन्दोमञ्जरी ।

श्रीगङ्गादास-पण्डित-विरचिता ।

वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
विरचितया व्याख्यया समलङ्कृता ।

तेनैव संस्कृतम् ।

चतुर्थ संस्करणम्

कलिकातानगरे
सरस्वती यन्त्रे मुद्रितम् ।

ई १८८७ ।

Digitized by Google

Ind L 15[illegible]
~~Indl 1528.2~~

HARVARD
UNIVERSITY
LIBRARY

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২ নং রমানাথমজুমদারেরষ্ট্রীট্ কলিকাতা।

প্রিণ্টর—শ্রীক্ষেত্রমোহনমুখোপাধ্যায়
৫৬ নং আমহর্ষ্ট ষ্ট্রীট। কলিকাতা।

Digitized by Google

वृत्तरत्नाकरम् ।

प्रथमोऽध्यायः ।

सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शङ्करं लोकशङ्करम् ॥
वेदार्थशैवशास्त्रज्ञः पञ्चोकोऽभूद्द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥
तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥ कलापकम् ।
पिङ्गलादिभिराचार्य्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥
षड्ध्यायनिबद्धस्य छन्दसोऽस्य परिस्फुटम् ।
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥
म्यरस्तजभ्नगै(१)र्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥
सर्वगुर्मोमुखान्तर्यौ यरावन्तगलौ सतौ ।
गमध्याद्यौज्भौ त्रिलोनोऽष्टौ भवन्त्यत्र गणास्त्रिकाः(२)

---

(१) भवेत्र असन्देहाय न जभ्भावः । एवमन्यत्रापि ।

(२) त्रीणि अक्षराणि परिमाणमेषां कन् । त्रिवर्णात्मकाः मादयः अष्टौ गणा इत्यर्थः । तेषां देवताफलादीन्यन्यत्रोक्तानि ।

Digitized by Google

नो भूमिक्षिगुरुः श्रियं दिशति, नो दृष्टिं जर्जं चादिशो,
रोऽग्निर्मध्यखुर्विनाश, कनिको देशाटनं सोऽन्यगः ।
तो व्योमान्तखुर्धनापकरणं, ओऽर्को रुजं मध्यगो,
भचन्द्रो यश उज्झनं सुखगुरु, नौनाक आयुक्षिणः ॥
एषां मित्रादिसंज्ञाप्यभिहिता शास्त्रकारैः
मनौ मित्रे भवौ भृत्यावुदासीनौ जरौ स्मृतौ ।
तत्तावरौ नीचसंज्ञौ द्वौद्वावेतौ मनीषिभिः ॥
एतेषामाद्यद्वितीयवर्णोः सन्निवेशे फलसङ्गमाकरे
मित्रान्मित्रं विधत्ते प्रचुरधन, मयो मित्रतो भृत्यसंज्ञः
स्थैर्यं, मित्रादुदासो न किमपि च फलं, मित्रतः शत्रुसंज्ञः ।
वस्वोः पीड़ा, मयो स्यादु यदि खलु नियतं भृत्यतो मित्रसंज्ञः
सर्वं कार्यं तु, भृत्यात् भृतगण इह चेटावतिं सर्वलोके ॥
भृत्यान्नेत् स्यादुदासो धनविगम, मयो भृत्यतः शत्रुसंज्ञः
शोकं कुर्यादुदासात् यदि भवति तदा मित्रसंज्ञोऽत्यकार्यम्, ।
तस्मादुभृत्यः प्रशस्यं, तत इह सततं स्यादुदासो विनाशम्,
तस्माच्छत्रुः स्वैरं विविधसुखकरं सर्वसत्कारमाशम् ॥
शत्रोर्मित्रस्य शून्यं, यदि भवति, ततो भृत्यसंज्ञो ऽस्थिरश्या
नाशं, तस्मादुदासो धनकरमधिकं दुःखदारिद्र्यशोकम् ।
शत्रोः शत्रुर्भवेन्नेद्दिह खलु नितरां नायकस्यैव नाशं,
देशोद्वासं, विधत्ते, कथयति च फलं पिङ्गलो नागराजः ॥
गद्यप्रबन्धेनाक्षरगुद्रिरभिधीयते "अक्षरे परिगुद्धे तु नायको
भूतिमिच्छति" इत्युक्तेरक्षरगुद्धेरावश्यकत्वात् ।
अवर्णात् सम्पत्तिर्भवति, च सदिवर्णाद्धनयता,
स्युवर्णाद्ख्यातिः, सरभसहवर्णात् वरहितात् ।
तथा स्नेहः सौख्यं, ऊजयरहितादक्षरगणात्
यदादाविन्यासात् भरवकलपूर्वैर्विरहितात् ॥
भरवकलात्तत्पूर्वाणि यान्यक्षराणि तैर्विरहितादित्यर्थः । कल्-
वर्णानां फलान्युक्तान्याकरे ।

Digitized by Google

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः (१) ॥
सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।
वा पादान्ते त्वसौ वक्रो ज्ञेयोऽन्यो मात्रिको लघुः(२)॥

कः सो गो घश्च लक्ष्मीं वितरति, शिवगो ङः, सुखा च, सुखं, छः प्रीतिं, जो मित्रलाभं, भयमरणकरौ झञौ, टठौ खेददुःखे । डः शोभां, ढो विरोधां, भ्रमणमथ च णस्तस्तु धं, थस्तु युद्धं, टो, धः, सौख्यं, सुदं, नः, सुखभयमरणक्लेशदुःखं पवर्गः । यो लक्ष्मीं, रस्तु दाहं, व्यसनमथ लवौ शः सुखं, षस्तु खेदं, सः सौख्यं, हस्तु खेदं, विलयमपि च लः, क्षः सङ्कटं करोति । संयुक्तं चेच्च न स्यात् सुखभरणपटुर्वर्णविन्यासयोगः पद्यादौ, गद्यवक्त्रे, वचसि च सकले, प्राकृतादौ समोऽयम् ॥

एतेषां फलाधारनिरूपणमाकरे

नायको वर्ण्यते यत्र फलं तस्य समादिशेत् ।
अन्यथा तु कृते काव्ये कर्तुर्दोषावहं फलम् ॥

तस्य प्रतिप्रसवोऽप्युक्तः ।

देवता वर्ण्यते यत्र क्वापि काव्ये कवीश्वरैः ।
मित्रामित्रविचारो वा न तत्र फलकल्पना ॥
देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिखिता गणतोऽपि वा ॥

(१) सर्वगुरुः अन्तगुरुः मध्यगुरुः आदिगुरुः चतुर्षु चतुष्कलाः चतुर्मात्राः पञ्च गणाः आर्यादिषु मात्रावृत्तेषु ।

(२) युक्तः संयुक्तवर्णः परो यस्मात् सः गुरुर्भवेत् पादान्ते गद्यचतुर्थभागावसाने वा विकल्पेन लघुरिति शेषः गुरुर्भवेदित्यनुषङ्गः तु पुनरसौ गुरुत्वमभिधीयते तद्व्यञ्जकरेखायाः वक्रत्वात् सोऽपि वक्रः । अन्यः उक्तरूपाद्भिन्नो वर्णो मात्रिकः मात्रा-

Digitized by Google

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः ॥
इदमस्योदाहरणम्—
तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ॥
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति (१) ॥
अविभूतरसादीनां ज्ञेयाः संज्ञासु लोकतः ।
ज्ञेयः पादश्चतुर्थोऽंशो यतिर्विच्छेदसंज्ञितः ॥
युक् समं विषमं चायुक् क्षानं सद्भिर्निगद्यते ।
सममर्धसमं वृत्तं विषमं च तथापरम् ॥
अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ।
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥
प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्य्यवद्वृत्तं तदर्धसममुच्यते ॥
यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥
आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्द्धितैः ।
पृथक् छन्दो भवेत् पादैर्यावत् षड्विंशतिं गतम् ॥
तदूर्द्धं चण्डवृष्ट्यादिदण्डकाः परिकीर्त्तिताः ।
शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥

मितकालेन उच्चार्य्यत्वात् ह्रस्व इति तद्व्यञ्जकरेखायाः सरलत्वात् 'ऋजु-रेखक ह्रस्व' इति चोच्यते ।

(१) ग्राम्येति । चतुर्थचरणादिस्थसंयुक्तवर्णात् परत्वात् पूर्वस्य रोत्यस्य लघुत्वं तेन नार्य्यायास्तृतीयचरणे द्वादशमात्रतोक्तिः ।

Digitized by Google

उक्ता१ त्युक्ता२ तथा मध्या३ प्रतिष्ठा४न्या सुपूर्विका५ ।
गायत्र्युष्णि६गनुष्टुप्च बृहती८ पङ्क्ति१०रेव च ॥
त्रिष्टुप्११ च जगती१२ चैव तथातिजगती१३ मता ।
शक्करी१४साऽतिपूर्वा१५ स्यादष्टी१६ त्यष्टी१७ ततः स्मृते ॥
धृति१८श्चातिधृति१९श्चैव कृतिः२० प्रकृति२१राकृतिः ।
विकृतिः२२ सङ्कृति२४श्चैव तथातिकृति२५रुत्कृतिः ॥२३॥
इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वक्ष्मि साम्प्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥

इति वृत्तरत्नाकराख्ये छन्दसि प्रथमोऽध्यायः ॥

—०—

द्वितीयोऽध्यायः ।

लक्ष्मैतत् सप्त गणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं न लघू वा प्रथमेऽर्धे नियतमार्यायाः (१) ॥

---

(१) आर्यायाः प्रथमेऽर्धे एतत् नियतं लक्ष्म चिह्नं भवति, किं तदाह,—गोपेताः अन्ते मात्रावृत्तसहिताः सप्त चतुष्कलात्मका गणाः त्रिंशन्मात्रा इत्यर्थः । इह छन्दसि विषमे प्रथमतृतीयपञ्चमसप्तमरूपे स्थाने जगणो न भवति । षष्ठो गणस्तु अयं जगणात्मकः नलघू वा चतुर्लघुरूपो वा भवेत् । तत्र यतिनियममाह, षष्ठे गृहे नलघुरूपे सति द्वितीयत्वात् द्वितीयचतुर्थोः पूर्वमिति शेषः । सयतिपदनियमः यतिसहितं पदं समाप्यमित्यर्थः । चरमे षष्ठामेत्यत्र चरमिन् सप्तमे गृहे नलघुरूपे सुखत्वात् आद्यचतुर्थोः पूर्वं षष्ठगणान्ते इति यावत् सयतिपदनियमः । चरमेऽर्धे पुनः पञ्चमके गृहे सति तस्मात् सुखत्वात् आद्यचतुर्थोः पूर्वं चतुर्थगणान्ते इत्यर्थः । सयति-

Digitized by Google

षष्ठे द्वितीयलात् परके नृले मुखलाच्च सयतिपदनियमः ।
चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥
त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः ।
पथ्ये २ति (१) नाम तस्याः प्रकीर्त्तितं नागराजेन ॥
उक्तवद्गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।
यस्यास्तां पिङ्गलनागो विपुला३मिति समाख्याति ॥
उभयार्द्धयोर्जकारौ द्वितीयतुर्य्यौ गमध्यगौ यस्याः ।
चपले४ति नाम तस्याः प्रकीर्त्तितं नागराजेन ॥
आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।
शेषे पूर्वजलक्ष्मा मुखचपला५ सोदिता मुनिना ॥
प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तु चपलायाः ।
लक्ष्माश्रयेत सोक्ता विशदधीभिर्जघनचपला ६ ॥

इत्यार्य्याप्रकरणम् ।

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ।
दलयोः कृतयतिशोभां तां गीति१क्षीतवान् भुजङ्गेशः ॥
आर्य्याद्वितीयकेऽर्द्धे यद्वदितं लक्षणं तत् स्यात् ।
यद्युभयोरपि दलयोरुपगीतिं २ तां मुनिर्ब्रूते ॥
आर्य्याशकलद्वितयं व्यत्ययरचितं भवेद् यस्याः ।

पदनियमः दृढ उत्तरार्द्धे षष्ठो गणः लघुरूपे एव तेन मात्रात्रय-हीनाः पूर्वार्द्धलक्षणरूपाः त्रिंशन्मात्राः । एतद्वृत्तस्य नियमो नास्ति यथेच्छं गणादिसन्निवेशनं कार्य्यमित्यर्थः ।

(१) यस्याः आर्य्यायाः पादः दलयोः उभयार्द्धयोः आद्येषु त्रिषु अंशकेषु गणेषु द्वादशमात्रात्मको दृश्यते, तस्याः पथ्येति नाम ।

Digitized by Google

सोद्गीतिः ३ किल गदिता तद्यत्यंशभेदसंयुक्ता ॥
आर्य्यापूर्वार्द्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ।
इतरत्तदद्विखिलं यदीयमुदितेयमार्य्यागीतिः ४ ॥

इति गीतिप्रकरणम् ।

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः ।
न समात्र पराश्रिता कला वेतालीये१ऽन्ते रलौ गुरुः (१) ॥
पर्य्यन्ते यौ (२)तथैव शेषमौपच्छन्दसिकं२ सुधीभिरुक्तम् ।
आपातलिका३ कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् ॥
तृतीययुग्दक्षिणान्तिका ४ समस्तपादेषु द्वितीयलं (३) ।
उदीच्यवृत्तिप्रद्वितीयलः सक्तोऽग्रेण (४)भवेद्युग्मयोः ॥

---

(१) विषमे प्रथमे तृतीये च पादे षट् मात्राः, समे द्वितीये चतुर्थे च पादे अष्टौ मात्राः, ताश्च षट् अष्टौ वा नो निरन्तराः निरन्तरगुरुरूपा निरन्तरगुरुरूपा वा न भवन्ति अत्र च षट्सु अष्टसु कलासु मध्ये सर्वत्र समा कला द्वितीया चतुर्थी षष्ठी च कला पराश्रिता तृतीयाद्याश्रिता न कार्य्या, तथा च द्वितीय-तृतीयकलयोर्योगेन गुरुर्न कार्य्यः, एवं चतुर्थीपञ्चम्योः, षष्ठीसप्त-म्योश्च । सर्वत्र चरमेषु अन्ते चरमे रलौ गुरुश्च ।

(२) दलयोः पर्य्यन्ते षण्णाम् अष्टानां वा कलानामन्ते शेषे यौ रगण यगणौ स्यातां चेत् शेषं तथैव प्राग्वत् तदा औपच्छन्द-सिकं नाम छन्दः ।

(३) समस्तपादेषु द्वितीयलः यदि तृतीययुक् द्वितीयमात्रा-तृतीयमात्राभ्यामेको गुरुश्चेत् शेषं पूर्ववत्, तदा दक्षिणान्तिका नाम छन्दः ।

(४) युग्मयोः प्रथमतृतीयपादयोर्यदि द्वितीयलः द्वितीय-

पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिर्वृद्धितेति युग्मयोः (१) ।
यदा समावोजयुग्मकौ (२) पूर्वयोर्भवति तत्प्रवृत्तकम् ७ ॥
अस्य युग्मरचिता (३) परान्तिका ८ ।
अयुग्भवा (४) चारुहासिनी ९ ।
इति वैतालीयप्रकरणम् ।
वक्त्रं १ नाद्यान्नसौ(५)स्यातामब्धेर्यौऽनुष्टुभि ख्यातम् ।
युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं २ प्रकीर्त्तितम् (६) ॥

लघुः अपरेण तृतीयलघुना सक्तः संयुक्तः, शेषं पूर्ववत्, तदा उदीच्यवृत्तिर्नाम छन्दः ।

(१) युग्मयोः द्वितीयचतुर्थयोः पादयोः पञ्चमः लघुः पूर्वेण चतुर्थकलया युतः चतुर्थीपञ्चम्योर्योगेन गुरुश्चेत्, तदा प्राच्यवृत्तिः नाम छन्दः ।

(२) यदा ओजयुग्मौ विषमसमपादौ पूर्वयोरुक्तयोः उदीच्यवृत्तिप्राच्यवृत्त्योः समौ तुल्यौ स्यातां, तथाच प्रथमतृतीयपादयोर्द्वितीयतृतीयमात्रयोर्योगेन गुरुश्चेत्, द्वितीयचतुर्थपादयोश्च चतुर्थीपञ्चम्योर्योगेन गुरुश्चेत् तदा तत् प्रवृत्तकं नाम छन्दः ।

(३) अस्य प्रवृत्तकस्य युग्मपादेन द्वितीयपादलक्षणेन सकलपादेषु रचिता चेत्, अपरान्तिका नाम छन्दः ।

(४) अस्यैव अयुजा विषमपादलक्षणेन सकलपादेषु रचिता चेत्, चारुहासिनी नाम छन्दः ।

(५) आद्यादक्षरात् नसौ नगण-सगणौ न स्याताम्, अब्धेश्चतुर्थाक्षरात् यगणः स्यात्, तदतिरिक्तवर्णाः यथेच्छं स्युः तदा अनुष्टुभि अष्टाक्षरपादके छन्दसि वक्त्रं नाम छन्दः ।

(६) अस्य भेदानाह,-युजोर्द्वितीयतुर्य्यपादयोः सरिद्भर्तुर्वारिधेः चतुर्थाक्षरादूर्द्ध्वं जेन जगणेनोपलक्षितं चेत् पथ्यावक्त्रं नाम छन्दः ।

Digitized by Google

(१) ओजयोर्जेन वारिधेस्तदेव विपरीतादि ३ ।
चपलावक्त्र४मयुजोर्नकारश्चेत् पयोराशेः ॥
यस्यां लः (२) सप्तमो युग्मे सा युग्मविपुला ५ मता ।
(३) सैतवस्याखिलेष्वपि । भेनाब्धितो (४)भादिपुला ६ ।
इत्यमन्या ७ रश्चतुर्थात् (५) । नोऽम्बुधेश्चेन्नविपुला ॥
(६) तोऽब्धेस्तत्पूर्वान्या ८ भवेत् ।
इति वक्त्रप्रकरणम् ।
द्विगुणितवसुलघुरचलधृति१रिह ।
(७) मात्रासमकं २ नवमो ल् गोऽन्त्यः
(८) जोल्नावथाम्बुधेर्विश्लोकः ३ ।

---

(१) ओजयोर्विषमयोश्चेत् चतुर्थांशरात् जेनोपलक्षितं विपरीतादिविपरीतपथ्यावक्त्रं नाम छन्दः ।

(२) युग्मे द्वितीये चतुर्थे च पादे यस्याः सप्तमो वर्णः लः लघुः, सा युग्मविपुला नाम छन्दः ।

(३) अखिलेषु पादेषु सप्तमो वर्णो लघुश्चेत् सैतवस्य आचार्यस्य मते विपुला नाम छन्दः ।

(४) अब्धेश्चतुर्थांशरात् भेन रचिता भविपुला नाम छन्दः ।

(५) इत्थं चतुर्थांशरात्, परं रश्चेत् अन्या रविपुला नाम छन्दः ।

(६) अम्बुधेश्चतुर्थांशरात् तगश्चेत् तपूर्वा, तविपुला नाम छन्दः ।

(७) सर्वेषां षोड़शमात्रात्मकत्वात् मात्रासमत्वमेषाम् यत्र षोड़शमात्रापरिच्छे नवमो ल् लघुः अन्त्यो गः, ताभ्यां भेदेष्वनियमः, तत् मात्रासमकं नाम छन्दः ।

(८) अम्बुधेश्चतुर्थदषोड़शं जो मध्यगुरुः नृतौ भनगणलघू वा स्यातां, तथाच गुरुमध्या लघुरूपा वा चतस्रो मात्राः स्युः, स विश्लोको नाम छन्दः ।

Digitized by Google

तदुयुगलाद्वा (१) नवासिका ४ स्यात् ।
वाणाष्टनवसु यदि लश्चित्रा ५
(२) उपचित्रा ६ नवमे परयुक्ते ।
यदतीतकृतविविधलक्ष्मयुतै(३)
र्मात्रासमादिपादैः कलितम् ॥
अनियतवृत्तपरिमाणसहितम् ।
प्रथितं जगत्सु पादाकुलकम् ५ ॥
वृत्तस्य ला विना वर्णैर्गा वर्णा गुरुभिस्तथा ।
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् (४) ॥
इति मात्रासमप्रकरणम् ।

---

(१) तदुयुगलात् अष्टमात्रात् परत्यर्थः । यदि जः नृतौ वा इत्यनुषङ्गः । सा नवासिका नाम छन्दः ।

(२) नवमे लघौ परेण दशमेन संयुक्ते ताभ्यामेकस्मिन् गुरौ सति उपचित्रा नाम छन्दः ।

(३) अतीतानां मात्रासमादीनां कृतानि विविधानि यानि लक्षाणि लक्ष्माणानि तैर्युतैः मात्रासमादिपादैः कलितं यत् वृत्तम् अनियतं वृत्तं वृत्तलक्षणं यत्र तादृशं यत् परिमाणेन षोड़शमात्रामानेन सहितं जगत्सु प्रथितम् पादाकुलकं नाम ।

(४) इदानीं मात्रावर्णसंख्याज्ञाने लघुगुरुसंख्याज्ञानार्थं गुरुलघुनिश्चये वर्णसंख्याज्ञानार्थञ्चाह । वृत्तस्य लाः मात्राः तत्संख्याः वर्णैः वर्णसंख्यया विना गाः गुरवस्तत्संख्याः ज्ञेयाः अयमर्थः । यत्र वृत्तस्य मात्रावर्णयोः संख्या ज्ञाता गुरुलघुसंख्या तु न ज्ञाता तत्र मात्रासंख्याता वर्णसंख्यामपनीय शिष्टा गुरुसंख्या भवति । एवं ज्ञातगुरुसंख्यातः वर्णसंख्यामपनीय लघुसंख्या भवति । यदि तु मात्राणां गुरूणां च संख्या ज्ञाता वर्णस्य संख्या न ज्ञाता तज्ज्ञानाह ।

Digitized by Google

त्रिखिगुणितदशलघुरचितमप-
गतलघुयुगलमपरमिदमखिलम् (१)।
सगुरु शकलयुगलकमपि
सुपरिघटितललितपद्धतति भवति शिखा १॥
विनिमयविनिहितशकलयुगल-
कलितपद्धतति विरचितगुणनिचया।
श्रुतिसुखकृदियमपि जगति
त्रि(२)जशिर उपगतवति सति भवति खजा२॥
अष्टावर्द्धे(३)गा द्वाभ्यस्ता यस्याः सानङ्गक्रीड़ा३॥
दलमपरमपि वसुगुणितसलिलनिधि-
लघुकविरचितपद्धतति भवति॥

वर्णा इति वृत्तस्य खाः मात्रास्तत्संख्याः गुरुभिस्तत्संख्यया विना वर्णाः वर्णसंख्याः ज्ञेयाः। लघुसंख्याज्ञाने गुरुसंख्याज्ञानायाह। गुरव इति। वृत्तस्य वर्णसंख्याः लैर्लघुभिः तत्संख्यया विना दृष्टे गुरवः तत्संख्याः भवन्ति। इति इत्थमेव गुरुलघुसंख्याज्ञाने निश्चित-मत्यभिचरितं नियतं प्रमाणम्।

मात्राप्रसङ्गात् द्विशकलान्याह

(१) खिखिभिखिभिर्गुणिता दश लघवस्तैः त्रिंशल्लघुभिरित्यर्थः। रचितम् अपगतं लघुयुगलं यस्मात् तत् अष्टाविंशतिलघुकमित्यर्थः एवं आद्यखण्डमित्येवं रूपम् अपरं द्वितीयं शकलमखिलं सम्पूर्णलघुरूप-मित्यर्थः। अन्ते गुरुवर्णेन सहितं शकलयुगलं खण्डद्वयं यस्य तथाभूतं शिखा नाम छन्दः।

(२) त्रि जशिरः उपगतवति सति खजा खञ्जा नाम छन्दः।

(३) यस्याः अर्द्धे खण्डे द्वाभ्यस्ता द्वाभ्यामभ्यस्ताः गुणिताः अष्टौ गा गुरवः सा अनङ्गक्रीड़ा नाम छन्दः।

Digitized by Google

त्रिगुरुनवलघुरवसितिगुरुरिति
दशयुगलकृततनुरतिरुचिरा४ ॥
इति वृत्तरत्नाकराख्ये छन्दसि सममात्राख्यो
द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

१ । उक्तायाम् २ ।
ग् स्त्री: १
२ । अत्युक्तायाम् ।४।
गौ स्त्री १ ।
३ । मध्यायाम् ८ ।
मौ नारी १
रौ मृगी २

---

४ । प्रतिष्ठायाम् १६
म्नौ चेत् कन्या १ ।

---

५ । सुप्रतिष्ठायाम् ३२
भ्गौ गिति पङ्क्तिः १

---

६ । गायत्र्याम् ६४ ।
त्यौ चेत्तनुमध्या १
प्रग्विद्वना२न्यौ ।

Digitized by Google

विद्युल्लेखा३मोमः।
स्त्री चेत् वसुमती४।

—०—

७। उष्णिहि। १२८

म्सौ गः स्यान्मदलेखा१।
भरगैर्हंसमाला२
ननगि मधुमती३।
कुमारललिता४ज्स्गाः।

—०—

८। अनुष्टुभि २५६

भौ गिति चित्रपदा१ गः।
मो मो गो गो विद्यु(ल्लेखा)न्माला२।
माणवकं ३ भात्तलगाः।
स्त्री गौ हंसरुत४मेतत्।
जौं समानिका५गलौ च।
प्रमाणिका६जरौ लगौ।
वितान७माभ्यां यदन्यत्(१)।

———

९। अथ बृहत्याम् ५१२।
राजसाविह हलमुखी१।
भुजगशिशुसृता(युता)२नौमः
भद्रिका३भवति रौ नरौ।

(१) नाराचिकाऽतरा ल गौ। परिशिष्टम्.

१० । अथ पङ्क्तौ १०२४

मसौ जगौ शुद्धविराड्१ दं मतम् ।
नौ यगौ चेति पणवनामे२दम् ।
जौ रगौ मयूरसारिणी३स्यात् ।
भमौ सगयुक्तौ (चम्पकमाला) रुक्मवतीयम्४ ।
श्येया मत्ता५मभसगयुक्ता ।
नरजगैर्भवेन्मनोरमा६ ।
तोजौ गुरुणेयमुपस्थिता७ । (१)

---

११ । त्रिष्टुभि २०४८ ।

स्यादिन्द्रवज्रा१ यदि तौ जगौ गः ।
उपेन्द्रवज्रा२जतजास्ततो गौ ।
अनन्तरोदीरितलक्ष्मभाजौ
पादौ(२)यदीयावुपजातय३स्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ।

---

(१) दीपकमाला नौ मता जगौ ।
श्येया हंसीऽमभनगयुता । परिचिष्टम् ।

(२) यदीयौ पादौ यया कयाचित् द्वौ पादौ इन्द्रवज्रोपेन्द्रवज्रापादलक्षणयुक्तौ तां उपजातयः तथाच वक्ष्यमाणानुसारेण चतुःसंख्याप्रस्तारे षोडशसु भेदेषु शुद्धमिन्द्रवज्रामुपेन्द्रवज्रां च क्षिप्त्वा चतुर्दशसु भेदेषु शिष्टेषु अर्द्धसमदृत्तभेदोद्धारमाख्यानकीं विपरीतपूर्वांश्च क्षिप्त्वा द्वादश भेदाः भवन्ति अतस्ता इत्युक्तम् ।

Digitized by Google

न जजलगैर्गदिता सुमुखी४ ।
दोधक५वृत्तमिदं भभभाद्गौ ॥
शालिन्युक्ता६म्तौ तगौ गोऽब्धिलोकैः ।
वातोर्मी५यं कथिता भौ तगौ गः ॥
भौ न्लौ गः स्याद् भ्रमरविलसितम्६ ।
वाणरसैः स्याद् भतनगगैः श्रीः७ ॥
रान्नराविह रथोद्धताप्लगौ ।
स्वागतेति८रनभाद्गुरुयुग्मम् ॥
ननसगगुरुचिता वृत्ता१० ।
ननरलगुरुभिश्च भद्रिका११ ॥
मौक्तिकमाला१२ यदि भतनाद् गौ ।
उपस्थित१३मिदं ज्सौ ताद् गकारौ ॥
उपचित्र१४मिदं ससजास्तगौ ।
कुपुरुषजनिता१५ननौ गौ गः ॥
अनवसिता१६न्यौ भ्गौ गुरुरन्ते (१)॥

---

१२ । अथ जगत्याम् । ४०८६
चन्द्रवर्त्म१निगदन्ति रनभसैः ।
जतौ तु वंशस्थ२मुदीरितं जरौ ॥

---

(१) श्येनिका१७रजौ रलौ गुरुर्यदा ।
विश्वदुमाला१८भवेत्तौ तगौ गः ।
सान्द्रपदं१९स्याज्जतनगलैश्च ।
शिखरिणीतमिदं ज्सौ तृगौ गुरुश्चेद् । परिणिष्टम् ।

Digitized by Google

स्यादिन्द्रवंशा३ततजै रसंयुता ।
इह तोटक४मब्धिसैः प्रथितम् ॥
द्रुतविलम्बित५माह नभौ भरौ ।
वसुयुगविरतिर्नौ म्यौ पुटोऽ६यम् ॥
प्रमुदितवदना७भवेन्नौ च रौ (१) ।
नयसहितौ म्यौ कुसुमविचित्रा८ ॥
रसैर्जसजसा जलोद्धतगतिः९ ।
भुजङ्गप्रयातं१०भवेद्यैश्चतुर्भिः ॥
रैश्चतुर्भिर्युता स्रग्विणी११सम्मता ।
भुवि भवेन्नभजरैः प्रियंवदा१२ ॥
त्यौ त्यौ मणिमाला१३क्षिप्ता गुरुवक्त्रैः ।
धीरैरभाणि ललिता१४तभौ जरौ ॥
प्रमिताक्षरा१५सजससैरुदिता ।
ननभरसहिता गदितोज्ज्वला१६ ॥
पञ्चाक्षैश्छिन्ना वैश्वदेवी१७ममौ यौ ।
अष्टाष्टाभिर्जलधरमाला१८म्भौ स्रौ ॥
इह नवमालिका१९नजभयैः स्यात् ।
भवति नजावथ मालती२०जरौ ॥
अभिनवतामरसं२१नजजादयः(२) ।

---

(१) वसुयुगविरतिर्नौ रौ प्रभेति मल्लिनाथसम्मतम् । नयुगर-
सयुग् नौरौ मतेति कौसुदीकरमतम् ।

(२) पञ्चदशनि म्यौ स्यात् सयुता वदना२२ ।
खचित२३मभिहितं नौ स्रौनामतः ।

Digitized by Google

१३ । अथातिजगत्याम् । ८१८३
तुरगरसयतिर्नौ ततौ गः क्षमा१ ।
म्नौ म्नौ गस्त्रिदशयतिः प्रहर्षिणीयम् २ ॥
चतुर्ग्रहैरतिरुचिरा३जभस्गाः ।
वेदैरन्ध्रैर्मतौ यसगा मत्तमयूरम्४ ॥
सजसाजगौ भवति मञ्जुभाषिणी५ । (१)

द्रुतमदं२४भवति नभयाश्चेत् ।
खर्वे मा यस्मिन् सोऽयं विद्याधारः२५स्यात् ।
लघुर्गुरुर्वदन्ति पञ्चचामरम्२६ ।
सारङ्गसंज्ञं२७यमनस्तैलकारैस्तु ।
यमस्तल मौरव मौक्तिकदाम२८ ।
मोटकनाम२९यमनसभमौरव ।
रविशशि तरल३०नयनमिह । परिमितम् ।
(१) यमौ रौ विख्याता चञ्चरीकावलोकगः ।
न शरयुगगैश्चन्द्ररेखा७र्तुलोकैः
क्षतसुनियति विद्युद्ध्वननौ तौ गुरुः ।
दृढं कन्दुकं१०यत्र येभ्यश्चतुर्भ्यो गः ।
भवति मृगेन्द्रसुखं११ नजौ जरौ गः ।
नयुगशयुगगुरुभिः किल चण्डी११
उपस्थित१२मिदं ज्नौ त्नौ यदि गुरुः स्यात्
जसौ सजौ गौ भवति मञ्जुभाषिणी१२
दृढ नन्दिनी१३सजसयैर्गुरुयुक्तैः ।
कुटजगति१४र्नजौ सन्तु म्नौ गुरुः । परिमितम् ।

Digitized by Google

१४ । अथ शक्वर्याम् । १६३८४

मृतौ नसौ गावश्चग्रहविरतिरसंबाधा१ ।
ननरसलघुगैः खरैरपराजिता२ ॥
ननभनलघुगैः प्रहरणकलिका३ ।
उक्ता वसन्ततिलका४तभजा जगौ गः ॥
सिंहोन्नतेय५मुदिता मुनिकाश्यपेन ।
उद्वर्षिणीय६मुदिता मुनिसैतवेन ॥
वृन्दुवदना७भजसनैः सगुरुयुग्मैः ।
द्विःसप्तच्छिदलोलाप्म्सौ म्भौ गौ चरणे चेत् ॥ (१)

---

१५ । अथातिशक्वर्याम् । ३२७६८

द्विहतहयलघुरथ गिति शशिकला१ ।

---

(१) ननतल्गुरुगैः सप्तयतिर्नदीऽस्यात्
लक्ष्मी१०रत्नविराभा मृषौ ततो गुरुयुग्मम्
त्रिननगगिति वसुयति सुपवित्रम् ११ ।
मध्यक्षामा१२युगदशविरमा म्भौ म्यौ गौ
युगदिग्भिः कुटिला१३मिति म्भौ म्यौ गौ
नजभजगा गुरुश्च भवति प्रमदा१४
मजसा यतौ गिति शरव्यहैर्मञ्जरी१५
नजभजगैर्गुरुश्च वसुषट् कुमारी१६
नरनरैर्लगौ च रचितं सुकेसरम् १७ ।
म्भौ म्यौ ल्गौ चेदिह भवति च चन्द्रोरसः१८
वासन्तीयं१९ऽस्यादिह खलु मतौ म्यौ गौ चेत् ।
चक्रयद२०मिह भ न ज व न न गुरुभिः । परिमितम् ।

Digitized by Google

स्रगिरिति भवति रसनवकयतिरियम् ॥
वसुहययतिरिह मणिगुणनिकरः३ ।
ननमयययुतेयं मालिनी४भोगिलोकैः ।
भवति नजौ भजौ रसहितौ प्रभद्रकम्५ ।
सजनानयौ शरदशयतिरियमेला६ ।
स्त्रौ म्यौ यान्ती भवेतां सप्ताष्टभिश्चन्द्रलेखा७ ।
१६ । अथाष्टौ । ६५५३६
भक्तिनगैः(२)खरात्खसृषभगजविलसितम्१ ।
नजभजरैः सदा भवति वाणिनी२गयुक्तैः (३)

---

(१) माः पञ्च सूर्यैश्चां सा कामक्रीडासंज्ञाऽब्धिवेदा ।
सजभजरैर्विराजितमिदं सुखेलकम्६ । परिशिष्टम् ।
चन्द्रकान्ताभिधा१०रौ मृगौ विरामः खराष्टौ ।
ननत मरलताश्वरैरुपमालिनी११ ।
चित्रा१२नाम च्छन्दो यत्रिसंख्युक्षयो मात्रतो यौ ।
क्षपभाक्ष१३मेतदुदितं सजसाः सयौ वेत् ॥
विपिनतिलकं१४नमगरेफयुग्मैर्भवेत् ।
तूणकं१५ भवेदिदं रजौ रजौ ततश्च रः ।
कथयन्ति मानसहंसनाम१६सजौ जभराः ।
सगणैः शिववक्त्रमितैर्गदिता नलिनी१७ ।
शंस निशिपालकं१८मिदं भजसनाश्च रः ॥ परिशिष्टम् ।

(२) भश्च त्रयो नाश्च गश्च तैः । खरात् सप्तमाक्षरात् खं छिद्रं नवमाक्षरे छिन्नमिति शेषः ।

(३) चित्रसंज्ञश्लोकरितं रजौ रजौ रगौ च छत्तम् ।
जरौ जरौ ततो जगौ च पञ्चचामरं१वदेत् ।

Digitized by Google

१७ । अथात्यष्टी १३१०७२

रसेरुद्रैश्छित्वा यमनसभला गः शिखरिणी१ ।
जसौ जसयला वसुग्रहयतिश्च पृथ्वी२गुरुः ।
दिङ्मुनि वंशपत्रपतितं३भरणभनलगैः ।
रसयुगहये न्सौ म्रौ म्लौ गो यदा हरिणी४तदा ।
मन्दाक्रान्ता५जलधिषड्गैर्भौ नतौ तो गुरु चेत् ।
हयदशभिर्नजौ भजजला गुरु नर्द(र्कु)टकम्६ ।
मुनिगुरुकार्णवैः क्षतयति वद कोकिलकम्७ । (१)

संक्षपिता भरौ नरलाश्च धीरवलिता५ ।
पञ्चभकारयुताऽश्वगतिर्हयैर्यदि चान्त्यगुरुः ।
नजरभमेन मेन च स्यान्मणिकल्पलता७ ।
यस्मिन् सर्वे गा राजन्ते ब्रह्माद्यं तद्भूषंदनाम ।
यमौ नः सो रो गः प्रवरवलितं हनाम वोध्यम् ।
गरुडकृतं१०नजौ भजतगा भवेयुर्यदा ।
वेदाक्षाद्रैर्मदनवलिता११भौभोनमलसाः ।
भः समभनगा यस्यां साष्टभिर्दिङ् चलिता१२ ।
भोरयना नगौ च यस्यां वरयुवति१३रियम् । परि०
(१) रसयुगहययुङ् नौ जौ भो लगौ हि यदा हरिः८ ।
भवेत् कान्ता८युगरसहयैर्यभौ नरसा लगौ ।
ससजा भजगा गु दिक्खरैर्भवति चित्रलेखा१० ।
ससजैरतिमायिनी११मता भजपरैर्गुरुभ्याम् ।
वेदाक्षाद्रैर्मभनमयला गस्त्वसौ हारिणी१२ ।
भाराक्रान्ता१३युगरसनगैर्मभौ नरसा लगौ ।
ज्ञेयेयं पञ्चचामरं१४जरौ जरौ लगौ लघुश्च । परि०

Digitized by Google

१८ । अथ धृती । २६२१४४

स्याद्भूतर्त्वश्वैः कुसुमित१लतावेल्लिता धृती न यौ यौ (१)

---

१९ । अथातिधृती । ५२४२८८

---

(१) मातृ सौजौ भरसंयुतौ करिवाचश्वैर्हरिच्छ्रुतम् २ ।
यदि च नयुगलं ततो वेदरेफैर्मदाभालिका । २ ।
पञ्चभकारयुता त्रगति४र्यदि चान्यसरचिता ।
सुधा५तर्कैस्तर्कैर्भवति ऋतुभिर्यौमो नसतसाः ।
वर्षाश्वैर्मननततमकैः कीर्त्तिता चित्रलेखेयम् ६ ।
मादु रनना नसौ भ्रमरपदकं७मिदमभिहितम् ।
शार्दूलंवद मासषट् कयति मः सौ जसौ रौ मचेत् ।
अर्थाश्वाश्वैर्मभनयरयुगैर्वृत्तं मतं केसरम् ८ ।
म्यौ नृजौ भ्यौ चेच्चल२०मिदसुहितं युगैर्सुनिभिः खरैः ।
सैका वसुविरतिस्तनौ रैश्चतुर्भिर्युता जाजसा ११ ।
त्यधिकदशयति र्मनौ रौ भवेतां ररौ तारका१२ ।
भवति नयुगलं रभौ रौ दृग्भिर्गजेन्द्रैर्लता १३ ।
नञ्भूतलश्वैर्नौ भ्मौ विरतिश्चेत् सिंहविक्रूर्जितं१४यौ ।
सौ जजौ भरसंयुतौ करिवाचश्वैरनर्त्तनम् १५ ।
इदं क्रीड़चक्रं१६सदोर्घं सभस्तौर्यकारैः समेतम् ।
वेदाक्रान्तैर्मभनययुगैः स्यादियं चन्द्रलेखा१७ ।
दृग्वसुभिरियं नयुग्मं प्रसिद्धा ततो रा जसा१८ ।
शिवतुरगैस्तु नन्दन१९मिदं नजौ भजौ रहवम् ।
अष्टदिग्भिरियं रसौ जयुगं भरौ विबुधप्रिया२० ।
सूर्याङ्कैर्भगणः सजौ सनयुतौ शार्दूलललितम् २१ ।
क्षीरक२२सुहितं भसनजनैरिह रगश्चोऽन्ततः । परि०

Digitized by Google

सूर्याश्वैर्मसजस्तता सगुरवः शार्दूलविक्रीड़ितम्१ । (१)

---

२० । अथ क्रतौ । १०४८५७६

त्रेया सप्ताश्वषड्भिर्मरभनययुता स्त्री गः सुवदना१ ।
वीरजौगली(२)भवेदिहेष्टयेन लक्षणेन वृत्तनाम२ । (३)

---

२१ । अथ प्रकृतौ । २०९७१५२

स्रक्कैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा१कीर्तितेयम् ।(४)

---

(१) नयुगलगखेषु निरन्तरौ यदा स पञ्चचामरः २ ।
रसर्त्वश्वैर्यौ नृसौ ररगुरुयुता मेघविस्फूर्जिताश्वात् ।
भूताश्वाश्वान्तं मतनसररगैः कीर्त्तितं पुष्पदाम । ४ ।
वृत्तं विम्बाख्यं५ शरसुनिधुरगैर्मृतौ नृसौ ततो चेद्गुरुः ।
दृयं खाया६ख्याया वृत्तरसवृत्तयैर्यौ मनषा भ्रतौ गुरुः ।
रसैः षड्भिर्वेदैर्यमनसजजा गुरुमकरन्दिका ७ ।
दनाद्यैः स्याद् यमनयवलजगाः कीर्त्तिता मणिमञ्जरी८ ।
गजाश्विधुरगैर्जसौ जसतभागश्चेत् वसुदृतताः९ । परि०
(२) त्रिः त्रिराद्यौ रगौ रगयजगयौ अन्ते गश्च ।
(३) रसैरश्वैरश्वैर्यमननततगैर्गेन योभेयः२-सुक्रा ।
ख्याता पूर्वैः सुवंगा१ यदि मरभना सहयं गो गुरुश्च ।
सभरा नौ यवगाश्चयोदशयतिमत्ते भविक्रीड़ितम् ४ ।
सनयोजयुग्मभरैः षड्भगैः कथिता बुधैरिह गीतिका५ ।
सप्तर्ण्यक्षैर्विरामो मरभनयभव गाः स्यात् सुवदना६ । परि०
(४) सविधनिधिः-भवेदिह नजौ भरयो लगवाश्चयश्च १ रः । परि०

Digitized by Google

२२। आकृती। ४१८४३०४

म्नौ नरनारनावय गुरुर्दिगर्कविरमं हि भद्रकारमि दम्।(१)

२३। विकृती। ८३८८६०८

यदि ह नजौ भजौ भ्जभलगास्तदाख्ललितं१हरार्कयति-
मत्।

मत्ताक्रीड़ा२ मौ त्रौ नौ नल्गिति भवति वसुशरदश्वयति-
युता। (२)

२४। संकृती। १६७७७२१६

भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति
तन्वी१। (३)

---

(१) सप्तभकारक्रतावस्थितौ सगुरुः कविभिः कथिता वहिरा२
खाखित्यं२ भुजगेन्द्रैश्च भाषितमेतच्चेन्नसरसजनगुभिः।
सजता नसौ ररौ गः फणितुरगहयैः स्यान्नङ्खाक्षरराख्या।
मौ गौ नागस्वारो गो गो भवति वसुखनयतिरिति फंसी।

(२) मुख सुन्दरिका२ पिङ्गलमुनिनोक्ता सहयतो मसता अश्व-
भगाः। परिशिष्टम्।

(३) नाम किरीटर·मिदं भगणा यदि पिङ्गलनागमुनीन्द्रमतं
किल।

Digitized by Google

२५ । अतिकृती । ३३५५४४३२

क्रौञ्चपदा१ भ्मो स्भौ ननना न्गाविषुशरवसुमुनिविर-
तिरिह भवेत् ।

---

२६ । उत्कृती । ६७१०८८६४

वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम् ।
भौ नाः षट् सगगिति यदि नवरसरसशरयतियुतमपवा-
हाख्यम्२ ।

अथ दण्डके ।

यदि ह नयुगलं ततः सप्त रेफास्तदा चण्डवृष्टिप्रयातो१-
भवेद्दण्डकः ।
प्रतिचरणविवृद्धरेफाः स्युरर्णा२र्णव३व्याल४जीमूत५लीला-
करो६द्दाम७शङ्खाब्दयः । (१)

सगणैरिह वृत्तवरं वसुभिः किल दुर्मिल१-सुकृतमिदं कविभिः ।
परिगिष्टम् ।

(१) तथा च रगणाष्टकेन रचितवरः अर्णाख्यो दण्डकः२ । रगणनवकेन अर्णवाख्यः३ । तद्द्वयकेन व्यालाख्यः४ । एकादशरगणैः रचितः जीमूतः५ । द्वादशभिः रगणैः, लीलाकरः६ । त्रयोदशभिः रगणैः, दाम७ः । चतुर्दशभिः रगणैः, शङ्खः८ । आदिपदात् पञ्चदशादिभिः रगणैर्घटितपादाः क्रमेण आरामः९ संग्रामः१० सुराम वैकुण्ठ११ सार१२ आसार१३ विसार१४ संहार१५ नीहार१६ मन्दर१७ केदार१८ आसार१९ सत्कार२० संस्कार२१ माकन्द२२ गोविन्द२३ आनन्द२४ सन्दोह२५ आनन्द२६ इत्येते आख्याः ।

Digitized by Google

प्रचितक२७समभिधो धीरधीभिः स्मृतो दण्डको नद्दयादुत्तरैः
सप्तभिर्यैः । (१)

इति वृत्तरत्नाकराख्ये छन्दःशास्त्रे वर्णवृत्तकथनं
नाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ।

विषमे यदि सौ सलगा दले
भौ युजि भादृगुरुकावुपचित्रम् १ ॥
भत्रयमोजगतं गुरुणी चेद्
युजि च नजौ ज्ययुतौ द्रुतमध्या २ ॥

---

(१) नयुगलगुरुयुगेवं यकाराः कवीच्छानुरोधात्तदा यत्र वक्ष्यन्त एषोऽपरो दण्डकः प्रथितैरीरितः सिंहविक्रीडितनामा२८ ।

यत्र रेफान् कविः स्वेच्छया पाठलोभार्थं सामेच्छयारोपयत्येष धीरैः, स्मृतो दण्डको मत्तमातङ्गलीलाकरः२९ ।

लघुर्गुरुः क्रमेण यत्र बध्यते सुधीभिरिच्छया स दण्डकस्तनूं धेश्वरः स्मृतः३० ।

स्वेच्छया रजौ क्रमेण सन्निवेशयत्यत्र दारधीः कविः स दण्डकः स्मृतो जयत्यशोकमञ्जरी३१ ।

भगणः सकलः खलु यत्र भवेत् तमिह प्रवदन्ति बुधाः कुसुमस्तवकम्३२ ।

यकारैः कवीच्छानुरोधात् निबद्धैः प्रथितो विशुद्धोऽपरोदण्डकः सिंहविक्रीडनामा३३ । परिपिण्डितम् ।

Digitized by Google

सयुगात् सगुरू विषमे चेद्-
भाविह वेगवतीऽयुजि भाद्नौ ॥
ओजे तपरौ जरौ गुरुश्चेन्-
मृसौ ज्गौ भद्रविराड्४भवेदनोजे ।
असमे सजौ सगुरुयुक्तौ, केतुमतीऽसमे भरनगाद्यः ।
आख्यानकीह तौ जगुरू ग ओजे
जतावनोजे जगुरू गुरुश्चेत् ॥
जतौ जगौ गो विषमे, समे चेत्
तौ ज्गौ ग एषा विपरीतपूर्वा७ ॥
सयुगात् सलघू विषमे गुरु-
र्युजि नभौ भरकौ हरिणप्लुताट ॥
अयुजि ननरला गुरुः समे
नृजमपरवक्त्रमिदं ततो जरौ ॥
अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा१० ॥
वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः ।
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा ॥
स्यादयुग्मके रजौ रयौ समे चेत्
जरौ जरौ गुरुर्यवात् परा १ मतीऽयम् । (२)
इति वृत्तरत्नाकराख्ये छन्दःशास्त्रेऽर्द्ध सम वर्णवृत्त-
कथनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

---

(१) यवात्परा मतौ यवमतीति नाम ।

(२) अयुजि नजभभाऽसमेऽपि तु, नयुगरयुगलं तदाकौशदी१२

Digitized by Google

सुखपादोऽष्टभिर्वर्णैः
परेऽस्भान्मकरालयैः क्रमाद्दृष्टाः।
सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्य्यं
तदभिहितममलधीभिः पदचतुरूर्द्ध्वाभिधं१ वृत्तम्। (१)
प्रथममुदितवृत्ते,
विरचितविषमचरणभाजि।
गुरुकयुगलनिधन इह सहित आडा
लघुविरचितपदरचनयतिरिति भवति पीड़ः२। (२)
प्रथममपरचरणसमुत्थम्,
श्रयति स यदि लक्ष्म।
इतरदितरगदितमपि यदि च तुर्य्यं(३)
चरणयुगलक्रमविज्ञातमपरमिति कलिका३सा।

यदि विषमे भवतो नजौ जरौ। सजयाः समे तु जगुरु मञ्जुभो-रभम्१२।

विषमे ससजा यदा गुरु चेत्, सभरा वेन तु मालभारिणीयम्१४ परिशिष्टम्।

(१) यस्मात् सुखपादात् मकरालयैश्चतुर्भिरक्षरैः क्रमाद्दृष्टाः यस्य परे पादाः तथाच द्वितीयः द्वादशाक्षरैः, उपलक्षितः तृतीयः षोड़-शाक्षरैः चतुर्थः विंशत्यक्षरैः तत् पदचतुरूर्द्ध्वाभिधं नाम।

(२) आडा सहितः पीड़ः आपीड़ इति वृत्तनाम।

(३) प्रथमं तुर्य्यं चरणमपरे आद्यव्यवहिते द्वितीयचरणे सदृशं लक्ष्म, इतरत् द्वितीयं चरणम् इतरस्मिन् आद्यव्यवहिते पूर्वे प्रथमे यत् गदितसदृक्षं लक्ष्म तत् श्रयति अपरं तल्लक्ष्म तृतीयं चतुर्थं च चरण-मविज्ञातं तदा कलिकेति नाम।

Digitized by Google

द्विगुरुयुतसकलचरणान्ता
मुखचरणगतमनुभवति च तृतीयम् ।
अपरमिह हि लक्ष्म
प्रकृतमखिलमपि यतिदमनुभवति लवलीः सा ।
प्रथमसमधिवसति यदि तुर्यम्(१)
चरमचरणलयमवसितिगुरुयुग्मम् ।
अखिलमपरमुपरिगतमिति ललितपदयुक्ता
तदियममृतधाराः ।
इति पदचतुरूर्ध्वप्रकरणम् ।
सजमादिमे सलघुकौ च
न सजगुरुकैरथोद्गता१ !
व्यङ्गिगत भनजला गयुताः
स ज सा जगौ चरणमेकतः पठेत् ॥
चरणत्रयं व्रजति लक्ष्म
यदि सकलमुद्गतागतम् ।
ना भगौ भवति सौरभकम्२
चरणे यदीह भवतस्तृतीयके ॥
नयुगलं सकारयुगलं च,
भवति चरणे तृतीयके ।

---

(१) यदि प्रथमं तुर्यं चरणं चरमचरणलयमन्त्यचरणानमधिवसति यदि अपरमखिलं द्वितीयादिचरणसुपरि गतम् अपीङ्गतं चरणमधिवसति चेत् अवसितिः गुरुयुग्ममिति तल्लक्षणबोधाय अर्धार्धलक्ष्म तत् अमृतधारा नाम ।

Digitized by Google

तदुदितमुरुमतिभिर्ललितं३
यदि शेषमस्य खलु पूर्वतुल्यकम् ।
इत्युद्गताप्रकरणम् ।
म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्य-
त्रितयं सनजरगास्ततो ननौ सः । (१)
त्रिनपरिकलितजयौ
प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥
नौ पादेऽथ तृतीयके सनौ नसयुक्तौ
प्रथमाङ्घ्रिवृतयतिस्तु वर्द्धमानम्२ ।
त्रितयमपरमपि पूर्वसदृशमिह भवति
प्रततमतिभिरिति गदितं लघु वृत्तम् ॥
अस्मिन्नेव तृतीयके यदा तजराः स्युः ।
प्रथमे च विरतिरार्षभं३च्यवन्ति ॥
तच्छुद्धविराट्४पुरःस्थितं त्रितयमपरमपि यदि पूर्वसमं स्यात् ।
इत्युपस्थितप्रचुपितप्रकरणम् ।
विषमाक्षरपादं२ वा पादैरसमं दशधर्मवत् ।
यच्छन्दो नोक्तमत्र गाथेति१तत् पूर्वसूरिभिः प्रोक्तम् ॥
इति वृत्तरत्नाकराख्ये छन्दसि विषमवृत्तकथनं
नाम पञ्चमोऽध्यायः ।

---

(१) त्रितयं चरणानामिति शेषः । ततस्तदनन्तरे द्वितीयपादे, सनजरगाः तृतीये ननौ सः । ततस्तदनन्तरे चतुर्थे नत्रयजवाश्च यदा स्युः तदा उपस्थितपूर्वं प्रचुपितं नाम वृत्तम् ।

(२) विषमाक्षरपादं यथा "मधुकैटभौ दुरात्मनौ" इति ।

Digitized by Google

प्रस्तारो नष्टमुद्दिष्टमेकद्यादिलगक्रिया ।
सङ्ख्यानमध्वयोगश्च षड्ेते प्रत्यया: स्मृता: । (१)
पादे सर्वगुरावाद्यान्नघुं न्यस्य गुरोरध: ।
यथोपरि तथा शेषं भूय: कुर्यादमुं विधिम् ॥
अने दद्यादुगुरूनेव यावत् सर्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभि: । युग्मम् । (२)

"भांहषऽस्वराश्रामधिभे" इति च चन्द्रो । पादे: चरणै: अयमम् अतुल्यम् पञ्चाद्युपलक्षितम् दशधर्मवत् दशधर्मं प्रतिपादिका महाभारतस्य गाथा तया तुल्यं सा हि षड्भि: चरणैरुपलक्षिता । यथा,

दश धर्मं न जानन्ति धृतराष्ट्र ! निबोध तान् ।
मत्त: प्रमत्त उन्मत्त: श्रान्त: क्रुद्धो बुभुक्षित: ॥
त्वरमाणश्च भीतश्च लुब्ध: कामी च ते दश । इति ।

(१) प्रस्तार्य्यन्ते विस्तार्य्यन्ते गुरुलघुरूपतया वर्णा मात्रा वा अनेन प्रस्तार: लघुगुरुवर्णादिज्ञानोपायक्रिया । "अत्रैतावतिको भेद: किंरूप इति पृच्छति । यत्र तत्तदाख्यातं तस्योत्तरमिदमुच्यते" इत्युक्तलक्षणम् एकादिवर्णादिप्रस्तारे इयत्संख्यको भेद: कीदृश इति पृष्टे तस्य लघुगुरुसन्निवेशविशेषसमर्थनरूपोत्तरं नष्टम् । ईदृशसन्निवेशविशेषवान् भेद: कियत्संख्यक इति पृष्टे तत्समर्थनरूपोत्तरम् उद्दिष्टम् । प्रस्तारे एकाद्यादिलघुगुरुभेदवतां क्रिया तज्ज्ञानोपाय: । सङ्ख्यानं प्रस्तारसङ्ख्या । प्रस्तारश्चेत्थनाय पर्य्याप्त: देयोऽध्वा तस्य योग: । एते षट्प्रत्यया: प्रतीयते ज्ञायते सङ्ख्याविशेष: एभि: ते प्रत्यया: सङ्ख्यास्वरूपविशेषादिज्ञापका: उपायभेदा: ।

(२) प्रस्तारश्चोद्दिष्टादीनां सर्वगुरुके पादे पाद इत्युपलक्षणं वर्णानामपि । प्रथमपङ्क्तौ लिख्यते आद्यात् प्रथमगुरोरुत्तरार्थे-ऽर्थ: । द्वितीयपङ्क्तौ अध: तस्यैव अधस्तात् पङ्क्तौ प्रथमं लघुं

नष्टस्य यो भवेदङ्कस्तस्यार्द्धेऽर्द्धे समे च लः।
विषमे चैकमादाय तस्यार्द्धेऽर्द्धे गुरुर्भवेत्॥ (१)

न्यस्य यथा उपरि लघ्वङ्कस्यपङ्क्तौ अपरे अवशिष्टाः सन्निविष्टास्तथा तस्य दक्षिणपार्श्वेषु गुर्वादयो लेख्याः। तृतीयपङ्क्तौ तु प्रथमाया गुरुव्यक्तेरधस्तात् लघुं न्यस्य शेषान् उपरिस्थद्वितीयपङ्क्तिस्थान् गुर्वादीन् न्यसेत् एवञ्च तृतीयपङ्क्तौ आद्यस्थानस्य न्यूनता तत्र किं देयमित्याकाङ्क्षायामाह, जने प्रस्तार्यसंख्यातो न्यूने सति वामभागे गुरून् दद्यात् एवं भूयो मुक्तः कर्य्यात् यावच्च सर्वलघुकः पादो भवेत्, तावदेवं कुर्य्यादित्यर्थः। त्र्यक्षरप्रस्तारे लघुगुर्वोः ऋजुवक्रतया तदाकारेणोदाहरणम्।

प्रथमभेदः	ऽ ऽ ऽ मगणः
द्वितीयो भेदः	। ऽ ऽ यगणः
तृतीयो भेदः	ऽ । ऽ रगणः
चतुर्थो भेदः	। । ऽ सगणः
पञ्चमो भेदः	ऽ ऽ । तगणः
षष्ठो भेदः	। ऽ । जगणः
सप्तमो भेदः	ऽ । । भगणः
अष्टमो भेदः	। । । नगणः

मात्राप्रस्तारे विशेषस्तु पिङ्गलादौ द्रष्टव्यः।

(१) नष्टस्य अज्ञातस्वरूपस्य योऽङ्कः प्रस्तारमध्यपाति सङ्ख्याज्ञापकः अङ्कः तस्य तत्सङ्ख्यायाः समत्वे सति लो लघुर्लेख्यः तस्य अर्द्धे कृते तस्य समत्वे च सति लो लघुर्लेख्यः। पुनस्तस्यार्द्धे समे सति लघुः एवं यावदक्षरसङ्ख्या तावत् लेख्यः। एवं नष्टस्य सङ्ख्यायाविषमत्वे गुरुः, तत्रैकमादाय संयोज्य तस्यार्द्धे कृते सति तस्य विषमत्वे गुरुः समत्वे लघुः विषमत्वे एकयोजिते पुनरर्द्धे कृते विषमे सति गुरुः समे सति लघुः। यथा त्र्यक्षरप्रस्तारे चतुर्थो भेदः कीदृशः इति प्रश्ने, तत्-

Digitized by Google

उद्दिष्टं द्विगुणानाद्यादुपर्य्यङ्कान् समालिखेत् ।
लघुस्था ये तु तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् । (१)
वर्णान् वृत्तभवान् सैकानीत्तराधर्य्यतः स्थितान् ।
एकादिक्रमशस्तेषामुपर्युपरि निक्षिपेत् ॥
उपान्त्यतो निवर्त्तेत त्यजन्नेकैकमूर्द्धतः ।
उपर्य्याद्यादृगुरोरेवमेकद्व्यादिलगक्रिया । युग्मम् । (२

सङ्ख्यायाः समत्वात् प्रथमं लघुः तस्यार्द्धे कृते तस्य ह्रस्वत्वात् समत्वेन पुनर्लघुः यिदे ह्रस्वेऽर्द्धीकृते सति तस्य विषमत्वात् गुरुः एवञ्च चतुर्थो भेदः प्रथमद्वितीयलघुकः अन्त्यगुरुक इत्युत्तरम् ।

(१) आद्यात् आद्यवर्णमारभ्य उपरि द्विगुणान् द्विगुणान् वीप्सार्थे द्विः यङ्कान् समालिखेत् तत्र लघुवर्णोपरिस्थाङ्कैर्मिलितैः एकेन युक्तैः उद्दिष्टं स्यात् । यथा त्र्यक्षरप्रस्तारे मध्यगुरुकः भेदः कियत् सङ्ख्यक इति प्रश्ने यथोत्तरं द्विगुणान् द्विगुणान् अक्षरसङ्ख्यया यङ्कान् दद्यात् तत्र लघुवर्णोपरिस्थैरेकाक्षरस्थैर्मिलितैः प्रस्थाङ्कैः एकेन युक्तैः षड्भिः सम्पद्यते एवञ्च प्रश्नोऽयं भेद इत्युत्तरम् ।

(२) एकादि लघुगुरुव्यक्तिभेदसङ्ख्यानानोपायमाह वर्णानित्यादि, एकाक्षरादिप्रस्तारे उदाहरणम् ।

१	१				
१	२	१			
१	३	३	१		
१	४	६	४	१	
१	५	१०	१०	५	१

अत्र प्रथमाक्षरसङ्ख्या एकाङ्कः तत्र योजनं न सम्भवति उपरिस्थाङ्काभावात् । द्वितीयपङ्क्तौ वृत्ताक्षरसङ्ख्या द्वयेकाङ्कौ सैकौ उपरिस्थेन प्रथममेकाङ्केन युक्तः ह्रस्वः । ह्रस्वस्य पुनर्योजनं नास्ति उपा-

Digitized by Google

न्यतो निवर्तेतेत्युक्तेः। तृतीयपङ्क्तौ। त्रयत्रयस्तानुसारेण त्रयोऽङ्काः सैकाः स्थाप्याः तत्र उपरिस्थाभ्यामेकद्व्यङ्काभ्यां योगे त्रयङ्कः पुनः द्व्यङ्काभ्यां योगेन त्रयङ्कः ततो न मेलनम्। एवं चतुरत्रादौ ज्ञेयम्। एवञ्चात्र प्रथमाङ्केन सर्वलघुः सर्वगुरुर्वा एको भेदः। एवं द्वितीयस्थानस्थाङ्कसूचिताः एकलघुका एकगुरुका वा भेदाः। तृतीयस्थानस्थाङ्कसूचिताः द्विलघुकाः द्विगुरुका वा भेदाः अन्त्यस्थाङ्केन सर्वं गुरुः सर्वलघुको वा एको भेदो ज्ञेयः।

एतदुपायान्तरं बोधावश्यात्तक्रमत्व प्रदर्श्यते,

एकाद्येकोत्तरा अङ्का व्यस्ता भाज्याः क्रमस्थितैः॥

परः पूर्वेण संगुण्यस्तत्परस्तत्परेण च।

एकद्वित्रादिभेदाः स्युरिदं साधारणं स्मृतम्॥

अस्यार्थः

एकाद्यो यथाक्रममेकैकोत्तरा अङ्का व्यस्ताः स्थाप्याः ते च क्रमस्थितैस्तैरेवाङ्कैर्भाज्याः। किं तत्रेत्याशङ्क्यावामाह, परः परवर्त्ती अङ्कः पूर्वेण पूर्वस्थाङ्केन संगुण्यः पूरयितव्य इत्यर्थः। तत्परः तदुत्तराङ्कः तत्परेण पूर्वस्थात् परवर्त्तिना अङ्केन संगुण्य इत्येवं यावत्समाप्ति भाज्याः।

उदाहरणानि।

त्रयत्रे				चतुरत्रे			
भाज्याः	२	२	१	४	३	२	१
भाजकाः	१	२	३	१	५	३	४
लब्धानि	२	२	१	४	६	३	१
एकलघुः द्विलघुः त्रिलघुः				१लघुः २लः ३लः ४लः			
एकगुरुः द्विगुरुः त्रिगुरुः				१गुरुः २गः ३गः ४गः			

Digitized by Google

लगक्रियाङ्कसन्दोहे भवेत्संख्याविमिश्रिते ।
उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम् । (१)
संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्त्तितः ।
वृत्तस्याकुलिकीं व्याप्तिमधः कुर्य्यात्तथाकुलिम् ॥ (२)
वंशेऽभूत् कश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता
विप्रः पद्मे कनामा विमलतरमतिर्वेदतत्त्वार्थबोधी ।
केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्त-
श्छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥

इति वृत्तरत्नाकराख्ये छन्दसि प्रस्तारादिकथनं नाम षष्ठोऽध्यायः ।

समाप्तश्चायं ग्रन्थः ।

इति श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्यकृता
वृत्तरत्नाकरविवृतिः समाप्ता ।

---

(१) क्रमप्राप्तप्रस्तारभेदसंख्यानमाह,—लगक्रियेत्यादिः । सन्दोहः समाहारः प्रकारान्तरमाह, उद्दिष्टाङ्कानां समाहारः सैकः एकेन सहितः इमां प्रस्तारव्यक्तिभेदसंख्यां जनयेत् बोधयेत् इदमुपलक्षणम् । बोधयत्यङ्क एकद्व्यादिलगव्यक्तिसमाहारः सैकोऽपि प्रस्तारभेदसङ्ख्यां बोधयेदेवेति बोध्यम् ।

(२) क्रमप्राप्तमध्वयोगमाह । द्विगुणा द्विराहृत्ता सङ्ख्या प्रस्तार-सङ्ख्या एकोना यतो अध्वा प्रकीर्तितः तत्रोपपत्तिमाह । यतः वृत्तस्य वृत्तसंस्थानस्य आकुलिकीं व्याप्तिं स्थानं सङ्कोचं यथा अधः अङ्कविन्यासं कुर्य्यात् । यथा त्यत्रे अष्टौ भेदसङ्ख्या तत्रेक्षण-स्थानानि अष्टौ भेदयोरन्तराक्षस्थानानि सप्त इति पञ्चदश स्थानानि पञ्चदशाकुलिमितानि कार्य्याणि तत्र अष्टौ भेदस्थानानि सप्त तदन्तरा-क्षेपस्थानानि इति विशेषः । द्विगुण प्रस्तारसङ्ख्या एकेन ऊना पञ्चदशसङ्ख्या भवति इति तथोक्तमिति बोध्यम् ।

Digitized by Google

छन्दोमञ्जरी।



प्रथमः स्तवकः।

देवं प्रणम्य गोपालं वैद्यगोपालदासजः।
सन्तोषातनयश्छन्दो गङ्गादासस्तनोत्यदः॥ (१)
सन्ति यद्यपि भूयांसश्छन्दोग्रन्था मनीषिणाम्।
तथापि सारमाकृष्य नवकार्थो ममोद्यमः॥ (२)
इयमच्युतलीलाढ्या सद्वृत्ता जातिशालिनी।
छन्दसां मञ्जरी कान्ता सभ्यकण्ठे लगिष्यति॥ (३)

ग्रन्थारम्भे विघ्नविध्वंसाय स्वेष्टदेवताप्रणतिरूपमङ्गलमाचरन् प्रतिपाद्यं निर्दिशति देवमिति। वैद्यः यः गोपालदासः तस्माज्जात इति तथोक्तः सन्तोषा नाम काचित् रमणी, तस्यास्तनयः गङ्गादासः देवं गोपालं नन्दसुतं प्रणम्य यदः वक्ष्यमाणप्रकारं छन्दः तदाख्यं ग्रन्थमित्यर्थः तनोति प्रकटयति॥ १॥

ननु बहवः पिङ्गलादिकृताः छन्दोग्रन्थाः सन्ति तत् कथं ते पुनरयमुद्यम इत्याशङ्क्याह सन्तीति। यद्यपि मनीषिणां विदुषां पिङ्गलाचार्यादीनां भूयांसः अतिबहवः छन्दोग्रन्थाः सन्ति विद्यन्ते तथापि सारं तेषामिति शेषः आकृष्य संगृह्य नवकार्थः नवका नव्याः बालास्तदर्थः तेषां सुखबोधार्थं इत्यर्थः मम उद्यमः यत्नः॥ २॥

न केवलं बालबोधार्थोऽयं ग्रन्थः, अच्युतेश्वरलीलावर्णनात् सभ्यानां प्रवीणानामपि सन्तोषः सम्भवतीत्याह इयमिति। इयं छन्दसां मञ्जरी अच्युतस्य कृष्णस्य लीलया तद्वर्णनेनेत्यर्थः आढ्या युक्ता सद्वृत्तं वृत्तं चरितं सूत्रगठनरूपमिति भावः यत्र तादृशी सद्वृत्ता च, जातिशालिनी जातिर्मात्रागणनान्वितं छन्दः आर्यादिः तया

Digitized by Google

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्रा कृता भवेत्॥ (४)
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः॥ (५)
आदिस्तृतीयवत् यस्य पादस्तुर्य्यो द्वितीयवत्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्॥ (६)

शाखते शोभते इति तथोक्ता, जात्या जन्मना शाखते इति तथोक्ता च अतएव कान्ता मनोरम्या सती सभ्यानां विदुषां कण्ठे वसिष्यति स्थास्यति भगवद्वीणारवसोभात् सभ्याः सततमेतं सन्दर्भं पर्य्यालोचयिष्यन्तीति भावः। उक्तञ्च विदग्धमाधवे यद्यप्यिनं सन्दर्भं यदपि कविता नातिरुचिता मृदं धास्यन्त्युच्चैस्तदपि कृतिगम्भाद् बुधगणा इति यद्यपि मञ्जर्याः कर्णभूषणत्वप्रसिद्धिरस्ति तथापि अस्या वाङ्मयत्वात् कान्तासादृश्याच्च कण्ठलम्बनयुक्तं कण्ठलम्बना च श्रोतुं कर्णमलङ्करोतीति अस्या मञ्जरीत्वव्यपदेशः। उक्तञ्च विदग्धमाधवे कर्णं भवतः कर्णपूरीकृतेयं सन्दर्भमञ्जरीति॥ २॥

प्रकृतं निर्दिशति पद्यमिति। चतुर्णां पदानां श्लोकीयतुरीयभागानां समाहारः चतुष्पदी समाहारद्विगुः। पद्यते कीर्त्यते इति पद्यं तदाख्यं भवतीति शेषः। तच्च पद्यं द्विधा। वृत्तं जातिश्च। अक्षरैः वर्णैः संख्यातं गणितं पद्यं वृत्तम्। मात्रा लघ्वक्षरं तया कृता रचिता पद्यमित्यर्थः विधेयप्राधान्यात् स्त्रीत्वं जातिः। उक्तञ्चाग्नेये मात्राभिर्गणना यत्र सा जातिरिति काश्यप। गणना च लघुवर्णे एकमात्रः गुरुस्तु द्विमात्रः। उक्तञ्च एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकमिति॥ ३॥

समेति। तत् वृत्तम् अक्षरसंख्यातं छन्द इत्यर्थः त्रिधा भवतीति शेषः समम् अर्द्धसमं विषमञ्च। समाश्चत्वारः पादा यत्र तत्

Digitized by Google

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ (७)

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जोगुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥ (८)

गुरुरेको गकारस्तु लकारो लघुरेकक: ॥
क्रमेण चैषां रेखाभिः संस्थानं दर्श्यते यथा ॥

समं भवति, यस्य वृत्तस्य आदिः प्रथमः पाद इत्यर्थः तृतीयवत् तृतीयपादवदित्यर्थः तथा तुर्यः चतुर्थः पादः द्वितीयवत् द्वितीयपादवत् सत् वृत्तम् अर्द्धसमं भवति, भिन्नं चिह्नं लक्षणं येषां तादृशाः चत्वारः पादा यस्य तादृशं वृत्तं विषमं परिकीर्त्तितं कथितम् ॥ ५ ॥ ६ ॥

इदानीं छन्दोलक्षणोपयोगिनः सङ्केतितान् दशगणान्तनुक्रमेण स्मरस्तेति सः सगुरुन्तः येषां तथोक्तैः एभिः म य र स त ज भ न गैः दशभिरक्षरैः विष्णुना त्रैलोक्यमिव समस्तं वाङ्मयं वाङ्मयं व्याप्तं पूरितम् । एतैरेव दशभिरक्षरैश्छन्दांसि वर्ण्यन्ते इति भावः ॥ ७ ॥

पूर्वोक्तानामक्षराणां सङ्केतितार्थान् दर्शयति म इति । त्रयो गुरवो यत्र स गणः मः, त्रयो लघवः यत्र स गणः नकारः, आदिः गुरुर्यस्य स गणः भकारः, आदिः लघुर्यस्य स गणः यः, गुरुः मध्यगतः यस्य तादृशो गणः जः, लः लघुः मध्यः यस्य तादृशो गणो रकारः, अन्तः गुरुर्यस्य तादृशो गणः सः, अन्तः लघुर्यस्य तादृशः गणः तः भवतीति सर्वत्र योज्यम् । यथा मगणः मेधावी । नगणः चलति । भगणः माधव । यगणः नराणाम् । जगणः रमेश । रगणः पर्वतः । सगणः रमणः । तगणः धीरेण । इत्यादि ॥ ८ ॥

गुरुरिति । एकः गकारः गुरुः, एकवः लकारो लघुः एतौ गुरुलघू इत्यर्थः । क्रमेण च यथाक्रमं गकारादिक्रमेणेत्यर्थः रेखाभिः

म ऽ ऽ ऽ, न । । ।, भ ऽ । ।, य । ऽ ऽ, ज । ऽ ।,
र ऽ । ऽ, स । । ऽ, त ऽ ऽ ।, ग ऽ, ल ।, ॥ (९)

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ।
गवाश्चतुर्लघूपेताः पञ्चार्थ्यादिषु संस्थिताः ॥
यथा (ऽ ऽ) (॥ ऽ) (। ऽ ।) (ऽ ॥) (॥ ॥) ॥ (१०)
सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ॥ (११)

चिह्नविशेषैरित्यर्थः एषां मादीनां दशानां गणानां संस्थानम् आकृतिः दर्श्यते प्रकाश्यते यथा । म ऽ ऽ ऽ, न । । ।, भ ऽ । ।, य । ऽ ऽ, ज । ऽ ।, र ऽ । ऽ, स । । ऽ, त ऽ ऽ ।, ग ऽ, ल । ॥ ९ ॥

इदानीं गणानुज्ञा जातेर्गणान् निर्दिशति ज्ञेया इति । अत्र पद्ये आर्यादिषु जातिच्छन्दःसु इत्यर्थः चतुष्कलाः चतुर्मात्राः सर्वान्तमध्यादिगुरवः सर्वगुरवः अन्तगुरवः मध्यगुरवः आदिगुरव इत्यर्थः चतुर्भिर्लघुभिः उपेताः चतुर्लघव इत्यर्थः पञ्चगणाः संस्थिताः तथा च सर्वगुरवः यथा राजा । अन्तगुरवः यथा तरवः, मध्यगुरवः यथा नवीन, आदिगुरवः यथा माधव । चतुर्लघवः यथा कमलम् ॥ १० ॥

गुरुत्वमर्थं निर्दिशति सानुस्वार इति । सानुस्वारः अनुस्वारसहितः । उपलक्षणमेतत् अवसाने व्यञ्जनान्तोऽपि लघुर्गुरुर्भवतीति बोध्यम् । दीर्घश्च दीर्घवर्णश्च विसर्गी च विसर्गयुक्तश्च संयोगः संयुक्तवर्णः तस्य पूर्वः पूर्ववर्णश्च तथा पादान्तगः चरणान्तस्थितः लघुरपीत्यर्थः गुरुः भवेत् । अत्रेति । अत्र छन्दसि इत्यर्थः पादान्तगः लघुः गुरुः वा भवेत् । अत्र वाशब्दस्य व्यवस्थावाचित्वात् इत्तेषु लघोर्गुरुत्वं वा स्यात् । जातिषु तु लघोर्गुरोश्च गुरुत्वं वा स्यादिति बोध्यम् । पादान्तग लघोर्गुरुत्वे यदि यत्नदार्ढ्यं हानिर्न भवेत् तदा न दोषः । अन्यथा तु दोषः उक्तञ्च दर्पणे । इष्टे यत्न पतन्ति मूढ-

Digitized by Google

अत्र पादान्तगो लघुर्गुरुर्भवेद्वा। यथा।

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि।
अल्पव्ययेन सुन्दरी ग्राम्यजनो मिष्टमश्नाति ॥ (१२)

सुन्दरीति ग्राम्यशब्दे परे विकल्पेन लघुत्वम्। तथा भट्टिः।

अथ लुलितपतत्रिमालं रुग्णाशनबाणकेशरतमालम्।
स वनं विविक्तमालं सीतां द्रष्टुं जगामालम् ॥ (१३)

अत्र प्रथमपादान्तगुरोर्लघुत्वम्। तथा मल्लितुः पारिजातहरणनाटके।

मनसामस्त्राणि वस्त्राणि च। अत्र वस्त्राण्यपीति लघुरपि गुरुतां भजते। तथाच बन्धदार्ढ्यमेव पादान्तलघोर्गुरुत्वे हेतुः। तस्मात् पादान्तलघोर्यो गुरुभाव उक्तः सर्वत्र द्वितीयचतुर्थपादविषयः प्रथमतृतीयपादविषयस्तु वसन्ततिलकादाविति मन्तव्यम् ॥ ११ ॥

तरुणमिति। हे सुन्दरि! ग्राम्यजनः तरुणं नवं सर्षपशाकं नवौदनं नवाक्षं पिच्छिलानि अघनानि दधीनि च अल्पव्ययेन अश्नाति भक्षयति। अत्र आर्याछन्दः तस्माच्च वक्ष्यमाणलक्षणरीत्या आद्ये पादे द्वादशमात्राः, द्वितीये पादे अष्टादश तृतीये पादे द्वादशमात्राः चतुर्थे पञ्चदशेति नियमः। ततश्चात्र द्वितीयचतुर्थपादान्तलघ्वोर्गुरुत्वं तृतीये च सुन्दरीति ग्राम्यशब्दे परत्वस्थितेऽपि वैकल्पिकत्वात् न गुरुत्वमिति न छन्दोभङ्गदोष इति बोध्यम् ॥ १२ ॥

अथेति। अथ दाहानन्तरं लुलितानां चलितानां पतत्रिणां पक्षिणां माला संहतिः यस्मिन् तत् रुग्णाः भग्नाः अशनादयो यस्मिन् वने अशनः पीतसालः बाणः भिण्टीविशेषः केशरो नागकेशरः तमालः खनामख्यातो वृक्षः, विविक्ताः पृथग्भूताः मालाः पङ्क्तयो यत्र तद्वनम् अशोकवनम् इत्यर्थः स हनूमान् अलं पर्याप्तं सीतां द्रष्टुं जगाम। अत्र पुष्पितवल्लकम् ॥ १३ ॥

Digitized by Google

सिन्दूरपूरकृतगैरिकरागशोभे
श्रस्रन्मदस्रवणनिर्झरवारिपूरे।
संग्रामभूमिगतमत्तसुरेभकुम्भ-
कूटे मदीयनखराग्रनयो विशन्तु ॥ (१४)

अत्र तृतीयचतुर्थपादान्तलघोर्गुरुत्वम्। तथा ममाच्युत-चरितेऽपि।

रक्तेन केशिदशनक्षतसम्भवेन
रेजे स मण्डिततरो हरिबाहुदण्डः।
तद्दन्तसन्दलितभीमभुजप्रताप-
वह्नेरिव स्फुटकणप्रकरेण कीर्णः ॥ (१५)

सिन्दूरेति। इन्द्राय कुपितस्य गरुत्मत उक्तिरियम्। मम इमे मदीया नखरा एव अग्रनयः वज्राणि सिन्दूरपूरेण सिन्दूरसङ्घेन कृता गैरिकरागस्य शोभा यस्य तादृशे, श्रस्रत् अजस्रं यत् मदस्रवणं मदक्षरणं तदेव निर्झरवारिपूरः प्रस्रवणजलौघः यस्मात् तथाभूते संग्राम-भूमिं गतः यः मत्तः सुरेभः सुरहस्ती ऐरावत इत्यर्थः तस्य कुम्भकूटे शिरः पिण्डश्चूडे कुम्भौ तु पिण्डौ शिरस इति कूटोऽस्त्री शिखरं श्रृङ्गमिति चामरः। विशन्तु प्रविशन्तु नखरप्रहारैस्ते ऐरावतकुम्भौ विदारयामीति भावः। अत्र सिन्दूरपूरे गैरिकरागत्वारोपः मदस्रावे निर्झरवारित्वारोपः कुम्भे कूटत्वारोपः नखरे च अग्रनित्वारोपः शब्दः केवलं सुरेभे पर्वतत्वारोप आर्थः तस्मादेकदेशविवर्त्तिरूपकमलङ्कारः तदुक्तं दर्पणे यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तदिति। वसन्ततिलकं वृत्तम् ॥ १४ ॥

रक्तेनेति। स हरिबाहुदण्डः कोशीनाम कश्चिदसुरः तस्य दशनैः यत् क्षतं व्रणः तस्मात् सम्भवो यस्य तथोक्तेन रक्तेन मण्डिततरः अतिशयेन शोभितः सन् तस्य केशिनः दन्तैः सन्दलितः विदारितः यः

अत्र प्रथमतृतीयपादान्तस्यापि लघोर्गुरुत्वम्।

प्रङ्केवेति पुनः पिङ्गलमुनेर्विकल्पविधायकं सूत्रम्। ततश्च कुमारे।

सा मङ्गलस्नानविशुद्धगात्री गृहीतप्रत्युप्तमनीयवस्त्रा।
निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे॥ (१६)

अत्रप्रशब्दे परे गुरोर्लघुत्वम्।

प्राप्य नाभिहृदमज्जनमाशु प्रस्थितं निवसनग्रहणाय।
औपनीविकमरुन्ध किल स्त्री वल्लभस्य करमात्मकराभ्याम्॥ (१७)

इति माघे। अत्र रुशब्दे परे गुरोर्लघुत्वम्। तीव्रप्रयत्नोच्चारणेनात्र लघुत्वमिति कण्ठाभरणः। यदुक्तम्

भीमः भयङ्करः भुजः बाहुः तस्य प्रताप एव वह्निः तस्य स्फुटः उज्ज्वलः कक्षानां प्रकरः समूहः तेन कीर्णः व्याप्त इव रेजे शुशुभे। अत्र प्रतापे वह्निप्रारोपणात् रूपकानुप्राणितोत्प्रेक्षालङ्कारः। तदुक्तं दर्पणे भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मनेति। वृत्तं वसन्ततिलकम्॥ १५॥

सेति। मङ्गलार्थस्नानेन विशुद्धगात्री निर्मलाङ्गी गृहीतं प्रत्युप्तमनीयवस्त्रं धौतवस्त्रं यया सा धौतवसनाच्छादिता सा पार्वती निर्वृत्तः निष्पन्नः पर्जन्यस्य जलेनाभिषेको यस्याः सा प्रफुल्लं काशं काशपुष्पं यस्याः सा तथोक्ता वसुधा इव रेजे शुशुभे॥ १६॥

प्राप्येति। नाभिरेव ह्रदः इति रूपकं तत्र मज्जनं प्राप्य आशु झटिति निवसनग्रहणाय वस्त्राकर्षणाय स्नातस्य वस्त्रग्रहणं युक्तम्। प्रस्थितं प्रवृत्तम् उपनीवि नीविसमीपे प्रायेण तत्र भवं औपनीविकं तत्र व्याप्तम् इत्यर्थः। वल्लभस्य पत्युः करं स्त्री आत्मकराभ्याम् अरुन्ध किल रोधं नाटितवती इत्यर्थः॥ १७॥

Digitized by Google

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
न च्छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः ॥ (१८)
यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामादैः पदैर्वाच्या निजेच्छया ॥ (१९)
क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुण्यात्वतुलमहिमा मां करुणया ॥ (२०)

संयुक्तवर्णात् पूर्वस्य गुरुत्वं न सार्वत्रिकमिति प्राचां मतं नाङ्गीकरोतीति । यदा तीव्रप्रयत्नेन अतिद्रुतपठनेनेत्यर्थः संयोगादेः संयुक्तवर्णात् पूर्वस्य अगौरवं लघुत्वं भवतीति शेषः तदा छन्दोभङ्गः न दोषाय इति सूरयः विद्वांस आहुः कथयन्ति । यथा नाङ्गं वाङ्गो सुवाङ्ग र्न स्वरतिथिरसौ दूषयत्यङ्गनाङ्गमिति । अत्र स्वरतिथिरवार्वितिं तीव्र प्रयत्नोच्चार्यत्वात् त्रीति संयुक्ते वर्णे परेऽपि रङ्ग न गुरुत्वमिति बोध्यम् ॥ १८ ॥

यतिलक्षणं निरूपयति यतिरिति । जिह्वाया इष्टम् अभिलषितं यत् विश्रामस्थानं सा यतिः कविभिः उच्यते कथ्यते । यत्र स्वेच्छया जिह्वा विरमति सैव यतिरित्यर्थः । सा च विच्छेदविरामादैः पदैः निजेच्छया निजस्य कवेरित्यर्थः इच्छया वाच्या अभिधेया । विच्छेदविरामादिशब्दा यतिपर्यायाः, कवयः येन यतिपर्यायेण यतिं अभिधातुमिच्छन्ति तेनैव सा वक्तव्येति भावः ॥ १९ ॥

तद्विशेषमाह क्वचिदिति । पूर्वकृतिभिः पूर्वपण्डितैः अभिहिता यतिः क्वचित् छन्दसि न तु सर्वत्रेत्यर्थः आस्ते । सा यतिः पदान्ते स्थिता चेदिति शेषः शोभां व्रजति प्राप्नोति, पदमध्ये त्यजति च शोभामिति शेषः पदमध्ये यतिर्दोषावहेति भावः । पुनः किन्तु तत्रैव पदमध्ये एव असौ यतिः स्वरेण स्वरवर्णेन विहितः कृतः

अयञ्च श्लोकश्छन्दोगोविन्दे मम गुरोर्गङ्गादासस्य ।
श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम् ।
इत्याह भट्टः स्वग्रन्थे गुरुर्मे पुरुषोत्तमः ॥ (२१)
अतएव मुरारिः ।
सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डली-
लीलालून पुनर्विरूढ़शिरसो वीरस्य लिप्सोर्वरम् ।
याञ्चादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं हृणु'
त्वं हृणित्यभितो मुखानि स दृग्ग्रीवः कथं कथ्यताम् (२२)
इति । जयदेवोऽपि ।

सन्धिर्यत्र तथाभूता चेदिति शेषः तां शोभां श्रयति भजते । उदाहरणते यथेति अतुलः निरुपमः महिमा यस्य तथाभूतः कृष्णः कृपया कृपया मां पुष्णातु पालयतु । अत्र पुष्णा इत्यस्मात् यतिः पुष्णात्विति पदमध्येऽपि न दुःश्रवत्वमापादयतीति न शोभाविरुद्ध इति भावः । फलितार्थस्तु यत्र यत्या श्रुतिकटुत्वं न स्यात् तत्रैव यतिर्मानतीयेति । शिखरिणीवृत्तमिदम् ॥ २० ॥

श्वेतेति । श्वेतमाण्डव्यमुख्याः नाम पण्डितास्तु यतिं न इच्छन्ति, मे मम गुरुः पुरुषोत्तमः भट्टः स्वस्य आत्मनः ग्रन्थे इति आह ब्रवीति ॥ २१ ॥

सन्तुष्ट इति । मिथिलायां कश्चनुर्भङ्गकाले शतानन्दं प्रति रावण दूतस्योक्तिरियम् । तिसृणां पुरां अन्तरीक्षस्थितानामिति शेषः रिपौ शिवे सन्तुष्टेऽपि वरदानाय समागतेऽपीति यावत् कण्डूला रणकण्डूतियती या दोर्मण्डली बाहुसङ्घः विंशतिः वाऽत्र इत्यर्थः तया लीलया क्रीडया लूनानि छिन्नानि पुनर्विरूढ़ानि शिरांसि यस्य तथाभूतस्य एकं एकं मुण्डं छित्वा कराय आकृतिं दत्तवत इति भावः वरम् अभिलषितं लिप्सोः लब्धुमिच्छोः वीरस्य यस्य दृग्ग्रीवस्य रावणस्य अभितः समन्तात् स्थितानीति शेषः मुखानि याच्ञया भिक्षया

साध्वी माध्वीक ! चिन्ता न भवति भवतः शर्करे कर्कशासि द्राक्षे ! द्रक्ष्यन्ति के त्वामसृत ! सृतमसि क्षीर ! नीरं रसस्ते । माकन्द ! क्रन्द कान्ताधर ! धरणितलं गच्छ यच्छन्ति यावद् भावं शृङ्गारसारस्वतमयजयदेवस्य विश्ववचांसि ॥ (२३)

एवमन्येऽपि ।

कत्यद्रिप्रतिरोधिताः कतिनदीपाथोनिधिप्लाविताः
कत्येवाटवितां गताः कति न वा भूदेवदेवैर्वृताः ।

यत् दैन्यं दीनभावः तेन परान्हि परागतानि कुण्ठितानीति यावत् सन्ति मिथः परस्परं त्वं क्षुद्र त्वं क्षुद्र इति कलहायन्ते कलहं कुर्वन्ति स इवाचरति क्यङ् तेन प्रकारेण कथ्यतां वर्ण्यतां भवेति शेषः यावर्ष-नीयमहिमापि स ते राजकन्यां मैथिलीं प्रार्थयते इति भावः । शार्दूलविक्रीडितं वृत्तम् । अत्र द्वितीये पादे द्वादशवर्णान्ते यतिः स्थितेति द्रष्टव्यम् ॥ २२ ॥

साध्वीति । हे माध्वीक ! मधो ! शृङ्गारसारस्वतमयजय-देवस्य शृङ्गाररसमयजयदेवकवेः वचांसि विश्वक् समन्तात् यावत् भावं प्रीतिमिति यावत् यच्छन्ति ददति लोकान् रञ्जयन्तीति शेषः तावत् भवतः तव चिन्ता साध्वी मनोरमेत्यर्थः न भवति, हे शर्करे ! त्वं कर्करा असि, हे द्राक्षे ! के जनाः त्वां द्रक्ष्यन्ति ? न केऽपीत्यर्थः । हे अमृत ! त्वं सृतम् असि, हे क्षीर ! ते तव रसः स्वादः नीरं जलवदित्यर्थः, हे माकन्द ! रसाल ! क्रन्द वर्तिष्ठ हे कान्ताधर ! प्रियाधर ! त्वं धरणितलं पातालं गच्छ, सर्वेभ्योऽपि जयदेववाक्यस्य अतिमधुरत्वात् माध्वीकादिनिर्भर्त्सनमिति भावः अत्र द्वितीये पादे सप्तमवर्णान्ते यतिः खरविरहितसन्धित्वात् शोभां त्यजति, परं चतुर्थे पादे सप्तम वर्णान्ते स्थिता न शोभत इति ध्येयम् । खग्धराछन्दम् ॥२३॥

कतीति । राजस्तुतिरियम् । हे भूमिपतीन्द्र ! राजश्रेष्ठ ! तव कति भूम्नः भूप्रदेशाः अद्रिप्रतिरोधिताः पर्वतव्याप्ताः कतिषु पर्वतेषु

भूम्यो भूमिपतीन्द्र ! तावकयशः प्रस्तावनामण्डली
कोष्ठीकृत्य जगद्धनं कतिवराटीभिर्मुदं यास्यतीति ॥ (२४)

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः ।
पादैरुक्थादिसङ्ख्यं स्याच्छन्दः षड्विंशतिं गतम् ॥ (२५)
उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ २६ ॥

ते आधिपत्यमित्यर्थः । कति भूम्यः नदीभिः पाथोनिधिभिः सप्तद्वीपैश्च प्लाविताः नदीषु सप्तद्वीपेषु च ते आधिपत्यमित्यर्थः । कति भूम्यः अटवितां काननत्वं गताः वनेषु च ते आधिपत्यमित्यर्थः कति वा भूम्यः भूदेवैः ब्राह्मणैः देवैश्च प्रतिष्ठितदेवमूर्त्तिभिरित्यर्थः न हृता न व्याप्ताः अपितु व्याप्ता एव ब्राह्मणेभ्यः ब्रह्मोत्तरदानेन देवानां प्रतिष्ठापनेन च ते बहवो भूमयो गता इति भावः । तावकयशः प्रस्तावनामण्डली त्वद्यशोवर्णनपरम्परा जगतां धनं कोष्ठीकृत्य निधयीकृत्य कति वराटीभिः कतिसंख्यैः वराटकैः मुदं हर्षं यास्यति ? अल्पं जगद् वित्तं न ते योग्यमिति मत्वा प्रीतिं न प्राप्स्यतीत्यर्थः । अथवा जगद्धनं जगद्धननामानं मामिति शेषः कोष्ठीकृत्य निधयीकृत्य आस्कन्द्येत्यर्थः कति वराटीभिः मुदं यास्यतीति कस्यचित् सामन्तस्योक्तिः तव भूमयः प्रायशो निष्करत्वेन स्थिताः तत् कथं मां त्वद्भूमिभोक्तारमति पीड़यसीति भावः । अत्र प्रथमे पादे द्वादशवर्णान्ते चतुर्थे पादे द्वादशवर्णान्ते यतिः षट्समध्यस्थितत्वात् नातिशोभते इति बोध्यम् । शार्दूलविक्रीड़ितं वृत्तम् ॥ २४ ॥

समवृत्तानाम् अक्षरभेदेन नामान्याह आरभ्येति एकाक्षरात् पादात् आरभ्य उपक्रम्य एकैकाक्षरवर्द्धितैः पादैः षड्विंशतिं गतं षड्विंशतिभेदम् उक्थादि सङ्ख्यं छन्दः स्यात् ॥ २५ ॥

Digitized by Google

त्रिष्टुप् च जगती चैव तथातिजगती मता।
शर्करी सातिपूर्वा स्याद्ध्यत्यष्टी तथा स्मृते ॥ २७ ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः संकृतिश्चैव तथातिकृतिरुत्कृतिः।
इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम् ॥२८॥

इति छन्दोमञ्जर्यां मुखबन्धाख्यः प्रथमः स्तवकः।

द्वितीयः स्तवकः।

अथ समवृत्तम्।

उक्था। (२)

(एकाक्षरावृत्तिः)

१। गः श्रीः। (१)

श्रीस्ते सास्ताम्। (२)

---

(१) गः श्रीरिति गः एको गुरुवर्णः यदि चरणे स्यात् तदा श्रीनाम छन्दः स्यादित्यर्थः। सर्वत्रैव छन्दोलक्षणे तत्तल्लक्षणोदाहरणे सिद्धेऽपि बालकानां बोधसौकर्याय पृथगुदाहरणं द्रष्टव्यम्।

(२) श्रीवृत्तमुदाहरति श्रीरिति। सा श्रीः ते तव सास्तां भवत्वित्यर्थः।

Digitized by Google

अत्युक्था । [४]

(द्व्यक्षरा वृत्तिः ।)

१ । गौ स्त्री । (३)

गोपस्त्रीभिः कृष्णो रेमे । (४)

मध्या । [८]

(त्र्यक्षरा वृत्तिः)

१ मा नारी । (५)

गोपानां नारीभिः । श्लिष्टोऽव्यात् कृष्णो वः ॥ (६)

२ री मृगी । (७)

सा मृगीलोचना । राधिका श्रीपतेः ॥ (८)

---

(३) गाविति । गौ यस्य पादो गुरुवर्णद्वयघटितः स्यात् तत् स्त्रीनाम छन्दः स्यात् ।

(४) उदाहरति गोपेति कृष्णः गोपस्त्रीभिः गोपाङ्गनाभिः रेमे विजहार ।

(५) म इति । यस्य मः त्रिगुरुघटित इत्यर्थः । पादः, तत् नारीनामवृत्तं स्यात् ।

(६) उदाहरति गोपानामिति । गोपानां नारीभिः श्लिष्टः आलिङ्गितः कृष्णः वः युष्मान् अव्यात् रक्षतु । अवरक्षणे आशीर्लिङ् ।

(७) र इति । यस्य पादः रः लघुमध्यघटित इत्यर्थः तत् मृगी नाम वृत्तं स्यात् ।

(८) उदाहरति । श्रीपतेः कृष्णस्य सा मृगीलोचना राधिका प्रिया आसीदिति शेषः ।

Digitized by Google

प्रतिष्ठा। [१६]

(चतुरक्षरा वृत्तिः)

१ ग्मौ चेत् कन्या ॥ (९)

भास्वत्कन्या सैका धन्या। यस्याः कूले कृष्णोऽखेलत् ॥ (१०)

२। नगि सती ॥ (११)

सुररिपो! तव पदम्। नमति सा ननु सती ॥ (१२)

सुप्रतिष्ठा। [३२]

(पञ्चाक्षरा वृत्तिः)

१। भ्गौ गिति पङ्क्तिः ॥ (१३)

कृष्णसनाथा तर्णकपङ्क्तिः।

यामुनकच्छे चारु चचार ॥ (१४)

---

(९) ग्मौ इति चेत् यदि पादे ग्मौ गुरुवर्णौ एकः मश्च गुरुत्रयमित्यर्थः, तथाच गुरुचतुष्टयघटितः यस्य पादो भवतीत्यर्थः तत् कन्या नाम वृत्तं स्यात्।

(१०) उदाहरति भास्वदिति। यस्याः कूले तटे कृष्णः अखेलात् क्रीडितवान् सा एका भास्वतः सूर्यस्य कन्या यमुनेत्यर्थः धन्या पुण्यवतीत्यर्थः।

(११) नगीति। नगि नः लघो लघुवर्णौ गश्च तस्मिन् लघुत्रयात् परम् एकगुरुवर्णघटिते पादे सतीति यावत् सती नाम वृत्तं स्यात्।

(१२) उदाहरति सुररिपो इति नञ्मिति सम्बोधनसूचकमव्ययं हे सुररिपो कृष्ण! सा सती साध्वी नारी तव पदं नमति।

(१३) भ्गाविति भगौग् भकारो गुरुद्वयस्येत्यर्थः तथाच यस्य पादो गुरुलघुगुरुगुरुवर्णघटितः, तत् पङ्क्तिः नाम वृत्तं स्यात्।

(१४) उदाहरति कृष्णेति कृष्णेन सनाथाः सहिता इत्यर्थः तर्णक-

२। सखगैः प्रिया ॥ (१५)

व्रजसुभ्रुवो विलसत्कलाः।
अभवन् प्रिया सुरवैरिणः ॥ (१६)

गायत्री। [६४]

(षड्क्षरा वृत्तिः)

१। त्वौ चेत्तनुमध्या ॥ (१७)

मूर्त्तिर्मुरयत्रोरत्यङ्गुतरूपा।
आस्तां मम चित्ते नित्यं तनुमध्या ॥ (१८)
नख्यन्ति ददर्श हृन्दानि कपीन्द्रः।
हारीष्णबलानां हारीष्णवलानाम्। (१९)

कानां वलानां पङ्क्तिः त्रेधो वासनकक्षे वसुनालोरे चाद् मनोज्ञं यथा तथा चचार।

(१५) सखगैरिति। सखगैः सकारखगुरुदर्वैः खगुखगुरुखगुरुखगुरुभिर्वर्णैः यस्य पादः भवति, तत् प्रिया नाम वृत्तं स्यादित्यर्थः।

(१६) उदाहरति व्रजेति विलसन्त्यः स्फुरन्त्यः कला चत्वारिंशत्-चतुःषष्टि कामविद्या यासां ताः व्रजसुभ्रुवः व्रजाङ्गनाः सुरवैरिणः कृष्णस्य प्रियाः अभवन्।

(१७) त्वाविति चेत् यदि त्वौ तकारवकारौ लघाविलर्थः यस्य पादे स इति शेषः तत् तनुमध्या नाम वृत्तं स्यात्।

(१८) उदाहरति मूर्त्तिरिति। 'तनुमध्या लघुमध्या अल्पमुत्तं रूपं यौन्दर्यं यस्यास्तथाभूता सुरयत्रोः कृष्णस्य मूर्त्तिः नित्यं मम चित्ते मनसि आस्तां तिष्ठतु।

(१९) नख्यन्तीति कपीन्द्रः हनूमान् हारीषि मनोहराणि हारीषि हारयुक्तानि अवलानां वसनरहितानाम् अनाघ्रातानामिलर्थः अवलानां नारीणां हृन्दानि समूहान् ददर्श।

Digitized by Google

इति भट्टी। पादान्तत्वेन ददर्श इत्यत्र गुरुत्वम्।

२। शशिवदना स्यौ ॥ (२०)

शशिवदनानां व्रजतरुणीनाम्।
अधरसुधोर्मिं मधुरिपुरैच्छत् ॥ (२१)

३। द्विया सोमराजी ॥ (२१)

हरे! सोमराजीसमा ते यशःश्रीः।
जगन्मण्डलस्य च्छिनत्त्यन्धकारम् ॥ (२३)

४। सोमः विद्युल्लेखा ॥ (२४)

उष्णिक्। [१२८]

(समाक्षरा वृत्तिः)

१। ननगि मधुमती ॥ (२५)

---

(२०) शशीति। नकारवकारौ यस्य पादे स्त इति शेषः तद् वृत्तं शशिवदना नाम स्यात्।

(२१) उदाहरति शशीति। मधुरिपुः कृष्णः शशिवदनानां चन्द्रमुखीनां व्रजतरुणीनां व्रजयुवतीनां वचनसुधोर्मिं वाक्यामृततरङ्गम् ऐच्छत् इत्यर्थः।

(२२) द्वियेति। द्विया सकारद्वयं यस्य पादे भवति तद् सोमराजी नाम वृत्तं स्यात्।

(२३) उदाहरति हरे इति हे हरे! ते तव सोमानां चन्द्राणां राजीसमा सङ्घसदृशी यशसां श्रीः कीर्तिसम्पदित्यर्थः जगन्मण्डलस्य त्रिजगतः अन्धकारं छिनत्ति नाशयति।

(२४) विद्युल्लेखेति। सोमः मकारद्वयं यस्य पादे भवति तद् विद्युल्लेखा नाम वृत्तं स्यात्।

(२५) न ननगीति। न ननगि नकारद्वयात् परं गुरुवर्णघटिते पादे सतीत्यर्थः मधुमती नाम वृत्तं स्यात्।

Digitized by Google

रविदुहितटटे वनकुसुमततिः।
व्यधित मधुमती मधुमथनमुदम् ॥ (२६)
२। कुमारललिता ज्सगाः ॥ (२७)
मुरारितनुवल्ली कुमारललिता सा।
व्रजैणनयनानां ततान मुदमुच्चैः ॥ (२८)
३। मृसौगः स्यान्मदलेखा ॥ (२९)
रङ्गे बाहुविरुग् णाद्दन्तीन्द्रान्मदलेखा।
लग्नाभून्मुरशत्रौ कस्तूरीरसचर्चा ॥ (३०)

---

(२६) उदाहरति रवीति। रवेः सूर्यस्य या दुहिता कन्या यमुना तस्यास्तटे मधुमती वनकुसुमानां ततिः राजिरित्यर्थः मधुमथनस्य कृष्णस्य मुदं हर्षं व्यधित कृतवतीत्यर्थः।

(२७) कुमारेति। जसगाः जकारसकारगुरुवर्णघटितो यस्य पादो भवति तत् कुमारललिता नाम वृत्तं स्यात्।

(२८) उदाहरति मुरारीति। कुमारेण कौमारेण वयसेत्यर्थः ललिता मनोहारिणीत्यर्थः ललितं त्रिषु सुन्दरमित्यमरः। सा प्रसिद्धेत्यर्थः मुरारेः कृष्णस्य तनुवल्ली देहलता व्रजैणनयनानां व्रजरमणीनाम् उच्चैः अतिमात्रां मुदम् आनन्दं ततान विस्तृतवती चकारेत्यर्थः।

(२९) मृसाविति। मृसौगः यस्य पादो मकारसकारगकारघटितः भवति तत् वृत्तं मदलेखा नाम स्यात्।

(३०) उदाहरति रङ्ग इति रणाङ्गणे बाहुविरुग्णात् भुजनिर्जितात् दन्तीन्द्रात् गजेन्द्रात् कुवलयापीडाख्यादिति भावः मुरारिपौ कृष्णे लग्ना संसक्ता मदरेखा दानवारिरेखा कस्तूरीरसचर्चा मृगमदरसाङ्गरागः अभूत् अत्र प्रतीयमानोत्प्रेक्षालङ्कारः कस्तूरीरसस्य वाक्यार्थत्वात्।

Digitized by Google

अनुष्टुप्॥[२५६]

(अष्टाक्षरा वृत्तिः)

१। चित्रपदा यदि भौ गौ॥(३१)

यामुनसैकतदेशे गोपवधूजलकेलौ।

कंसरिपोर्गतिलीला चित्रपदा जगदव्यात्॥(३२)

२। भात्तलगा माणवकम्॥(३३)

चञ्चलचूड़ं चपलैर्बालकुलैः केलिपरम्।

ध्याय सखे! क्षीरमुखं नन्दसुतं माणवकम्॥(३४)

मो मो गो गो विद्युन्माला॥(३५)

वासोवल्ली विद्युन्माला वर्हश्रेणी शाक्रश्चापः।

यस्मिन् सस्तात् तापोच्छित्त्यै गोमध्यस्थः कृष्णाम्भोदः॥(३६)

---

(३१) चित्रपदेति। यदि भौ भकारद्वयं गौ गुरुद्वयञ्च पादे स्यात् तदा चित्रपदा नाम वृत्तं स्यात्।

(३२) उदाहरति यामुनेति। यामुनसैकतदेशे यमुनापुलिने वृत्त्यर्थः गोपवधूनां जलकेलौ जलक्रीड़ायां कंसरिपोः कृष्णस्य चित्रं मनोज्ञं पदं पदविन्यासो यत्र तादृशी गतिलीला सविलासा गतिरित्यर्थः जगत् अव्यात् रक्षतु।

(३३) भादिति। भात् भकारात् तलगाः तकारो लघुवर्णगुरुवर्णौ च यस्य पादे भवन्ति तत् माणवकं नाम वृत्तं स्यात्।

(३४) उदाहरति चञ्चलेति, हे सखे! चञ्चला चूड़ा यस्य तादृशं चपलैः चञ्चलैः चरद्भिरित्यर्थः बालकुलैः केलिपरं क्रीड़ासक्तं क्षीरमुखं माणवकं बालकं नन्दसुतं कृष्णं ध्याय चिन्तय।

(३५) म इति। यस्य पादे मकारद्वयं गुरुद्वयञ्च भवति तत् विद्युन्माला नाम वृत्तं स्यात्।

(३६) उदाहरति यस्मिन् कृष्णाम्भोदे वासोवल्ली वसनलता

४। ग्लौ रजौ समानिका तु ॥ (३७)

यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म
धीः समानिका परेण नोचितात्र मत्सरेण ॥ (३८)

५। प्रमाणिका जरौ लगौ ॥ (३९)

पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः।
श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ॥ (४०)

पीताम्बरमित्यर्थः विद्युन्माला, वर्हाणां चूडानिहितानां मयूरपिच्छानां श्रेणी शाक्रः ऐन्द्रः चापः धनुः, स गोमध्यं गवां धेनुवत्सानां मध्यं गवोर्भूस्वर्गयोर्मध्यञ्च स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रर्षिभूजले। वज्रदृष्ट्या स्त्रियां पुंसि गौरित्यमरः। तस्मिन् तिष्ठतीति तथोक्तः कृष्णाम्भोदः कृष्णमेघः तापस्य आध्यात्मिकादितापत्रयस्य सन्तापस्य च उच्छित्त्यै उच्छेदाय ध्वंसाय स्तात् भवतु।

(३७) ग्लाविति। यस्य पादे गुरुलघुवर्णौ तदनन्तरं रकार-जकारौ चेत् भवत इति शेषः तदा समानिका नाम वृत्तं स्यात् तच्च पादपूरणार्थमव्ययम्।

(३८) उदाहरति यस्येति। कृष्णस्य पादपद्मं चरणकमलं यस्य हृदयमेव तडागः सरः तदेव सद्म आलयो यस्य तादृशम् अथवा हृदयमेव तडागः सरः तस्य सद्म नीरं व्याप्य तिष्ठतीति शेषः, अत्र जगति तस्य धीः बुद्धिः मत्सरेण विद्वेषिणा परेण अन्येन जनेन समानिका सदृशी न उचिता वक्तुमिति शेषः। सद्म स्यान्मन्दिरे नीरे इति मेदिनिः।

(३९) प्रमाणिकेति। यस्य पादे जकाररकारौ तदनन्तरं लघु-गुरुवर्णौ स्यातां चेत् तदा तत् प्रमाणिका नाम वृत्तं स्यात्।

(४०) उदाहरति पुनात्विति। श्रुतिः वेदः स्मृतिः धर्मसंहिता च प्रमाणं यस्याः तादृशी भवः संसार एव अम्बुराशिः समुद्रः तस्मात् तारिका उद्धारकारिणीत्यर्थः अच्युतस्य कृष्णस्य अङ्घ्रिपद्मयोः चरण-

Digitized by Google

मतल्लिका मचर्चिका प्रकाण्डमुद्धतत्रजौ
प्रशस्तवाचकान्यमून्यथः शुभावहो विधिः ॥ (४१)

इति अमरः।

६। नभलगा गजगतिः ॥ (४२)

रविसुतापरिसरे विहरतो हरेः।
व्रजवधूगजगतिर्मुदमलं व्यतनुत ॥ (४३)
अवतु वो गिरिसुता शशिभृतः प्रियतमा।
वसतु मे हृदि सदा भगवतः पदयुगम् ॥ (४४)

इति कस्यापि।

७। स्रौ गौ हंसरुतमेतत् ॥ (४५)

कमलयोः अच्युता अक्षया सदा सार्वकालिकी भक्तिः पुनातु पवित्रीकरोतु जगदिति शेषः।

(४१) मतल्लिकेति। मतल्लिका मचर्चिका प्रकाण्डम् उद्धतः तल्लजः अमूनि पदानि प्रशस्तवाचकानि। शुभावहः शुभजनकः विधिरनुष्ठानम् अथ उच्यते इति शेषः।

(४२) नभलगा इति। यस्य पादे नकारभकारौ तदनन्तरं लघुगुरवश्चौ भवतां तत् गजगतिः नाम वृत्तं स्यात्।

(४३) उदाहरति रवीति। रविसुतायाः यमुनायाः परिसरे पुलिने इत्यर्थः विहरतः क्रीडतः हरेः कृष्णस्य दृशि नयने व्रजवधूनां गजगतिः गजविलासा गतिरिति भावः अलम् अत्यर्थं मुदम् आनन्दं व्यतनुत अकरोत्।

(४४) अवत्विति शशिभृतः चन्द्रशेखरस्य हरस्य प्रियतमा गिरिसुता पार्वती वः युष्मान् अवतु रक्षतु, तदा भगवतः नारायणस्य पदयुगं मे मम हृदि सदा वसतु।

(४५) स्रौ गाविति। यस्य पादे नकारद्वयं तदनु गुरुद्वयञ्च वर्त्तते इति शेषः एतत् हंसरुतं नाम वृत्तं स्यात्।

Digitized by Google

वृहती ॥ [५१२]

(नवाक्षरा वृत्तिः)

१ । भुजगशिशुभृता नौ मः ॥ (४६)

कृदतटनिकटक्षौणी भुजगशिशुभृता यासीत् ।

सुररिपुदलिते नागे व्रजजनसुखदा साभूत् ॥ (४७)

सृतेत्येवं शम्भुप्रभृतिषु पाठः वृतेत्येवमाधुनिकाः पठन्ति ।

२ । स्यान्मणिमध्यं चेद्भमसाः ॥ (४८)

कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा ।

चित्रपदाभो नन्दसुतश्चारु ननर्त्त क्षेरमुखः ॥ (४९)

---

(४६) भुजगेति । यस्य पादे नकारद्वयं तदन्त्य मकारः स्यात् तत् भुजगशिशुभृता नाम वृत्तं स्यात् ।

(४७) उदाहरति कृदेति । या कृष्णस्य कालियाख्यस्य तटनिकट-क्षौणी तीरसन्निहितभूमिः भुजगस्य कालियस्य शिशुभिः भृता पूरिता अतएव अगम्येति भाव यासीत् सा भूमिः सुररिपुणा कृष्णेन नागे कालिये दलिते पराभूते सति व्रजजनानां गोपानां सुखदा सुखदायिनी सुखमञ्चारेत्यर्थः अभूत् ।

(४८) स्यादिति । चेत् यदि भकारमकारसकाराः प्रतिपादं सुस्तदा मणिमध्यं नाम वृत्तं स्यात् ।

(४९) उदाहरति कालियेति । कालियस्य नागस्य यः भोगः फणः भोगः सुखस्त्रग्रादिभृतावहेश्च फणकायवोरित्यमरः । तस्य आभोगः विस्तारः तद्गतः तत्र स्थित इत्यर्थः तस्य नागस्य यः मणिः फणरत्नं तस्य मध्ये स्फीता या रुक् प्रभा तया चित्रा मनोहारिणी पदयोः आभा दीप्तिर्यस्य तादृशः नन्दसुतः कृष्णः क्षेरम् क्षैरत् क्षुरत् सुखं यस्य तथाभूतः सन् चारु मनोहरं यथा तथा ननर्त्त ।

Digitized by Google

३। सजरैर्भुजङ्गसङ्गता। (५०)
तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता।
कथमेति वत्सचारकस्खपलः सदैव तां हरिः॥ (५१)
४। राजसाविह (हलमुखी)।॥ (५२)
इति छन्दोमञ्जरीपरिशिष्टे।
५। (भद्रिका) भवति रौ नरौ॥ (५३) इति छ० प०।
६। द्विगुण नगणसहितः सगण इह हि विहितः।
क्षितिपतिमतिविमला क्षितिप! भवति (कमला)॥ (५४)
इति छ० प०।

---

(५०) सजरैरिति। सकारजकाररकारैः यस्य पादो भवति तत् भुजङ्गसङ्गता नाम वृत्तं स्यात्।

(५१) उदाहरति तरङ्गेति। यमुना तरङ्गाणां रिङ्गितैः उल्लसैः तरला चञ्चला तथा भुजङ्गेन कालियेन सङ्गता, अतः वत्सचारकः वत्सपालः कृष्णः हरिः कृष्णः सदैव सततमेव तां यमुनां कथम् एति गच्छति?।

(५२) राजेति। इह छन्दसि रात् रकारात् अनन्तरं नकार-सकारौ यस्य पादे स्तः तत् हलमुखी नाम वृत्तं स्यात्।

(५३) भद्रिकेति। यस्य पादे रकारनकाररकाराः स्युः तत् वृत्तं भद्रिका नाम स्यात्।

(५४) द्विगुणेति। हे क्षितिप! राजन्! इह यस्मे द्विगुण-नगणसहितः सगणः नकारनकारसकाराः त्रयो गणा इत्यर्थः विहितः अतः यदीति पादे इति च शेषः तदा क्षितिपतिर्नरराजस्य वा मतिः तद्वत् विमला निर्मला निर्दोषेत्यर्थः कमला नाम वृत्तं भवति।

Digitized by Google

७ । अङ्गोन्माना वर्णा यत्र स्युः सर्वे दीर्घाः सर्पेशेनोक्तम् ।
(रूपामालीसंज्ञं) तद्वृत्तं यस्मिंश्चेतः केषामुद्वृत्तम् ॥ (५५)
इति छ० प० ।

षड्वृत्तिः । [१०२४]
(दशाक्षरा वृत्तिः)

१ । रुक्मवती सा यत्र भमस्गाः ॥ (५६)
कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसद्विषि भक्तिः ।
राज्यपदे हर्म्यालिरुदारा रुक्मवती विघ्नः खलु तस्य ॥ (५७)
रूपवतीयं क्वचित् क्वचित् चम्पकमाला च ।
२ । श्रेया मत्ता मभसगसृष्टा ॥ (५८)

---

(५५) अङ्गोन्माना इति । यत्र वृत्ते सर्वे अङ्गोन्मानाः अङ्गपरिमिता अवेत्यर्थः दीर्घा वर्णाः स्युः पादे इति शेषः । तत् रूपामालीसंज्ञं वृत्तं सर्पेशेन नागराजेन उक्तं यस्मिन् वृत्ते केषां केषाञ्चित् पण्डितानामित्यर्थः चेतः चित्तम् उद्वृत्तम् अधिकरञ्जनत्वेन अभिनिविष्टमित्यर्थः केऽपि पण्डिताः उद्वृत्तमधिकमाद्रियन्ते इति भावः ।

(५६) रुक्मवतीति । यत्र वृत्ते भमसगाः भकारमकारसकारेभ्यः परम् एको गुरुः पादे इति शेषः भवति तत् रुक्मवती नाम वृत्तं स्यात् ।

(५७) उदाहरति कायेति । यस्य परिशुद्धैः कायमनोवाक्यैः कंसद्विषि कृष्णे सदा भक्तिः, तस्य राज्यपदे राज्यमध्ये उदारा महती रुक्मवती काञ्चनमयीत्यर्थः हर्म्यालिः अट्टश्रेणी विघ्नः खलु अन्तराय एव ।

(५८) श्रेयेति । मभसगसृष्टा प्रतिपादं मकारभकारसकारेभ्यः परं गुरुवर्णेन सृष्टा रचिता वा सा मत्ता नाम वृत्तं श्रेया ।

Digitized by Google

पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे।
उद्दीव्यन्तीर्व्रजजनरामाः कामासक्ता मधुजिति चक्रे॥ (५९)

३। त्वरितगतिश्च नजनगैः॥ (६०)

त्वरितगतिर्व्रजयुवतिस्तरणिसुता विपिनगता
मुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता॥ (६१)
क्षितिविजिति स्थितिविहितिव्रततयः परगतयः।
उरु रुरुधुर्गुरु दुधुवुर्युधि कुरवः स्वमरिकुलम्॥ (६२)

इति दण्डिनि॥

---

(५९) उदाहरति पीत्वेति। कालिन्दीये यामुने तटवनकुञ्जे तीरस्थ काननिकुञ्जे मधुपानां भ्रमराणाम् आलो श्रेणिः मधु मद्यं पीत्वा मत्ता अतएव उद्दीव्यन्तीः उच्चैरतिशयेन क्रीडन्तीरित्यर्थः व्रजजनानां व्रजवासिनां रामाः कान्ताः गोपीरित्यर्थः मधुजिति कृष्णे कामासक्ताः कामरताः चक्रे कृतवती।

(६०) त्वरितगतिरिति। नजनगैः नकारजकारनकारेभ्यः परं गुरुणैकेन वर्णेन प्रतिपादमिति शेषः निर्मितेति च शेषः त्वरितगतिर्नाम वृत्तं स्यात्।

(६१) उदाहरति त्वरितेति। त्वरिता त्वरान्विता गतिर्यस्याः सात्वरगतिः औत्सुक्यादिति भावः व्रजयुवतिः व्रजाङ्गना तरणिसुतायाः यमुनायाः विपिनं वनं गता रतिगुरुणा सुरताचार्येण मुररिपुणा कृष्णेन सह परिरमिता सङ्गता सती प्रमदम् आनन्दम् इता प्राप्ता।

(६२) क्षितीति। क्षितेः पृथिव्या विजितिः विजयः तया या स्थितिः मर्यादा तया विहितिर्विधानं स्थापनं तदेव यत् व्रतं नियमः तत्र रतिरनुरागो येषां तथाभूता दुष्टदमनशिष्टपालनरता इत्यर्थः तथा परा श्रेष्ठा गतिः दशा येषां तथाविधाः कुरवः कुरुवंशीयाः युधिष्ठिरादय इत्यर्थः युधि युद्धे स्वम् अरिकुलं शत्रुवर्गम् उरु अत्यर्थं यथा तथा रुरुधुः अवरुद्धवन्तः तथा गुरु अत्यन्तं दुधुवुः कम्पयामासुः।

Digitized by Google

४ । नरजगैर्भवेन्मनोरमा ॥ (६१)

तरणिजातटे विहारिणी व्रजविलासिनीविलासतः ।
मुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥ (६४)

५ । म्सौज्गौ (शुद्धविराड्इदं) मतम् ॥ (६५) इति छ०प०।

६ । न्यौग्गौ चेति (पणव) नामेदम् ॥ (६६) इति छ०प०।

७ । जौ रगौ (मयूरसारिणी) स्यात् ॥ (६७) इति छ०प०।

८ । तो जौ गुरुणेय (मुपस्थिता) ॥ (६८) इति छन्दो०प०।

९ । (दीपकमाला)भ्मौ मता जगौ ॥ (६९) इति छ०प०।

---

(६३) नरजगैरिति । नरजगैः नकाररकारजकारगणैः गुरुवर्णैकसहितैः यस्य पादः स्यादिति शेषः तत् मनोरमा नाम वृत्तं स्यात् ।

(६४) उदाहरति तरणीति । तरणिजाया यमुनायास्तटे इत्यर्थः व्रजविलासिनीनां विलासतः विलासेन विहारिणी सुकृतिनां पुण्यवतां मनोरमा मनोमोहिनी मुररिपोः कृष्णस्य तनुः शरीरं वः युष्मान् पुनातु पवित्रीकरोतु ।

(६५) म्सौ इति । मकारसकारजकारा गणा गुरुवैकः यस्य पादे स्यात् तदिदं शुद्धविराट् नाम वृत्तं मतम् ।

(६६) न्यौ इति । नकारनकारयकारा गणा गुरुवर्णवैकः यस्य पादे स्यात् तत् इदं पणव नाम वृत्तम् ।

(६७) जाविति । जकारद्वयं रकारो गुरुवैकः यस्य पादे भवति, तत् मयूरसारिणी नाम वृत्तं स्यात् ।

(६८) तो जाविति । तकारो जकारद्वयं गुरुवैकः यस्य पादे भवति इयम् उपस्थिता नाम वृत्तं स्यात् ।

(६९) दीपकमालेति । भकारमकारजकारा गुरुवैकः यस्य पादे भवति तत् दीपकमाला नाम वृत्तं स्यात् ।

Digitized by Google

१०। श्येया (हंसी) मभनगयुता ॥ (७०) इति छन्दो०प०।

त्रिष्टुप्। (२०४८)

(एकादशाक्षरा वृत्तिर्यथा)

१। स्यादिन्द्रवज्रा यदि तौ ज गौ गः ॥ (७१)
गोष्ठे गिरिं सव्यकरेण धृत्वा।
कृष्टेन्द्रवज्राहतिमुक्तवृष्टौ ॥
यो गोकुलं गोपकुलञ्च सख्यं
चक्रे स नो रक्षतु चक्रपाणिः ॥ (७२)

२। उपेन्द्रवज्रा प्रथमे लघौ सा ॥ (७३)

---

(७०) श्येयेति। मभनगयुता यस्य पादे मकारभकारनकारास्तद-नन्तरं गुरवश्च, सा हंसी नाम वृत्तं श्येया।

(७१) स्यादिति। यदि तकारद्वयं ततो जकारः ततश्च गुरुद्वयं भवति प्रतिपादमिति श्येयः तदा इन्द्रवज्रा नाम वृत्तं स्यात्।

(७२) उदाहरति गोष्ठे इति। यः गोष्ठे कृष्टेन कृष्णेन इन्द्रेण वज्राहत्या वज्राघातेन सह मुक्ता या वृष्टिः वर्षं तस्यां सत्यां सव्य-करेण वामहस्तेन गिरिं गोवर्द्धनमित्यर्थः धृत्वा गोकुलं नवां समूहं गोपकुलं गोपानां समूहञ्च सख्यं निरापदमित्यर्थः चक्रे कृतवान् स चक्रपाणिः कृष्णः नः अस्मान् रक्षतु। पुरा वृष्ट्यर्थिनो गोपाः प्रत्य-ब्दमु इन्द्रोत्सवं कुर्वन्ति स्म। परं कृष्णवचनात् तमकृत्वा गोवर्द्धनयात्रायां कृतायां देवराजोऽतिक्रुद्धः सप्ताहं सकृता वृष्टिपातेन गोकुलं प्लावयाम्-बभूव। तदवलोक्य कृष्णो गोवर्द्धनधरणेन गोकुलं रक्षेति गाथा।

(७३) उपेन्द्रेति। प्रथमे वर्णे इति श्येयः लघौ सतीत्यर्थः ततश्च जकारतकारजकारा गणास्तद्वत गुरुद्वयञ्चेत् तदा उपेन्द्रवज्रा नाम वृत्तं स्यात्।

Digitized by Google

उपेन्द्र ! वज्रादिमणिच्छटाभि-
र्विभूषणानां छुरितं वपुस्ते ।
स्मरामि गोपीभिरुपास्यमानं
सुरद्रुमूले मणिमण्डपस्थम् ॥ (७४)

३ । अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ॥
इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ॥ (७५) (१४ भेदः)

ममवाच्युतचरिते यथा—

काचिन्मुरारेर्वदनारविन्दं
संक्रान्तमालोक्य जले नवोढ़ा ।

---

(७४) उदाहरति उपेन्द्रेति । हे उपेन्द्र ! कृष्ण ! सुरद्रुमूले देवतरुतले मणिनिर्मितं यत् मण्डपं मन्दिरं तत्र तिष्ठतीति तथोक्तं विभूषणानाम् अलङ्काराणां वज्रं हीरकम् आदि येषां तथोक्तानां मणीनां रत्नानां विभूषणस्थानामिति भावः छटाभिः प्रभाभिः छुरितं रञ्जितं तथा गोपीभिः उपास्यमानं सेव्यमानं ते तव वपुः शरीरं स्मरामि ।

(७५) अनन्तरोदीरितेति । यदीयौ यस्य वृत्तस्य सम्बन्धिनौ पादौ चरणौ यमू अनन्तरम् उदीरितयोरुक्तयोः इन्द्रवज्रोपेन्द्रवज्रयोरित्यर्थः लक्ष्मभाजौ लक्षणाक्रान्तौ तौ उपजातयः नाम वृत्तानि । अन्यासु अपि मिश्रितासु उभयलक्षणयुक्तास्वित्यर्थः जातिषु वृत्तिषु इदमेव उपजातिरित्येव नाम । उपजातिनाम्ना ता जातयो व्यवहियन्ते इति भावः ।

(७६) उदाहरति काचिदिति । काचित् नवोढ़ा कान्ता मुरारेः कृष्णस्य वदनारविन्दं मुखकमलं जले संक्रान्तं प्रति-

Digitized by Google

व्यक्तं सलज्जा परिचुम्बितुं तत्
तदर्थमेवाब्जसि निर्ममज्ज ॥ (७६)
मुखारविन्दैर्व्रजसुन्दरीणाम्
आमोदमत्युत्कटमुद्गिरद्भिः ।
अहारि चित्तेन समं मुरारे-
र्हैमाम्बुजेभ्योऽपि मधुव्रतौघः (७७)
तोयेषु तस्याः प्रतिविम्बितासु
व्रजाङ्गनानां नयनावलीषु ।
स्वबन्धुपङ्क्तिभ्रमतोऽतिमुग्धा
गोष्ठीं शफर्य्यो रचयाम्बभूवुः ॥ (७८ ॥

विम्बितम् आलोक्य व्यक्तं प्रकाशं तत् सुखकमलं परिचुम्बितुं सलज्जा लज्जमाना तदर्थमेव तन्मुम्बनार्थमेव अब्जसि जले निर्ममज्ज निमग्नवती। अत्र पादत्रये इन्द्रवज्रालक्षणं चतुर्थे तु पादे उपेन्द्रवज्रालक्षणं द्रष्टव्यम् ।

(७७) मुखारविन्दैरिति । अत्युत्कटम् अतिसनोहारि आमोदं सौरभम् उद्गिरद्भिः उद्वमद्भिः व्रजसुन्दरीणां मुखारविन्दैः वदनकमलैः हैमाम्बुजेभ्यः स्वर्णपद्मेभ्यः अपि तत्र सौरभाभावादिति भावः मधुव्रतानां भ्रमराणां ओघः सङ्घः मुरारेः कृष्णस्य चित्तेन मनसा समम् अहारि कृतः आकृष्ट इत्यर्थः व्रजाङ्गनामुखानि दृष्ट्वा पद्मभ्रान्त्या भ्रमरा यथा आकृष्टा आसन् तथैव आकृष्टोऽभूदिति फलितार्थः। अत्र प्रथमे तृतीये च उपेन्द्रवज्रालक्षणं द्वितीये चतुर्थे तु इन्द्रवज्रालक्षणमिति द्रष्टव्यम् ।

(७८) तोयेष्विति । तस्या यशोदायाः तोयेषु सलिलेषु व्रजाङ्गनानां जलविहारिणीनामिति भावः नयनावलीषु नेत्रपङ्क्तिषु प्रतिविम्बितासु सतीषु अतिमुग्धाः अतिसरलाः अज्ञा इति यावत् शफर्यः

तथा ममैव गोपालशतके, —

वनेषु कृत्वा सुरभिप्रचारं
प्रकाममुग्धो मधुवासरेषु ।
गायन् कलं क्रीड़ति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ ॥ (७९)

एवमनयोर्नानाविधा अप्युपजातयो बोद्धव्याः ।

तथा वंशस्थविलेन्द्रवंशयोरित्यमुदाहार्य्यम् ॥

इत्थं रथाङ्गेभनिषादिनां प्रगे
गणो नृपाणामथ तोरणाद्बहिः ।
प्रस्थानकालोचितवेशकल्पना-
कृतक्षणक्षेपमुदैक्षताच्युतम् ॥(८०) इति माघे ।

तदाख्य क्षुद्रजन्त्वविशेषाः खलभूनां खजातीयानामित्यर्थः वा पद्मिनः श्रेणो तत्र यो भ्रमः नयनेषु शफरीभ्रान्तिरित्यर्थः तस्मात् तेन वा गोष्ठीं सभां रचयाम्बभूवुः बहवः समेता इति भावः । अत्र प्रथमे चतुर्थे च इन्द्रवज्रालक्षणं द्वितीये तृतीये तु उपेन्द्रवज्रालक्षणं द्रष्टव्यमिति ।

(७९) वनेष्विति । मधुवासरेषु वसन्तदिवसेषु प्रकामम् अतिमात्रं यथा तथा मुग्धः सुन्दरः मोहनमूर्त्तिरिति भावः असौ मधुसूदनः कृष्णः वनेषु सुरभिप्रचारं गोचारणं कृत्वा पद्मिनीषु कमलिनीषु तदाख्य कामिनीविशेषेषु च मधूनि एकत्र पौष्पाणि अन्यत्र अधरामृतानि पीत्वा कलं मधुरं गायन् क्रीड़ति विहरति । अत्र प्रथमद्वितीयचतुर्थपादेषु उपेन्द्रवज्रालक्षणं तृतीये तु इन्द्रवज्रालक्षणम् ।

(८०) इत्थमिति । इत्थम् एवंविधे प्रगे प्रातःकाले सायं सायं प्रगे प्रातरित्यमरः । अथ सूर्योदयानन्तरं रथाङ्गेभनिषादिनां रथिनां गजादिनां कृष्णारोहिणामित्यर्थः नृपाणां राज्ञां गणः तोरणात्

४। न ज ज ल गै र्गदिता सुमुखी। (८१)
तरणिसुतातटकुञ्जगृहे वदनविधुस्मितदीधितिभिः।
तिमिरमुदस्य मुखं सुमुखी हरिमवलोक्य चुचुम्ब चिरम्॥(८२)

५। मात्तौ गौ चेच्छालिनी वेदलोकैः॥ (८३)
अंहो हन्ति ध्यानवृद्धिं विधत्ते
धर्म्मं धत्ते काममर्थञ्च सूते।
मुक्तिं दत्ते सर्वदोपास्यमाना
पुंसां श्रद्धाशालिनी विष्णुभक्तिः॥ (८४)

बहिर्द्वारात् बहिः तोरणोऽसौ बहिर्द्वारमित्यमरः। प्रस्थानकालस्य प्रयाणकालस्य क्षमः योग्यः यः वेशः परिच्छदः तस्य कलनया रचनया ज्ञातः अवक्षेपः कालविलम्बः येन तादृशम् अच्युतं कृष्णम् उदैक्षत प्रतीक्षाञ्चक्रे इत्यर्थः। अत्र प्रथमद्वितीययोरिन्द्रवंशालक्षणं द्वितीयचतुर्थयोस्तु वंशस्थवृत्तलक्षणं द्रष्टव्यम्।

(८१) नजेति। नजजलगैः नकारजकारजकारेभ्यः परं लघुरेकः गुरुश्चैकः यस्य पादे भवति तत् वृत्तं सुमुखी नाम गदिता उक्ता।

(८२) उदाहरति तरणिसुतेति। तरणिसुतायाः यमुनायाः तटे यत् कुञ्जं तदेव गृहं तस्मिन् काचित् सुमुखी रमणी वदनमेव विधुचन्द्रः तस्य स्मितान्येव दीधितयः किरणाः तैः तिमिरं अन्धकारं निरस्य निराकृत्य हरिं कृष्णम् अवलोक्य तस्य अन्धकारैरलक्षितमिति भावः चिरं चुचुम्ब चुम्बितवती।

(८३) मेति। यदि मगणात् अनन्तरं तगणद्वयं गुरुद्वयञ्च वेत् भवति तदा शालिनी नाम वृत्तं स्यात् तत्र वेदे चतुर्थवर्णे तद्वत् लोके सप्तमे च वर्णे यतिर्भवतीत्यर्थः।

(८४) उदाहरति अंहो इति। सर्वदा सर्वस्मिन् काले उपास्यमाना क्रियमाणेत्यर्थः पुंसां श्रद्धान्विता सविश्वासेत्यर्थः

६ । वातोर्मीयं गदिता श्री त गी मः ॥ (८५)
ध्याता मूर्त्तिः क्षणमप्यच्युतस्य
श्रेणी नाम्नां गदिता हेलयापि ।
संसारेऽस्मिन् दुरितं हन्ति पुसां
वातोर्मी पोतमिवाम्भोधिमध्ये ॥ (८६)

७ । मो गो नौ गो भ्रमरविलसिता ॥ (८७)
भ्रमरविलसितं क्वापि ।
मुग्धे ! मानं परिहर न चिरात्
तारुण्यन्ते सफलयतु हरिः ।
फुल्ला वल्ली भ्रमरविलसिता-
भावे शोभां कलयति किमु ताम् ॥ (८८)

विष्णौ भक्तिः अनुरागः अंहः पापं हन्ति नाशयति, ज्ञानवृद्धिं विधत्ते करोति धर्मं धत्ते जनयति, काम्यते इति कामः सुखं तस्य अर्थश्च सुखसाधनमिति श्रेयः सूते जनयति मुक्तिं दत्ते ददाति च ।

(८५) वातोर्मीयमिति । मगणमगणतगणेभ्यः परं गुरुद्वयं यस्य पादे स्यात् इयं वातोर्मी नाम वृत्तं गदिता उक्ता ।

(८६) उदाहरति ध्यातेति । अम्भोधिमध्ये समुद्रमध्ये वातोर्मी सवाततरङ्ग इत्यर्थः पोतमर्णवयानमिव क्षणमपि ध्याता चिन्तिता अच्युतस्य कृष्णस्य मूर्त्तिः, हेलयापि अवज्ञयापीत्यर्थः गदिता उच्चारिता नाम्नां श्रेणी चेति अध्याहार्यम् अस्मिन् संसारे पुंसां दुरितं पापं हन्ति नाशयति ।

(८७) म इति । यस्य पादे मगणात् परं गुरुवर्णः, तदन्तु मकारो गुरुश्च भवति तत् भ्रमरविलसिता भ्रमरविलसितं वा नाम वृत्तं स्यात् ।

(८८) उदाहरति मुग्धे इति । हे मुग्धे ! मूढे ! राधे इति

Digitized by Google

८। स्यादनुकूला भ त न ग गावेत् ॥ (८९)

वल्लववेशा मुररिपुमूर्त्तिर्गोपमृगाक्षीकृतरतिपूर्त्तिः।
वाञ्छितसिद्धै प्रणतिपरस्य स्यादनुकूला जगति न कस्य (९०)

९। रात्परैर्नरलगैरथोद्धता ॥ (९१)

राधिका दधिविलोड़नस्थिता
कृष्णवेणुनिनदैरथोद्धता।
यामुनं तटनिकुञ्जमञ्जसा
सा जगाम सलिलाहृतिच्छलात् ॥ (९२)

शेषः न चिरात् शीघ्रं मानं कोपं परिहर त्यज, हरिः कृष्णः ते तव तारुण्यं यौवनं सफलवत् कृतार्थं करोतु। फुल्ला विकसिता वल्ली लता भ्रमरविलसितानां मधुकरविलासानाम् अभावे तां तथाविधां शोभां कलयति प्राप्नोति किम् ? नैव प्राप्नोतीत्यर्थः।

(८९) स्यादिति। चेत् यदि पादे भतनगणेभ्यः परं गुरुद्वयं भवति तदा अनुकूला नाम वृत्तं स्यात्।

(९०) उदाहरति वल्लवेति। वल्लववेशा गोपवेशा गोपानां मृगाक्षीभिः कान्ताभिः कृता रतिपूर्तिः क्रीड़ातिशयो यया तथाविधा मुररिपोः कृष्णस्य मूर्त्तिः अनुकूला सदया सती जगति प्रणतिपरस्य प्रणतस्य कस्य जनस्य वाञ्छितसिद्धै अभीष्टसाधनाय न स्यात्, सर्वस्यैव स्यादित्यर्थः।

(९१) रादिति। रात् रगणात् परैः अनन्तरवर्तिभिः नरलगैः नगणरगणलघुगुरुभिः प्रतिपादं स्थितैरिति शेषः रथोद्धता नाम वृत्तं स्यात्। केचिदत्र अनन्तरम् उद्धता नाम वृत्तं स्यादित्याहुः।

(९२) उदाहरति दधिविलोड़नस्थिता दधि विलोड़यन्तीत्यर्थः सा राधिका अथ कृष्णस्य वेणुनिनदैः वंशीरवैः उद्धता अधीरा सती अञ्जसा झटिति सलिलाहृतिच्छलात् जलानयनव्याजेन यामुनं यमुनासम्बन्धि तटनिकुञ्जं जगाम।

Digitized by Google

१० । स्वागता र न भ गै र्गुरुणाच ॥ (९३)
यस्य चेतसि सदा मुरवैरी वल्लवीजनविलासविलोलः ।
तस्य नूनममरालयभाजः स्वागतादरकरःसुरराजः ॥ (९४)
११ । दोधकमिच्छति भत्रितयाद्यौ ॥ (९५)
देव ! सदोध कदम्बतलस्थ ! श्रीधर ! तावकनामपदं मे ।
कण्ठतलेऽसुविनिर्गमकाले स्वल्पमपि क्षणमेषति योगम्॥(९६)
१२ । स्यान्मोटनकं त ज जास्त ल गौ ॥ (९७)

---

(९३) स्वागतेति । यस्य पादे रगणनगणभगणेभ्यः परं गुरुद्वयं तत् स्वागता नाम वृत्तं स्यात् ।

(९४) उदाहरति यस्येति । वल्लवीजनानां गोपाङ्गनानां विलासे विहारे विलोलः चपलः मुरवैरी कृष्णः यस्य चेतसि मनसि सदा सततं वर्त्तते इति शेषः नूनं निश्चितं सुरराजः इन्द्रः अमरालय-भाजः स्वर्गगतस्य तस्य जनस्य स्वागतेन आदृयते इति स्वागतादरः करो यस्य तथाभूतः भवतीति शेषः देवराजस्तं कृष्णभक्तं जनं स्वर्गगतं स्वागतप्रश्नेनादृयते इत्यर्थः ।

(९५) दोधकमिति । यस्य पादे भत्रितयात् भगणत्रयात् गौ गुरुद्वयं भवतः, तत् वृत्तं दोधकं नाम वृत्तमिति बुध इति शेषः ।

(९६) उदाहरति देवेति । हे सदोध सपत्न देव ! यस्याः गजत् करिदैत्यो दोधको दोध इत्यपीति शब्दरत्नावली । हे कदम्बतलस्थ श्रीधर ! तावकनामपदं तव कृष्णेति नाम इत्यर्थः मे मम असुविनि-र्गमकाले प्राणप्रयाणसमये स्वल्पं क्षणमपि कण्ठतले योगम् एष्यति प्राप्स्यति ? ।

(९७) स्यादिति । यस्य पादे तजजाः मगणाः तदन्त्य लघुरेकः गुरुश्चैकः, तत् मोटनकं नाम वृत्तं स्यात् ।

Digitized by Google

रङ्गे खलु मल्लकलाकुशलचाणूरमहाभटमोटनकम्।
यः केलिलवेन चकार स मे संसाररिपुं परिमोटयतु ॥(९८)
१३। श्येन्यु दीरिता र जौ रलौ गुरुः ॥ (९९)
यस्य कीर्त्तिरिन्दुकुन्दचन्दनश्रेन्यश्रेषलोकपावनी सदा।
जाह्नवीव विश्ववन्द्यविभ्रमा तं भजामि भावगम्यमच्युतम् (१००)
१४। नन सग गुरु रचिता (वृत्ता) ॥ (१०१) इति छ०प०।
१५। नन रलगुरुभिश्च (भद्रिका) ॥ (१०२) इति छ०प०।
१६। (उपस्थित) मिदं जसौ तारकारी ॥ (१०३) इति छ०प०

---

(९८) उदाहरति रङ्गे इति। रङ्गे युद्धे मल्लस्य कला क्रीड़ा मल्लकला बाहुयुद्धमित्यर्थः तत्र कुशलः निपुणः यः कृष्णः केलिलवेन अवलीलया चाणूरो नाम कश्चित् कंसचरः, स एव महाभटः महावीरः तस्य मोटनकं विनाशं चकार, स कृष्णः मे मम संसार एव रिपुः तं परिमोटयतु नाशयतु।

(९९) श्येनीति। यस्य पादे रजौ रगणजगणौ ततः रजौ रगणौ लघुश्च तदन्तु गुरुरेकश्च भवति तत् वृत्तं श्येनी नाम उदीरिता उक्ता।

(१००) उदाहरति यस्येति। यस्य अच्युतस्य कीर्त्तिः जाह्नवीव गङ्गेव इन्दुचन्द्रः कुन्दं माध्यपुष्पविशेषः चन्दनञ्च तद्वत् श्येनी युक्ता सदा अश्रेषलोकपावनी सर्वलोकपवित्रकारिणी तथा विश्वैर्जगद्भिः वन्द्याः विभ्रमः विलासः यस्यास्तादृशी, तं भावगम्यं भक्तिलभ्यम् अच्युतं कृष्णं भजामि।

(१०१) ननेति। यस्य पादे नगणद्वयं ततः सगणः तदन्तु गुरुद्वयं भवति तत् वृत्तं वृत्ता नाम रचिता कथिता।

(१०२) ननेति। यस्य पादे नद्वयं ततो रकारः तदन्तु लघुगुरुवर्णौ भवतः तत् भद्रिका नाम वृत्तं स्यात्।

(१०३) उपस्थितमिति जगणसगणतगणाः ततो गुरुद्वयञ्चेत्

Digitized by Google

(शिखण्डित) मिदं ज्सौ त्गौ गुरुश्चेत् ॥ इति छ०प०
१७ । (उपचित्र) मिदं ससमाद्रगौ ॥ (१०४) इति छ० प०।
१८ । (कुपुरुषजनिता) ननौ गौंगः ॥ (१०५) इति छ० प०।
१९ । (अनवसिता) न्यौ भ्गौ गुरुरन्ते ॥ (१०६) इति छ०प०
२० । (विध्वङ्कमाला) भवेत्तौ तगौ गः ॥ (१०७) इति छ०प०
२१ । (सान्द्रपदं) स्याद्भतनगलैश्च ॥ (१०८) इति छ० प०।

जगती । [४०९६]
(द्वादशाक्षरा वृत्तिः)
१ । चन्द्रवर्त्म निगदन्ति र न भ सैः ॥ (१०९)

तदा इदं वृत्तम् उपस्थितं नाम स्यात् । केचित् शिखण्डितमिदं वदन्ति ।

(१०४) उपचित्रमिति । यस्य पादे सगणत्रयं ततो लघुर्गुरुश्चैकः, इदम् उपचित्रं नाम वृत्तम् ।

(१०५) कुपुरुषेति । यस्य पादे नगणद्वयं ततो रकारः तदन्तु गुरुद्वयं, सा कुपुरुषजनिता नाम वृत्तम् ।

(१०६) अनवसितेति । यस्य पादे नकारयकारभकारगणेभ्यः परं गुरुद्वयं, सा अनवसिता नाम वृत्तं स्यात् ।

(१०७) विध्वङ्कमालेति । यस्य पादे तगणत्रयं ततो गुरुद्वयं भवति, सा विध्वङ्कमाला नाम वृत्तं स्यात् ।

(१०८) सान्द्रपदमिति । यस्य पादे भतनगणेभ्यः परं गुरुरेको-लघुश्चैकः भवति, तत् वृत्तं सान्द्रपदं नाम स्यात् ।

(१०९) चन्द्रवर्त्मेति । रनभसैः गणैः यस्य पादो भवति तत् चन्द्रवर्त्म नाम वृत्तं निगदन्ति ।

Digitized by Google

चन्द्रवर्त्म पिहितं घनतिमिरैः
राजवर्त्म रहितं जनगमनैः ।
इष्टवर्त्म तदलंकुरु सरसे !
कृष्णवर्त्मनि ! हरिस्तव कुतुकी ॥ (११०)
२। वदन्ति वंशस्थविलं ज तौ जरौ ॥ (१११)
विलासवंशस्थविलं मुखानिलैः
प्रपूर्य्य यः पञ्चमरागमुद्गिरन् ।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु नः ॥ (११२)
वंशस्तनितमिति क्वापि ।

---

(११०) उदाहरति चन्द्रवर्त्मेति । हे सरसे रसवति राधे ! घनतिमिरैः गाढान्धकारैः चन्द्रस्य वर्त्म पन्थाः पिहितमावृतं जनानां गमनैः राजवर्त्म राजपथः जनगमनैः रहितं सामान्यं जना राजपथं न गच्छन्तीति भावः, तत् तस्मात् इष्टस्य प्रियस्य वर्त्म पन्थानं येन प्रियः प्रस्थितः तदित्यर्थः अलङ्कुरु शोभय सजत्येति शेषः यतः हरिः कृष्णः कृष्णवर्त्मनि कृष्णमार्गे कुतुकी औत्सुक्यवानित्यर्थः सन् तिष्ठतीति शेषः ।

(१११) वदन्तीति । यस्य पादे जतौ जगणतगणौ जरौ जगणरगणौ च स्यातां तत् वंशस्थविलं नाम वृत्तं स्यात् ।

(११२) उदाहरति विलासेति । यः मुखानिलैः वदनवायुभिः विलासवंशे क्रीडावेणौ तिष्ठतीति तथोक्तं विलं छिद्रं प्रपूर्य्य वेणुमाध्मायेत्यर्थः पञ्चमरागमुद्गिरन् व्रजाङ्गनानां गोपीनां गानशालिनां गायकानामपि अन्येषामिति शेषः मानं गोपम् अहङ्कारञ्च जहार हृतवान् स हरिः कृष्णः नः अस्मान् पुनातु पवित्रीकरोतु ।

Digitized by Google

३ । तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ ॥ (११३)
दैत्येन्द्रवंशाग्निरुदीर्णदीधितिः
पीताम्बरोऽसौ जगतां तमोपहः ।
यस्मिन्ममज्जुः प्रलभा इव स्वयं
ते कंसचाणूरमुखा मखद्विषः ॥ (११४)
४ । ज सौ जसयुतौ जलोद्धतगतिः ॥ (११५)
यदीयहलतो विलोक्य विपदं
कलिन्दतनया जलोद्धतगतिः ।
विलासविपिनं विवेश सहसा
करोतु कुशलं हली स जगताम् ॥ (११६)

---

(११३) तच्चेन्द्रेति । प्रथमाक्षरे गुरौ सति पादे ततजरगखेषु सत्सु इति भावः तदु वृत्तम् इन्द्रवंशा नाम स्यात् ।

(११४) उदाहरति दैत्येन्द्रेति । असौ पीताम्बरः कृष्णः उदीर्णा उद्दीप्ता दीधितयः किरणाः देहप्रभाः प्रतापा वा यस्य तथोक्तः दैत्येन्द्राणां वंशे अग्निः अनलरूप इत्यर्थः अतएव जगतां तमोपहः तिमिरनाशकः एकत्र देहप्रभया अन्यत्र दैत्यध्वंसिप्रतापेनेति भावः । यस्मिन् पीताम्बरे अग्नौ इव प्रसिद्धाः कंसचाणूरसखाः कंसचाणूरप्रभृतयः मखद्विषः यज्ञविघातकाः असुरा इत्यर्थः प्रलभा इव पतङ्गा इव स्वयं ममज्जुः निमग्ना बभूवुः ।

(११५) जसाविति । यस्य पादे जसयुतौ जसौ जगणसगणौ पुनश्च जगणसगणौ स्तः, तदु वृत्तं जलोद्धतगतिर्नाम स्यात् ।

(११६) उदाहरति यदीयेति । यदीयहलतः यस्य हलात् विपदं विलोक्य विविच्येत्यर्थः कलिन्दस्य सूर्यस्य तनया यमुनेत्यर्थः जलैः उद्धता गतिः यस्यास्तादृशी सती सहसा विलासविपिनं क्रीड़ावनं विवेश, स हली हलधरः बलदेव इत्यर्थः जगतां कुशलं मङ्ग

Digitized by Google

सनाकवनितं नितम्बरुचिरं
चिरं सुनिनदैर्नदैर्हृतमसुम्।
मता फणवतोऽवती रसपरा
परास्तवसुधा सुधाधिवसति॥ (११७) इति भारवी॥

५। भुजङ्गप्रयातं चतुर्भिर्यकारैः (११८)
सदारात्मजज्ञातिभृत्यो विहाय
खमेतं ह्रदं जीवनं लिप्समानः।
मया क्लेशितः कालियेत्थं कुरु त्वं
भुजङ्ग! प्रयातं द्रुतं सागराय॥ (११९)

करोत्। कदाचित् मधुपानमत्तः बलदेवः गोपाङ्गनाभिर्जलक्रीडां कुर्वन् वरुणानाहूतवान्। सा तु कृष्णेनाकर्षणभयात् तस्य विलासकाननमगमदिति भागवतम्।

(११७) सनाकेति। सनाकवनितं नाकवनिताभिः सुरनारीभिः सह वर्त्तमानं सुरनार्य्योऽत्र वसन्तीति भावः नितम्बैः कटकैः कटकोऽस्त्री नितम्बोऽद्रेरित्यमरः। रुचिरं मनोहरं सुनिनदैः शोभनस्वनैः नदैः जलप्रवाहैः हृतम् अतं गिरिं रसपरा अतिसुरसेत्यर्थः परास्तवसुधा त्यक्तभूभोगा अवतः रक्षकस्य फणवतः नागराजस्य मता दृष्टा सुधा अधिवसति अधितिष्ठति।

(११८) भुजङ्गेति। चतुर्भिः यकारैः यगणैः यस्य पादो भवतीति शेषः, तद् भुजङ्गप्रयातं नाम वृत्तं स्यात्।

(११९) उदाहरति सदेति। कृष्णस्य कालियं प्रत्युक्तिः। हे कालियभुजङ्ग! त्वं मया इत्थम् अनेन प्रकारेण क्लेशितः क्लेशं प्रापितः निर्जित इत्यर्थः। अतः जीवनं जिघृक्षमाणः रक्षितुमिच्छन् यदीति शेषः तदा दारा भार्य्याः आत्मजाः पुत्राः ज्ञातयः स्वजनाः भृत्या दासाश्च तैः सहितः त्वं स्वकीयम् एतं ह्रदं कालियाख्यमिति भावः विहाय परित्यज्य द्रुतं शीघ्रं सागराय प्रयातं प्रस्थानं कुरु।

Digitized by Google

६ । वद तोटकमब्धिसकारयुतम् ॥ (१२०)
यमुनातट मच्युतकेलिकला
लसदङ्घ्रि सरोरुहसङ्गरुचिम् ।
मुदितोऽट कलेरपनेतुमघं
यदि चेच्छसि जन्म निजं सफलम् ॥ (१२१)

७ । कीर्त्तितैषा चतूरेफिका स्रग्विणी ॥ (१२२)
इन्द्रनीलोपलेनेव या निर्म्मिता
शातकुम्भद्रवालङ्कृता शोभते ।
नव्यमेघच्छविः पीतवासा हरे-
र्मूर्त्तिरास्तां जयायोरसि स्रग्विणी ॥ (१२३)

---

(१२०) वदेति । अब्धिसकारयुतं सप्तदशचतुष्टययुतं प्रतिपादमिति शेषः तोटकं नाम वृत्तं स्यात् ।

(१२१) उदाहरति यमुनेति । यदि निजं जन्म सफलम् इच्छसि कर्त्तुमिति शेषः तदा कलेः अधर्मसंयुगस्य अघं पापम् अपनेतुं खण्ड-यितुं छेत्तुः हृष्टः सन् अच्युतस्य कृष्णस्य केलिकलया क्रीड़ाललि-तादिना लसतोः शोभमानयोरङ्घ्रि सरोरुहयोः पादपद्मयोः सङ्गेन रुचिः शोभा यस्य तथाभूतं यमुनातटम् अट गच्छ ।

(१२२) कीर्त्तितेति । चतूरेफिका रगणचतुष्टयवती प्रतिपादमिति शेषः एषा स्रग्विणी नाम वृत्तं कीर्त्तिता ।

(१२३) उदाहरति इन्द्रेति । या नव्यमेघच्छविः नवनीरदवर्णा पीतवासा हरेः कृष्णस्य मूर्त्तिः इन्द्रनीलोपलेनेव नीलकान्तमणिनेव निर्म्मिता शातकुम्भद्रवालङ्कृता काञ्चनरसरञ्जितेव च शोभते, सा उरसि वक्षसि स्रग्विणी मालिनी मूर्त्तिः जयाय मङ्गलाय आस्तां भवतु । जयायेत्यत्र शमायेति पाठान्तरम् ।

Digitized by Google

८। वाणाश्वैश्छिन्ना वैश्वदेवी म मौ यौ ॥ (१२४)
अर्चामन्येषां त्वं विहायामराणा-
महैतेनैकं विष्णुमभ्यर्च भक्त्या।
तत्राशेषाण्यन्यर्चिते भाविनी ते
भ्रातः! सम्यग्वाराधना वैश्वदेवी ॥ (१२५)
९। प्रमिताक्षरा स ज स सैः कथिता ॥ (१२६)
अमृतस्य शीकरमिवोद्गिरती
रदमौक्तिकांशुलहरीच्छुरिता।
प्रमिताक्षरा सुररिपोर्भणिति-
र्व्रजसुभ्रु वामभिजहार मनः ॥ (१२७)

---

(१२४) वाणाश्वैरिति। यस्य पादे मगणौ यगणौ च स्यातां सा वाणाश्वैः पञ्चमसप्तमनवमैः छिन्ना विच्छेदवतीत्यर्थः वैश्वदेवी नाम वृत्तं स्यात्।

(१२५) उदाहरति अर्चामिति। हे भ्रातः! त्वम् अन्येषाम् अमराणां देवानाम् अर्चां पूजां विहाय त्यक्त्वा अहैतेन एकमेवाद्वितीयं नत्वेति युक्त्या भक्त्या एकमद्वितीयं विष्णुं सम्यगर्चं आराधय, तत्र अशेषाणि विश्वानि तत्र अर्चिते आराधिते ते तव वैश्वदेवी सर्वदेवसम्बन्धिनी आराधना सम्यक् त्वया भाविनी भविष्यतीत्यर्थः सर्वं विष्णुमयं जगदिति भावेन तस्य सर्वदेवमयत्वप्रतिपादनादिति भावः।

(१२६) प्रमितेति। सजसयैः गणैः यस्य पादो भवति तत् वृत्तं प्रमिताक्षरा नाम कथिता।

(१२७) उदाहरति अमृतस्येति। अमृतस्य शीकरं कणम् उद्गिरती अतिमधुरेत्यर्थः रदा दन्ता एव मौक्तिकानि तेषाम् अंशुलहरीभिः किरणसङ्घैः छुरिता रञ्जिता प्रमितानि परिमितानि अक्षरा-

प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्त्तुरभू-
न्न पतिष्यतः करसहस्रमपि ॥ (१२८) इति माघे॥

१० । द्रुतविलम्बितमाह न भौ भ रौ ॥ (१२९)
तरणिजा पुलिने नववल्लवी-
परिषदा सह केलिकुतूहलात् ।
द्रुतविलम्बितचारुविहारिणं
हरिमहं हृदयेन सदा वहे ॥ (१३०)

नीत्यर्थः अवरात्रि यस्यां तथाभूता सुरारिपोः कृष्णस्य भणितिः वाणी व्रजसुभ्रुवां गोपाङ्गनानां मनः अभिजहार हृतवती ।

(१२८) प्रतिकूलतामिति । विधौ दैवे चन्द्रे च प्रतिकूलतां विपक्षतामेकत्र बाधकत्वम् अन्यत्र उदयोन्मुखत्वमित्यर्थः उपगते प्राप्ते सति बहुसाधनता बहूपायग्राह्यत्वमित्यर्थः विफलत्वं निष्फलत्वम् एति प्राप्नोति । तथाहि करसहस्रमपि किरणसहस्रमपि हस्तसहस्रमपि च पतिष्यतः पतनोन्मुखस्येत्यर्थः दिनभर्त्तुः दिवाकरस्य अवलम्बनाय आश्रयाय न अभूत् ।

(१२९) द्रुतेति । यस्य पादे नभौ गणौ तदन्ते भरौ च गणौ स्तः, तत् छन्दः द्रुतविलम्बितम् आह ब्रवीति बुध इति शेषः ।

(१३०) उदाहरति तरणिजेति । अहं सदा सर्वस्मिन् काले हृदयेन मनसा तरणिजा यमुना तस्याः पुलिने सैकते नववल्लवी परिषदा व्रजतरुणीसङ्घेनेत्यर्थः सह केलिकुतूहलात् क्रीडाकौतुकात् द्रुतं शीघ्रं विलम्बितञ्च यथा तथा चारु मनोज्ञं विहरतीति तथोक्तं हरिं कृष्णं वहे धारयामि चिन्तयामीत्यर्थः ।

Digitized by Google

११। न न र र घटिता तु मन्दाकिनी ॥ (१३१)

बलिद्मनविधौ बभौ सङ्गता
पदजलरुहि यस्य मन्दाकिनी।
सुरनिहितसिताम्बुजस्रङ्निभा
हरतु जगदघं स पीताम्बरः ॥ (१३२)
सहशरधि निजं तथा कार्मुकं
वपुरतनु तथैव संवर्मितम्।
निहितमपि तथैव पश्यन्नसिं
वृषभगतिरुपाययौ सविस्मयम् ॥ (१३३)

इति भारवी ॥

अतिसुरभिरभाजि पुष्पश्रिया

---

(१३१) नगेति। ननररघटिता, नयुगलात् परं रयुगलं यस्य पादे स्यात् तद्वृत्तं मन्दाकिनी नाम स्यादित्यर्थः।

(१३२) उदाहरति बलीति। बलिद्मनविधौ बलेरसुरराजस्य दमनविधौ शासनव्यापारे यस्य पदजलरुहि पादपद्मे सङ्गता स्थिता मन्दाकिनी गङ्गा सुरैर्देवैर्निहिता अर्पिता या सिताम्बुजस्रक् श्वेत-पद्ममाला तन्निभा तत् सदृशी सती बभौ शुशुभे, स पीताम्बरः कृष्णः जगताम् अघं दुरितं हरतु नाशयतु।

(१३३) सहेति। वृषभस्येव गतिर्यस्य तथाभूतः सः अर्जुनः सह शरधि सतूणं निजं तथा पूर्ववत् कार्मुकं धनुः, तथैव पूर्ववदेव संवर्मितं सम्यक् कवचाहृतम् अतनु महत् वपुः शरीरं निजमिति शेषः, तथैव पूर्ववदेव निहितं यथापूर्वं स्थापितमित्यर्थः असिं खड्गं पश्यन् विस्मयम् उपाययौ प्राप। पूर्वं किरातरूपिणा हरेण सर्वस्यैव शरतूणादेर्भेदितत्वात् कथं पुनरेतेषां सम्भव इति विस्मयबीजमिति बोध्यम्।

Digitized by Google

मतनुतरतयेव सन्तानकः ।
तरुणपरभृतः स्वनं रागिणा-
मतनुत रतये वसन्तानकः ॥ (१३४) इति मार्वे ॥

१२ । न यसंहितौ म्यौ कुसुमविचित्रा ॥ (१३५)
विपिनविहारे कुसुमविचित्रा
कुतुकितगोपीमहितचरित्रा ।
मुररिपुमूर्त्तिर्मुखरितवंशा
चिरमवताद्व स्तरलवतंसा ॥ (१३६)

१३ । इह वद तामरसं न ज जा यः ॥ (१३७)
स्फुटसुषमामकरन्दमनोज्ञं

---

(१३४) अतीति । अतिसुरभिरतिशयेन सुगन्धः सन्तानकः कल्पतरुविशेषः पुष्पन्निवां कुसुमसमूहानाम् अतनुतरतया बाहुल्येन व्यभासि अभञ्जीव अतिशयेन नम्र इति भावः । तथा वसन्तस्य ऋतुराजस्य आनकः पटहवाद्यभेदः तरुणपरभृतः कोकिलयुवा रागिणां कामिनां रतये अनुरागवृद्धये स्वनं निनदम् अतनुत अकरोत् ।

(१३५) नयेति । यस्य पादे नयसंहितौ नगणयगणाभ्यां संहितौ म्यौ नगणयगणौ स्तः, तत् वृत्तं कुसुमविचित्रा नाम स्यात् ।

(१३६) उदाहरति विपिनेति । विपिनविहारे वनविहारे कुसुमविचित्रा पुष्पभूषितेत्यर्थः कुतुकिताभिः कौतुकवतीभिः गोपीभिः सहितं पूजितं प्रशंसितमित्यर्थः चरित्रं यस्यास्तथाभूता सुखरितवंशा पूरितवेणुः वंशीरवं कुर्वतीत्यर्थः तरलवतंसा चञ्चलकुण्डला मुररिपोः कृष्णस्य मूर्त्तिः वः युष्मान् चिरम् अवतात् रक्षतु ।

(१३७) इहेति । यस्य पादे नजजा वः नगणजगणजगणेभ्यः परं यगणः स्यात्, इह छन्दोमञ्जे तत् वृत्तं तामरसं वद ।

Digitized by Google

ब्रजललनानयनालिनिपीतम्।
तव मुखताम्बरसं सुरभ्रुवो!
हृदयतड़ागविकाशि ममास्तु ॥ (१३८)

१४। भवति न जावथ मालती जरौ ॥ (१३९)
दृढ कलयाच्युत! केलिकानने
मधुरससौरभसारलोलुपः।
कुसुमकृतस्मितचारुविभ्रमा-
मलिरपि चुम्बति मालतीं मुहुः ॥ (१४०)

---

(१३८) उदाहरति स्फुटेति। हे सुरभ्रुवो! कृष्ण! स्फुटाः सुप्रकाशा वा सुरभयः परमशोभाः ता एव मकरन्दा मधूनि तैर्मनोज्ञं मनोहरं व्रजललनानां गोपाङ्गनानां नयनालिभिः नेत्रभ्रमरैः निपीतं निःशेषेण पीतं तव मुखताम्बरसं वदनरक्तोत्पलं रक्तोत्पलं ताम्बरसमिश्रमरः मम हृदयमेव तड़ागः सरः तत्र विकाशि विराजि अस्तु भवतु।

(१३९) भवतीति। यस्य पादे नजौ नकारजकारौ गणौ तदन्तु जरौ जकाररकारौ गणौ स्तः, तत् वृत्तं मालती नाम भवति। यस्मिनेति पाठान्तरम्।

(१४०) उदाहरति दृढेति। हे अच्युत! कृष्ण! दृढ अत्यन्तं केलिकानने क्रीड़ावने कलय अवलोकय मधुरसानां मकरन्दानां सौरभसारे सौगन्ध्यातिशये लोलुपः लुब्धः अलिर्भ्रमरोऽपि का कथा मानवानामित्यपि शब्दार्थः। कुसुमैः कृतः स्मितस्य हसितस्य चारुर्मनोहरः विभ्रमो विलासो यया तादृशीं मालतीं मुहुः पुनः पुनः चुम्बति अत्र समानकार्य्येण भ्रमरमालत्योर्नायकनायिकाव्यवहारसमारोपात् समासोक्तिरलङ्कारः तदुक्तं समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुन इति।

Digitized by Google

यमुना क्वापि ॥

अयि ! विजहीहि दृढ़ोपगूहनं
त्यज नवसङ्गमभीरु ! वल्लभम् ।
अरुणकरोद्गम एष वर्त्तते
वतरनु ! संप्रवदन्ति कुक्कुटाः ॥ (१४१)

इति भारवी ॥

१५ । त्यौ त्यौ मणिमाला च्छिन्ना गुहवक्त्रैः ॥ (१४२)
प्रह्लामरमौली रत्नोपलक्लृप्ते
जातप्रतिबिम्बा श्रोणा मणिमाला ।
गोविन्दपदाब्जे राजी नखराणा-
मास्तां मम चित्ते ध्वान्तं शमयन्ती ॥ (१४३)

---

(१४१) अयीति । अयि नवसङ्गमभीरु ! नवसङ्गवासप्रकाशभीते ! दृढ़ोपगूहनं गाढ़ालिङ्गनं विजहीहि त्यज, वल्लभं प्रियं त्यज मुञ्च । हे वरतनु ! वराङ्गि ! एषः अरुणस्य सूर्यसारथेः करोद्गमः किरणो-दयः अरुणोदय इति यावत् वर्त्तते अतः सूर्योदय इति भावः कुक्कुटाः संप्रवदन्ति रवन्ति । तदयं शयनमन्दिरात् प्रस्थानावसर इति भावः ।

(१४२) त्यौ इति । यस्य पादे त्यौ त्यौ तगणत्रयौ ततश्च तगण-यगणौ स्तः, तत् वृत्तं गुहस्य कार्त्तिकेयस्य वक्त्रैः षड्भिः छिन्ना विच्छेदवती मणिमाला नाम स्यात् ।

(१४३) उदाहरति प्रह्लेति । रत्नोपलैः सुघटमणिभिरित्यर्थः कृप्ते उपयोजिते प्रह्लानां प्रणतानाम् अमराणां मौलौ किरीटे मौलिः किरीटमणिस्तत्राविलमरः जातं प्रतिबिम्बं यस्याः प्रतिबिम्बितेत्यर्थः अतएव श्रोणा रक्तवर्णा मणिमाला रत्नमाला इति प्रतीय-मानोत्प्रेक्षा रत्नमालेवेत्यर्थः गोविन्दस्य कृष्णस्य पदाब्जे पदकमले नख-

Digitized by Google

१६। सोभः स्त्री चेज्जलधरमालाऽभ्रान्ध्यैः ॥ (१४४)

या भक्तानां कलिदुरितोत्तप्तानां
तापच्छेदे जलधरमाला नव्या।
भव्याकारा दिनकरपुत्रीकूले
केलीलोला हरितनुरव्यात् सा वः ॥ (१४५)

१७। वसुयुगविरतिर्नौ म्यौ (पुटो) ऽयम् ॥ (१४६) इति छ०प०

१८। भुवि भवेन्नभजरैः (प्रियंवदा) ॥ (१४७) इति छ०प०

१९। धीरैरभाणि (ललिता) तभौ जरौ ॥ (१४८) इतिछ०प०

राधां राजी त्रेधौ मम चित्ते ध्वान्तं तमः सोढ्वपमिति भावः यमवती नायवती आत्तां तिष्ठत।

(१४४) सोभ इति। यस्य पादे मकारभकारौ गणौ तदन्तु सकारमकारौ गणौ स्यातां चेत् यदि, तदा तत् वृत्तम् अभ्रान्ध्यैः चतुर्थवर्णैरन्यवर्णैश्च विच्छिन्ना जलधरमाला नाम स्यात्।

(१४५) उदाहरति। या दिनकरस्य सूर्यस्य पुत्र्याः कन्यायाः यमुनायाः कूले केलिलोला क्रीडाचपला कलिदुरितोत्तप्तानां कलिकालिपापसन्तप्तानां भक्तानां तापच्छेदे सन्तापनिवृत्तौ नव्या अभिनवा जलधरमाला मेघमालेवेति प्रतीयमानोत्प्रेक्षा वर्त्तते इति शेषः भव्याकारा सुन्दरी सा हरितनुः कृष्णमूर्त्तिः वः युष्मान् अव्यात् रक्षतु।

(१४६) वसुयुगेति। यस्य पादे नयुगलं ततो मकारयकारौ गणौ भवतः अयं वसुषु अष्टसंख्येषु युगेषु चतुर्थेषु च वर्णेषु विरतिर्विच्छेदो यस्य तथाभूतः पुटो नाम वृत्तं स्यात्।

(१४७) भुवीति। नभजरैः गणैः प्रतिपादं रचितं वृत्तं भुवि पृथिव्यां प्रियंवदा नाम स्यात्।

(१४८) धीरैरिति। यस्य पादे तभौ तगणभगणौ ततो जरौ जकाररेफकारौ गणौ स्तः, धीरैः विद्वद्भिः तत् वृत्तं ललिता नाम अभाणि उक्ता।

Digitized by Google

२० । ननभर सहिता (गदितोज्ज्वला) ॥ (१४९) इतिछ०प०
२१ । इह (नवमालिका) नजभयैः स्यात् ॥ इति छ०प०
२२ । पञ्चमुनि भ्मौसात् सयुता (ललना) ॥ (१५०)इतिछ०प०
२३ । (ललिता) मभिहितं नौ स्त्री नामतः ॥(१५१)इतिछ०प०
२४ । (द्रुतपदं) भवति न भनया चेत् ॥ (१५२) इति छ०प०
२५ । सर्वे मा यस्मिन् सोऽयं (विद्याधारः) स्यात् ॥ (१५३)
इति छ०प०
२६ । लघु गुरुर्वदन्ति पञ्च चामरम् ॥ (१५४) इति छ०प०
२७ । (सारङ्गसंज्ञं) समस्तै स्तकारै स्तु ॥ (१५५) इति छ०प०

---

(१४९) ननेति । प्रतिपादं ननभरसहिता नकारनकारभकार-रकारैः गणैः सहिता रचितेत्यर्थः उज्ज्वला नाम वृत्तं गदिता उक्ता ।

(१५०) पञ्चेति । यस्य पादे सगणभगणौ ततः सगणयुगलं तत् पञ्चसुनि पञ्चसु सुनिषु सप्तसु च विच्छिन्नमित्यर्थः वृत्तं ललना नाम स्यात् ।

(१५१) ललितमिति । यस्य पादे नयुगलं ततो मकाररकारौ गणौ स्तः, तत् वृत्तं नामतः नाम्ना ललितम् अभिहितम् ।

(१५२) द्रुतपदमिति । चेत् यदि नभनयाः गणाः प्रतिपादमिति शेषः स्युः, तदा तत् वृत्तं द्रुतपदं नाम भवति ।

(१५३) सर्वे इति । यस्मिन् वृत्ते सर्वे चत्वार इति भावः माः मगणाः प्रतिपादमिति शेषः सोऽयं विद्याधारः नाम वृत्तं स्यात् ।

(१५४) लघुरिति । यस्य पादे आदौ लघुर्वर्णः, ततो गुरुवर्णः इत्थं द्वादशवर्णाः भवतीति भावः तत् वृत्तं पञ्चचामरं वदन्ति ।

(१५५) सारङ्गेति । समस्तैः चतुर्भिरिति भावः तकारैः तगणैः रचितं वृत्तं प्रतिपादमिति शेषः सारङ्गसंज्ञं स्यात् ।

Digitized by Google

२८। समस्त-ज मीरय (मौक्तिकदाम) ॥ (१५६) इति छ०प०

२०। (मोटक नाम) समस्त भ मीरय ॥ (१५७) इति छ०प०

३०। रविलघु (तरलनयन) मिह्न। ॥ (१५८) इति छ०प०

अतिजगती ॥ [८१९२]

(त्रयोदशाक्षरा वृत्तिः)

१। त्याभाभिर्म न ज र गाः प्रहर्षिणीयम् ॥ (१५९)

गोपीनामधरसुधारसस्य पानै-
रुत्तुङ्गस्तनकलसोपगूहनैश्च।
आश्चर्यैरपि रतिविभ्रमैर्मुरारेः
संसारे मतिरभवत् प्रहर्षिणीह ॥ (१६०)

---

(१५६) समसजमिति। समसजं षड्भिर्जकारैरचितमिति यावत् वृत्तं मौक्तिकदाम नाम रैरव वद।

(१५७) मोटकेति। समसाश्वत्वार इति भावः भा भगश्चा यत्र तत् वृत्तं मोटकनाम मोटकाख्यम् रैरव वद।

(१५८) रवीति। रवयः द्वादशसंख्यका लघवो यत्र तादृशं वृत्तं प्रतिपादयिति शेषः इह छन्दोमञ्जे तरलनयनं नाम वृत्तं स्यात्।

(१५९) त्याभाभिरिति। यस्य पादे मनजरगाः मनजनगण-रगणेभ्यः परं गुरुरेकः तत् वृत्तं त्याभाभिः वृतीयवर्णैः दशमवर्णैश्च विच्छित्तेति शेषः। प्रहर्षिणी नाम स्यात्।

(१६०) उदाहरति गोपीनामिति। इह संसारे गोपीनाम् अधरसुधारसस्य पानैः उत्तुङ्गानाम् उन्नतानां स्तनकलसानां कुच-कुम्भानाम् उपगूहनैः आश्लेषनैः मर्दनैश्चेति यावत् तथा आश्चर्यैः विचित्रैः रतिविभ्रमैः सुरतविलासैरपि प्रहर्षिणी प्रहृष्टाह्लादवती-त्यर्थः मतिः अभवत्।

Digitized by Google

२ । ज भौ स जौ गिति रुचिरा चतुर्ग्रहैः ॥ (१६१)
पुनातु वो हरिरतिरासविभ्रमी
परिभ्रमन् व्रजरुचिराङ्गनान्तरे ।
समीरणोल्लसितलतान्तरालगो
यथा मरुत्तरलतमालभूरुहः ॥ (१६२)
अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम् ॥ (१६३)

इति भट्टौ

---

(१६१) जभाविति । यस्य पादे जभौ जकारभकारौ गणौ तद्वत् सजौ सकारजकारौ गणौ ततश्च गुरुर्भवति, तत् वृत्तं चतुर्भिः चतुर्वर्णैः यद्वैर्नवभवर्णैश्च विच्छित्तेति शेषः रुचिरा नाम स्यात् ।

(१६२) उदाहरति पुनात्विति । समीरणेन वायुना उल्लसिता या लताः तासाम् अन्तरालगः मध्यवर्ती मरुता वायुना तरलः चञ्चलः तमालभूरुहः तमालतरुर्यथा व्रजस्य गोकुलस्य रुचिराणां मनोहारिणीनाम् अङ्गनानाम् अन्तरे मध्ये परिभ्रमन् विचरन् अतिरासविभ्रमी अतिशयेन रासक्रीड़ाविलासी हरिः कृष्णः वः युष्मान् पुनातु ।

(१६३) अभूदिति । विबुधानां देवानां सखा अथवा विः पक्षी जटायुः बुधाः पण्डिताः तेषां सखा विबुधसखः परन्तपः अरिन्दमः श्रुतान्वितः शास्त्रदर्शीत्यर्थः दशसु दिक्षु गतो रथो यस्येति दशरथ इति उदाहृतः ख्यातिं गतः नृपः राजा अभूत् । सनातनो विष्णुः स्वयं भुवनानां जगतां हितं रावणवधादिरूपं कर्म तदेव छलं तेन हेतुना गुणैः शास्त्रीयादिभिः वरं श्रेष्ठं यं दशरथं पितरम् उपागमत् प्रापत् दशरथस्य पुत्रत्वेन अवततारेति समुदायार्थः ।

Digitized by Google

३। वेदै रन्ध्रै र्मृतौ य स गा मत्तमयूरम् (१६४)
लीला नृत्यन्मत्तमयूरध्वनिकान्तं
मृत्यन्नी पामोदिपयोदानिलरम्यम्।
रासक्रीड़ाकृष्टमना गोपवधूभिः
कंसध्वंसी निर्जनवृन्दावनमाप ॥ (१६५)
हा तातेति क्रन्दितमाकर्ण्य विषन्न-
स्तस्यान्विष्यन् वेतसगूढ़ं प्रभवं सः।
शल्यप्रोतं वीक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥ (१६६)

इति रथी ॥

---

(१६४) वेदैरिति। यस्य पादे मृतौ मकारतकारौ गणौ तदन्त्यगणौ ततश्च गुरुरेकः तत् वृत्तं वेदैश्चतुर्भिश्चतुर्दशैर्वर्णैर्वित्यर्थः रन्ध्रैः नवभिर्नवभिरिति यावत् वर्णैर्विच्छिन्नमिति शेषः मत्तमयूरं नाम स्यात्।

(१६५) उदाहरति लीलेति। गोपवधूभिः रासक्रीड़ार्थम् आकृष्टं मनो यस्य तादृशः कंसध्वंसी कृष्णः लीलया नृत्यन्तः ये मत्तमयूराः तेषां ध्वनिभिः कान्तं रमणीयं तथा नृत्यन्तः वायुभरेण कम्पमाना इति भावः ये नीपाः कदम्बाः तेषाम् आमोदी सौरभवान् यः पयोदानिलः मेघसमीरणः तेन रम्यं निर्जनवृन्दावनम् आप प्राप्तवान्।

(१६६) हा तातेति। स क्षितिपः राजा दशरथोऽपि हा तात! इति क्रन्दितं रुदितम् आकर्ण्य श्रुत्वा विषन्नः किमेतत् मया कृतमिति विषादं गतः तस्य क्रन्दितस्य वेतसैः वेतसवनैः गूढम् आवृतं प्रभवम् उत्पत्तिस्थानम् अन्विष्यन् सन् शल्यप्रोतं शल्याक्षिप्तं सकुम्भं सजलकलसं मुनिपुत्रं वीक्ष्य दृष्ट्वा तापात् मनःपीड़ातिरेकात् अन्तः-शल्य इव स्वयं शल्यविद्ध इव आसीत्।

Digitized by Google

४ । न युगल सयुगलगैरिति चण्डी ॥ (१६७)
जयति दितिजरिपुताण्डवलीला
कुपितकवलकरकालियमौली ।
चरणकमलयुगचापलचण्डी
पदनखरुचिजितभोगमणिश्रीः ॥ (१६८)

५ । स ज सा ज गौ च यदि मञ्जु भाषिणी (१६९)
अमृतोर्मिशीतलकरेण लालयं-
स्तनुकान्तिरोचितविलोचनो हरे ! ।
नियतं कलानिधिरसीति वल्लवी
मुदमच्युते व्यधित मञ्जुभाषिणी ॥ (१७०)

---

(१६७) नयुगलेति । यस्य पादः नयुगल सयुगलगैः नहयवहयावारनन्तरं गुरुश्चैकेन स्यात् तदुक्तं चण्डीति नाम स्यात् ।

(१६८) उदाहरति जयतीति । कुपितस्य क्रुद्धस्य कवलकरस्य प्रालेयतस्य कालियस्य नागस्य मौलौ शिरसि चरणकमलयोः पादपद्मयोः चापलेन सञ्चलनेन चण्डी प्रचण्डता पदनखानां दृष्टिभिः प्रभाभिः जिता भोगमण्डे फणरत्नस्य श्रीः शोभा यया तादृशी दितिजानां दैत्यानां रिपोः कृष्णस्य ताण्डवलीला नृत्यविलासः जयति सर्वोत्कर्षेण वर्त्तते ।

(१६९) सजसा इति । यदि सजसा गणाः ततः जगौ जगणो गुरुरेकश्च स्यात् प्रतिपादमिति शेषः तदा मञ्जुभाषिणी नाम वृत्तं स्यात् ।

(१७०) उदाहरति अमृतोर्मीति । हे हरे कृष्ण ! त्वं तनुकान्त्या शरीरसौन्दर्येण रोचितानि सम्पृक्तीकृतानि विलोचनानि नयनानि लोकानामिति भावः येन तथाविधः तथा अमृतोर्मिवत् सुधाकरीवत् शीतलः यः करः कृष्णः अन्यत्र शिरसः तेन वल्लिकृतांशवः करा

सुनन्दिनीति शभौ ॥

६। न न त त गुरुभिश्चन्द्रिकाऽश्वर्त्तुभिः ॥ (१७ १

शरदमृतरुचश्चन्द्रिकाक्षालिते
दिनकरतनयातीरदेशे हरिः ।
विहरति रभसाद्व्रजवीभिः समं
त्रिदिवयुवतिभिः कोऽपि देवो यथा ॥ (१७२)
इह दुरधिगमैः किञ्चिदेवागमैः
सततमसुतरं वर्णयन्त्यन्तरम् ।
असुमतिविपिनं वेद दिग्वाग्मिनं
पुरुषमिव परम्मन्नयोनिः परम् ॥ (१७३)

दूत्यमरः ज्ञातवान् अधीतवान् अज्ञानिति शेषः नियतं निश्चितं कलानिधिः चन्द्रः असि भवसि इति मञ्जुभाषिणी मधुरालापिनी वल्लवी गोपी अच्युते कृष्णे अच्युतस्येति भावः सदसं आनन्दं व्यधित कृतवती ।

(१७१) ननेति । यस्य पादः ननततगुरुभिः नगणचतुष्टयात् परं तगणद्वयं ततो गुरुश्चेत् स्यात्, तत् छन्दसम् अश्वर्त्तुभिः सप्तभिः यद्भिश्च विच्छिन्नेति शेषः चन्द्रिका नाम स्यात् । चन्द्रिकां वेषितुं यमां यद्-नीति दृष्टव्यम् ।

(१७२) उदाहरति शरदिति । हरिः कृष्णः शरदमृतरुचः शर-च्चन्द्रस्य चन्द्रिकाभिः क्षालिते विधौतिते दिनकरस्य या तनया यमुना तस्यास्तीरदेशे वल्लवीभिः गोपीभिः समं सह त्रिदिवयुवतिभिः देवा-ङ्गनाभिः सह कोऽपि देवो यथा इन्द्र इव रभसात् हर्षात् रभसो वेग-हर्षयोरित्यमरः । विहरति क्रीडति ।

(१७३) इहेति । इह अस्मिन् पद्ये असुतरं दुस्तरमित्यर्थः दुर्वि-ज्ञातमिति यावत् अन्तरं मध्यगागं दुरधिगमैः दुर्ज्ञेयैरित्यर्थः आगमैः शास्त्रैः सततं किञ्चित् वर्णयन्ति वर्णयन्ति बुधा इति शेषः । किन्तु

Digitized by Google

इति भारवौ ॥ उत्पलिनीति केचित् ॥

७ । स ज सा: स गौ च कथितः कलहंसः (१७४)
यमुनाविहारकुतुके कलहंसो
व्रजकामिनीकमलिनीकृतकेलिः ।
जनचित्तहारिकलकण्ठनिनादः
प्रमदं तनोतु तव नन्दतनूजः ॥ (१७५)
सिंहनादः क्वापि ॥

८ । स ज सा ज गौ च भवति प्रबोधिता ॥ (१७६)
मयिता मृषा चटुलमाननिद्रया
रतिकेलिकुञ्जनिलये विलासिनी ।

अतिविपिनम् अतिनिकटं दिव्यापिनं दिवोव्याप्य तिष्ठन्तम् अस्तं पर्वतं परं पुरुषमिव परमात्मानमिव परं केवलं पद्मयोनिः ब्रह्मा वेद-जानाति नान्य इत्यर्थः । अत्र यमकोपमयोः संसृष्टिः ।

(१७४) सजसा इति । यस्य पादे सजसाः यथा ततः सगणो गुरुश्च भवति, तत् वृत्तं कलहंसो नाम कथितः ।

(१७५) उदाहरति यमुनेति । यमुनायां विहारे यत् कुतुकं कौतुकं तस्मिन् कलहंसः हंसविशेषः व्रजकामिन्य एव कमलिन्यः पद्मिन्यः ताभिः कृतः केलिः क्रीड़ा येन तथोक्तः तथा जनानां चित्तहारी मनोहारी कलः मधुरः कण्ठनिनादः कण्ठस्वरः यस्य तादृशः नन्दतनूजः कृष्णः तव प्रमदम् आनन्दं तनोतु विस्तारयतु ।

(१७६) सजसा इति । यस्य पादे सजसा यथाः ततो जगणो गुरुश्च स्यात्, तत् वृत्तं प्रबोधिता नाम भवति । अस्मिन्भाषिकीप्रबोधितयोरेकलक्षणत्वेऽपि पृथगुपादानं नामभेदादिति बोध्यम् ।

(१७७) उदाहरति मयितेति । मृषा मिथ्या सकपटेत्यर्थः चटुला चञ्चला अस्थिरेत्यर्थः अवास्तविकत्वादिति भावः या माननिद्रा

मुरवैरिणा श्रवणखर्जनादिना
स्मितमाततान सपदि प्रबोधिता ॥ (१७७)

९। भवति मृगेन्द्रमुखं न जौ जरौ गः ॥ (१७८)
गुरुभुजवीर्य्यभरं हरिं मदान्धा
युधि समुपेत्य न दानवा जिजीवुः।
क्षुधितमृगेन्द्रमुखं मृगा उपेत्य
क्व नु खलु बिभ्रति जीवनस्य योगम् ॥ (१७९)

१०। यमौ रौ विख्याता (चञ्चरीकावली) गः ॥ (१८०)

इति छ० प०।

तदा हेतुना रतिकेलिक्लिष्टे सुरतविहारनिक्लिष्टभूमौ शयिता निद्रिता विद्राविणी काचित् गोपी सुरवैरिणा कृष्णेन श्रवणखर्जनादिना कर्ण-कण्डूयनादिना आदिपदेन चुम्बनादिपरिग्रहः। सपदि सहसा प्रबोधिता जागरिता सती स्मितम् ईषद्धासम् आतताने जनयती सानं तत्याजेति भावः।

(१७८) भवतीति। यस्य पादे नजौ नगणजगणौ ततो जरौ जगणरगणौ, तदेतत् गुरुच तत् वृत्तं मृगेन्द्रमुखं भवति।

(१७९) उदाहरति गुर्विति। मदान्धा मदोद्धता दृप्तवर्गः दानवाः युधि युद्धे गुरुभूयिष्ठान् भुजयोः वीर्य्यभरः वीर्य्यातिरेकः यस्य तथाभूतं हरिं कृष्णं समुपेत्य प्राप्य न जिजीवुः प्राणान् तत्यजुरित्यर्थः। अत्र वितर्कः तथाहि मृगाः क्षुधितस्य मृगेन्द्रस्य सिंहस्य मुखम् उपेत्य प्राप्य क्व खलु कुत्र प्रदेशे जीवनस्य योगं बिभ्रति ? न कुत्रापीत्यर्थः अत्र प्रतिवस्तूपमालङ्कारः तदुक्तं दर्पणे। प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथगिति।

(१८०) यमाविति। यस्य पादे यमौ यगणमगणौ ततो रौ रगणद्वयं ततो गुरुच, तत् वृत्तं चञ्चरीकावली विख्याता कथिता।

Digitized by Google

११ । नसरयुगगै(चन्द्ररेख)र्त्तु लोकैः ॥ (१८१) इति छ०प० ।

१२ । (उपस्थित)मिदं ज्सौ त्सौ यदि गुरुः स्यात् ॥ (१८२)
इति छ० प० ।

१३ । जतौ सजौ गो भवति (मञ्जुहासिनी) ॥ (१८३)
इति छ०प० ।

१४ । (कुटजगति)र्नजौ सप्तर्त्तुभ्तौ गुरुः ॥ (१८४) छ०प० ।

१५ । इदं (कन्दुकं) यत्र येभ्यश्चतुर्भ्यो गः ॥ (१८५) छ० प०।

१६ । एते क्रमात्तभसजसंज्ञका गणा
गश्चान्ततो यदि निहितो महीपते ! ।
वेदैर्ग्रहैर्भवति यतिश्च शोभना
नागाधिपो वदति तदा (प्रभावतीम्) ॥ (१८६) छ०प०

---

(१८१) नसरेति । यस्य पादः नसरयुगगैः नगणसगणरगणैः चतुर्भिर्गुरुभिश्च भवति, तत् वृत्तम् षड्लोकैः षड्भिः सप्तभिश्च विच्छिन्नेति शेषः चन्द्ररेखा नाम स्यात् ।

(१८२) उपस्थितमिति । यदि जसौ जगणसगणौ, तसौ तगणसगणौ ततश्च गुरुः स्यात् प्रतिपादमिति शेषः तदा इदं वृत्तम् उपस्थितं नाम भवति ।

(१८३) जताविति । यस्य पादे जतौ जगणतगणौ ततः सजौ सगणजगणौ ततश्च गुरुः, तत् वृत्तं मञ्जुहासिनी नाम भवति ।

(१८४) कुटजेति । यस्य पादे नजौ नगणजगणौ, ततो भतौ भगणतगणौ ततश्च गुरुः, तत् वृत्तं सप्तर्त्तु सप्तभिः षड्भिश्च विच्छिन्ना कुटजगतिर्नाम स्यात् ।

(१८५) इदमिति । यत्र वृत्ते चतुर्भ्योभ्यः यगणेभ्यः परं गः गुरुरेकः प्रतिपादमिति शेषः, इदं कन्दुकं नाम स्यात् ।

(१८६) एते इति । हे महीपते ! एते तभसजसंज्ञकाः गणाः

शर्करी। [१६३८४]

(चतुर्दशाक्षरा वृत्तिः)

१। मो गौ नौ मश्चेच्छरनवभिरसम्बाधा ॥ (१८७)
वीर्य्याग्नौ येन ज्वलति रथवशात् क्षिप्ते
दैत्येन्द्रे जाता धरणिरियमसम्बाधा।
धर्मस्थित्यर्थं प्रकटिततनुसम्बन्धः
साधूनां बाधां प्रशमयतु स कंसारिः ॥ (१८८)

२। श्लेयं वसन्ततिलकं त भ जा ज गौ गः ॥ (१८९)
फुल्लं वसन्ततिलकं तिलकं वनाख्या
लीलापरं पिककुलं कलमत्र रौति।

क्रमात् भवन्ति, अन्ततः तदनन्तरं गः गुरुर्निश्चितः अर्पितः, तथा वेदैः चतुर्भिर्थ दैर्नवभिश्च शोभना यतिर्विच्छेदो भवति, तदा नागाधिपः पिङ्गलः प्रभावतीं नाम वृत्तं वदति।

(१८७) मोगाविति। यस्य पादे मगणात् परं गुरुद्वयं ततो न युगलं तदनु मगणश्चेत् यदि भवति तदा तद्वृत्तं शरनवभिः पञ्चभिर्नवभिश्च विच्छिन्ना असम्बाधा नाम स्यात्।

(१८८) उदाहरति वीर्य्याग्नाविति। येन रथवशात् युद्धव्यापारात् ज्वलति वीर्य्यमेव अग्निः तस्मिन् दैत्येन्द्रे हिरण्यकशिपौ कंसे क्षिप्ते पातिते निहते सतीत्यर्थः इयं धरणिः पृथ्वी असम्बाधा निर्बाधा जाता, धर्मस्थित्यर्थं धर्ममर्य्यादारक्षणार्थं प्रकटितः प्रकाशितः तन्वा देहस्य सम्बन्धः येन तथाभूतः देहधारीत्यर्थः स कंसारिः कृष्णः साधूनां बाधां विपदं प्रशमयतु शान्तिं नयतु।

(१८९) श्लेयमिति। यस्य पादे तभजा गणाः, ततो जगौ गः जगणो गुरुद्वयञ्च, तत् वृत्तं वसन्ततिलकं श्लेयम्।

(१९०) उदाहरति फुल्लमिति। गोपीनामुक्तिरियम्। वसन्तस्य

Digitized by Google

वात्येष पुष्पसुरभिर्मलयाद्रिवातो
यातो हरिः स मथुरां विधिना हृताः स्मः ॥ (१९०)
सिंहोद्धता क्वापि ॥

३ । न न र स लघु गैः स्वरैरपराजिता ॥ ॥ (१९१)
यदनवधिभुजप्रतापक्रतास्पदा
यदुनिचयचमूः परैरपराजिता ।
व्यजयत समरे समस्तरिपुव्रजं
स जयति जगतां गतिर्गरुड़ध्वजः ॥ (१९२)

४ । म म भ न ल गि ति प्रहरणकलिका ॥ (१९३)

क्रतोः तिलकं विशेषकभूतं तमालपत्रतिलकचित्रकाणि विशेषकमित्यमरः । वनाल्याः वनश्रेण्याः तिलकं तिलपुष्पं फुल्लं विकसितम् । अत्र वसन्ते कीलापरं क्रीड़ामत्तं पिकक्रूजं कोकिलशब्दं कलं मधुराक्षुटं रौति ध्वनति, एष पुष्पैः सुरभिः सौरभवान् मलयाद्रिवातः मलयाचलसमीरश्चः वाति वहति, स हरिः कृष्णः मथुरां यातः गतः, अतः विधिना दैवेन हृताः स्मः वयमिति शेषः ।

(१९१) नेति । यस्य पादः ननरसलघुगैः ननयुगलात् परं रसाभ्यां नखाभ्यां ततो लघुर्गुरुश्च भवति तत् वृत्तं स्वरैः वज्रभिर्वर्णैः क्रिया अपराजिता नाम स्यात् ।

(१९२) उदाहरति यदिति । यस्य अनवधिना अशेषेण भुजप्रतापेन कृतम् आस्पदं प्रतिष्ठा यस्याः तथाविधा अतएव परैः शत्रुभिरपराजिता अपराभूता यदुनिचयचमूः यादवकुलसेना समरे संग्रामे समस्तं रिपुव्रजं शत्रुसङ्घं व्यजयत विजितवती, जगतां गतिराश्रयः नाथ इत्यर्थः स गरुड़ध्वजः कृष्णः जयति सर्वोत्कर्षेण वर्त्तते ।

(१९३) नेति । यस्य पादे नगणत्रयं ततो भगणः तदनु नगणः अनन्तरं लघुरेको गुरुश्चैकः, तत् प्रहरणकलिका नाम वृत्तं स्यात् ।

Digitized by Google

व्यथयति कुसुमप्रहरण ! कलिका
प्रमदवनभवा तव धनुषि तता।
विरहविपदि मे शरणमिह ततो
मधुमथनगुणस्मरणमविरतम् ॥ (१९४)

५। मात्तो नो मो गी यदि गदिता वासन्तीयम्॥ (१९५)

भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः
श्रीखण्डाद्रेरङ्गु तपवनैर्मन्दान्दोला।
लीलालोला पल्लवविलसद्हस्तोल्लासैः
कंसारातौ नृत्यति सदृशी वासन्तीयम् ॥ (१९६)

---

(१९४) उदाहरति व्यथयतीति। हे कुसुमप्रहरण पुष्पशर! काम! प्रमदवनभवा प्रमदवनात् जाता तव धनुषि तता विस्तृता आरोपितेति यावत् कलिका कोरकः पुष्पानिलस्मरः। व्यथयति पीड़यति मामिति शेषः। ततः तस्मात् इह विरहविपदि अविरतम् अनवरतं मधुमथनस्य कृष्णस्य गुणानां स्मरणं मे मम शरणं गतिः। कस्मादिदं गोप्या उक्तिः।

(१९५) मात्त इति। यदि पादे मगणात् तगणः, ततो मगण-जगणौ तदनु गुरुद्वयं भवति, तदा इयं वासन्ती नाम वृत्तं गदिता उक्ता।

(१९६) उदाहरति भ्राम्यद्भृङ्गीति। कंसारातौ कृष्णे नृत्यति सति निर्भरः सातिशयाः ये मधुरा आलापाः ते एव उद्गीतानि उच्चैर्गीतानि तैः भ्राम्यन्तः भृङ्गा यस्यां तथाभूता, श्रीखण्डाद्रेः मलयाचलस्य अद्भुतपवनैः अपूर्ववातैः मन्दान्दोला ईषत्कम्पिता तथा पल्लवैः विलसन्तः ये हस्तानां उल्लासाः भुजलयाः तैः लीलालोला क्रीड़ाचपला इयं वासन्ती माधवीलता वासन्ती माधवीलतेत्यर्थः सदृशी नृत्यता कृष्णेन समं नृत्यतीति भावः।

Digitized by Google

६ । द्विःसप्तच्छिदि लोला मृसौ भौ गौ चरणे चेत् ॥ (१९७)

मुग्धे ! यौवनलक्ष्मीर्विद्युद्विभ्रमलोला
त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः ।
तद्वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे
श्रीनाथेन समेता स्वच्छन्दं कुरु केलिम् ॥ (१९८)

७ । स्वरभिदि यदि नौ तौ च नान्दीमुखी गौ ॥ (१९९)

सरसखगकुलालापनान्दीमुखीयं
लहरिभुजलया चारुफेनस्मितश्रीः ।
मुरहर ! कलयासक्तिमासाद्य किन्ते
प्रमुदितहृदया भानुजा नृत्यतीह ॥ (२००)

---

(१९७) द्विरिति । चेत् यदि चरणे पादे मसौ गणौ ततो भौ गणौ तदन्तु गुरुहयं भवति तदा सप्तसु सप्तसु वर्णेषु विच्छिन्ना लोला नाम वृत्तं स्यात् ।

(१९८) उदाहरति मुग्धे इति । हे मुग्धे ! मूढे ! यौवनस्य लक्ष्मीः श्रीः विद्युद्विभ्रमवत् सौदामिनीस्फुरणवत् लोला चञ्चला, त्रैलोक्येषु अद्भुतं रूपं यस्य तादृशः गोविन्दः कृष्णः अतिदुरापः अतिशयेन दुष्प्राप्यः । तत् तस्मात् गुञ्जद्भिः भृङ्गैः सनाथे युक्ते वृन्दावनकुञ्जे श्रीनाथेन कृष्णेन समेता सङ्गता सती स्वच्छन्दं केलिं क्रीडां कुरु ।

(१९९) स्वरेति । यदि नौ नगणौ तदन्तु तौ तगणौ ततश्च गुरुद्वयं भवति प्रतिपादमिति शेषः तदा स्वरभिदि सप्तभिः सप्तभिर्वर्णैः विच्छिन्ना नान्दीमुखी नाम वृत्तं स्यात् ।

(२००) उदाहरति सरेति । हे मुरहर कृष्ण ! सरसैः मधुरैः खगकुलानां पक्षिसङ्घानाम् आलापैः नान्दी मङ्गलमयी स्तुतिः मुखे यस्यास्तादृशी लहर्यस्तरङ्गा एव भुजवोः लया अभिनयविशेषाः यस्या-

व्यथयति कुसुमप्रहरण ! कलिका
प्रमदवनभवा तव धनुषि तता।
विरहविपदि मे शरणमिह ततो
मधुमथनगुणस्मरणमविरतम् ॥ (१९४)

५। मात्तो नो मो गौ यदि गदिता वासन्तीयम् ॥ (१९५)

भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः
श्रीखण्डाद्रेरनु तपवनैर्मन्दान्दोला।
लीलालोला पल्लवविलसत्स्तोत्रासैः
कंसारातौ वृत्यति सदृशी वासन्तीयम् ॥ (१९६)

---

(१९४) उदाहरति व्यथयतीति। हे कुसुमप्रहरण पुष्पशर! काम! प्रमदवनभवा प्रमदवनात् जाता तव धनुषि तता विस्तृता आरोपितेति यावत् कलिका कोरकः पुष्पानित्यमरः। व्यथयति पीड़यति मामिति शेषः। ततः तस्मात् इह विरहविपदि अविरतम् अनवरतं मधुमथनस्य कृष्णस्य गुणानां स्मरणं मे मम शरणं गतिः। कस्यचिद् गोप्या उक्तिः।

(१९५) मात्त इति। यदि पादे मगणात् तगणः, ततो मगण-मगणौ तदन्तु गुरुहयं भवति, तदा इयं वासन्ती नाम वृत्तं गदिता उक्ता।

(१९६) उदाहरति भ्राम्यदिति। कंसारातौ कृष्णे वृत्यति सति निर्भरः सातिशयाः ये मधुरा आलापाः ते एव उद्गीतानि उच्चैर्गीतानि तैः भ्राम्यन्तः भृङ्गा यस्यां तथाभूता, श्रीखण्डाद्रेः मलयाचलस्य अद्भुतपवनैः अपूर्ववातैः मन्दान्दोला दैवतकम्पिता तथा पल्लवैः विलसन्तः ये स्तवानाम् उक्तयः भुजलयाः तैः लीलालोला क्रीड़ाचपला इयं वासन्ती माधवीव्रतता वासन्ती माधवीव्रतेत्यमरः सदृशी वृत्यता कृष्णेन समं वृत्यतीति भावः।

Digitized by Google

६ । द्विःसप्तच्छिदि लोला मसौ भौ गौ चरणे चेत् ॥ (१९७)

मुग्धे ! यौवनलक्ष्मीर्विद्युद्विभ्रमलोला
त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः ।
तद्वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे
श्रीनाथेन समेता स्वच्छन्दं कुरु केलिम् ॥ (१९८)

७ । स्वरभिदि यदि नौ तौ च नान्दीमुखी गौ ॥ (१९९)

सरसखगकुलालापनान्दीमुखीयं
लहरिभुजलया चारुफेनस्मितश्रीः ।
मुरहर ! कलयासक्तिमासाद्य किन्ते
प्रमुदितहृदया भानुजा नृत्यतीह ॥ (२००)

---

(१९७) द्विरिति । चेत् यदि चरणे पादे मसौ गणौ ततो भौ गणौ तदन्तु गुरुहयं भवति तदा सप्तसु सप्तसु वर्णेषु विच्छित्ता लोला नाम वृत्तं स्यात् ।

(१९८) उदाहरति मुग्धे इति । हे मुग्धे ! मूढे ! यौवनस्य लक्ष्मीः श्रीः विद्युद्विभ्रमवत् सौदामिनीस्फुरणवत् लोला चञ्चला, त्रैलोक्येषु अद्भुतं रूपं यस्य तादृशः गोविन्दः कृष्णः अतिदुरापः अतियत्नेन दुष्प्राप्यः । तत् तस्मात् गुञ्जद्भिः भृङ्गैः सनाथे युक्ते वृन्दावनकुञ्जे श्रीनाथेन कृष्णेन समेता सङ्गता सती स्वच्छन्दं केलिं क्रीडां कुरु ।

(१९९) स्वरेति । यदि नौ नगणौ तदन्तु तौ तगणौ ततश्च गुरुद्वयं भवति प्रतिपादमिति शेषः तदा स्वरभिदि सप्तभिः सप्तभिर्वर्णैः विच्छित्ता नान्दीमुखी नाम वृत्तं स्यात् ।

(२००) उदाहरति सरेति । हे मुरहर कृष्ण ! सरसैः मधुरैः खगकुलानां पक्षिसङ्घानाम् आलापैः नान्दी मङ्गलमयी स्तुतिः मुखे यस्यास्तादृशी लहर्यश्चरङ्गा एव भुजवोः लया अभिनयविशेषाः यस्या-

८। (इन्दुवदना) भजसनैः सगुरुयुग्मैः ॥ (२०१) इति छ०प०

९। न न त जगुरुगैः सप्तयति (नदी) स्यात् ॥ (२०२) छ०प०

१०। (लक्ष्मी) रन्ध्रविरामा मसौ तनौ गुरुयुग्मम् ॥ (२०३)

इति छ० प०

११। त्रिन नगगिति वसुयति (सुपवित्रम्) ॥ (२०४) छ०प०

१२। (मध्यश्यामा) युगदृग्विरमा भौ न्यौ गौ ॥ (२०५)

इति छ० प०

१३। युगदिग्भिः (कुटिल) मिति सभौ न्यौ गौ चेत् ॥ (२०६)

इति छ० प०

सत्यभूता तथा चारवः फेना एव स्मितस्य स्मितवः यस्याश्चयाविधा भानुजा यमुना कथंभूता अंगतः कियतांगेनेत्यर्थः ते एव आवर्त्तिं वासिध्यम् आपाद्य प्राप्य प्रहर्षितहृदया कृतचित्ता सती दृष्ट किं ब्रूयात् ?।

(२०१) इन्दुवदनेति। यस्य पादः भजसनैः गणैः ततश्च गुरुवर्णाभ्यां भवति तत् वृत्तम् इन्दुवदना नाम स्यात्।

(२०२) नेति। यस्य पादः ननतजगुरुगैः नयुगलतजगणैः गुरुद्वये न च भवति तत् वृत्तं सप्तसु वर्णेषु यतियुक्तं नदी नाम स्यात्।

(२०३) लक्ष्मीरिति। यस्य पादे मसौ मगणसगणौ ततः तनौ तगणनगणौ ततश्च गुरुद्वयं तत् वृत्तम् रन्ध्रविरामा रन्ध्रच्छिन्ना लक्ष्मीर्नाम स्यात्।

(२०४) त्रिनेति। यस्य पादे त्रिनन नग् इति ननगचतुष्टयं ततो गुरुद्वयञ्च, तत् वृत्तं वसुषु अष्टम वर्णेषु यतिमत् सुपवित्रं नाम स्यात्।

(२०५) मध्यश्यामेति। यस्य पादे भौ मगणभगणौ न्यौ नगणयगणौ ततो गुरुद्वयं भवति, तत् वृत्तं युगदृग्विरमा चतुर्षु दशसु च वर्णेषु विरमा विच्छेदवती मध्यश्यामा नाम स्यात्।

(२०६) युगदिग्भिरिति। चेत् यदि सभौ गणौ ततो न्यौ

Digitized by Google

१४। नजभजला गुरुश्च भवति (प्रमदा)॥ (२०७)इतिछ०प०

१५। सजसा यलौ गिति शरन्मुहै (मञ्जरी)॥ (२०८) छ०प०

१६। नजभजगै र्गुरुश्च वसुषट् (कुमारी)॥ (२०९) छ० प०

१७। नरनरै र्लगौ च रचितं (सुकेसरम्)॥ (२१०) छ० प०

१८। म्यौ न्यौ ल्गौ चेद्दिह भवति च (चन्द्रौरसः)॥(२११)
इति छ० प०

१९। (वासन्तीयं) स्यादिह खलु मतौ न्यौ गौ चेत्॥ (२१२)
इति छ० प०

नगणयगणौ तदन्तु गुरुद्वयं भवति प्रतिपादमिति शेषः तत् वृत्तं युगदिग्भिः चतुर्भिर्दशभिश्च वर्णैः विच्छित्तं कुटिलमिति नाम स्यात्।

(२०७) नजेति। यस्य पादे नजभजला गुरुश्च,नगणजगणभगण-जगणास्ततो लघुरेको गुरुश्चैकः भवति, तत् वृत्तं प्रमदा नाम स्यात्।

(२०८) सजसा इति। यस्य पादे सजसाः गणाः ततो यलौ यगणो लघुश्च तदन्तु गुरुः, तत् वृत्तं शरन्मुहैः पञ्चभिर्नवभिश्च वर्णैः विच्छित्ता मञ्जरीति नाम स्यात्।

(२०९) नजेति। यस्य पादे नजभजगैः नगणजगणभगणजगणेभ्यः परं गुरुणा सह गुरुश्च भवति, तत् वृत्तं वसुषट् अष्टभिर्षड्भिश्च वर्णैः विच्छित्तेति भावः कुमारी नाम स्यात्।

(२१०) नरनरैरिति। नरनरैः गणैः सह लगौ लघुगुरुवर्णौ यस्य पादे स्तः तत् वृत्तं सुकेसरं नाम रचितं कथितम्।

(२११) म्यौ इति। इह छन्दोग्रन्थे चेत् यदि म्यौ मगणभगणौ ततो न्यौ नगणयगणौ ततश्च लगौ लघुगुरुवर्णौ भवतः, तत् वृत्तं चन्द्रौरसो नाम भवति।

(२१२) वासन्तीयमिति। इह ग्रन्थे चेत् यदि मतौ मगणतगणौ ततो न्यौ नगणयगणौ ततश्च गौ गुरुद्वयं भवति प्रतिपादमिति शेषः तत् वृत्तं वासन्तीयं स्यात्।

Digitized by Google

२०। (चक्रपद) मिह भननलग गुरुभिः ॥ (२१३) छ० प०

अतिशर्करी। [३२७६८]

(पञ्चदशाक्षरा वृत्तिः)

१। गुरुनिधनमनुलघुरिह शशिकला ॥ (२१४)
मलयजतिलकसमुदितशशिकला
व्रजयुवतिलसदलिकगगनगता।
सरसिजनयनहृदयसलिलनिधिं
व्यतनुत विततरभसपरितरलम् ॥ (२१५)

२। स्रगियमपि च रसनवरचितयतिः ॥ (२१६)

---

(२१३) चक्रपदमिति। इह ग्रन्थे भननलगुरुभिः भगणनगण-लययलघुगुरुभिः यस्य पादो भवति तत् वृत्तं चक्रपदं नाम स्यात्।

(२१४) गुर्विति। इह ग्रन्थे गुरुनिधनमनुलघुः गुरुवर्णः निधने अन्ते यस्य तादृशः मनुश्चतुर्दशसंख्य इत्यर्थः लघुवर्णः यत्र प्रतिपाद-मिति शेषः तथाभूता शशिकला नाम वृत्तं स्यात्।

(२१५) उदाहरति मलयेति। व्रजयुवतीनां व्रजाङ्गनानां लसत् विलसत् चारु इत्यर्थः अलिकं ललाटं ललाटमलिकं गोधिरित्यमरः। तदेव गगनमाकाशं तद्वत् तत्र स्थितेत्यर्थः मलयजतिलकं चन्दन-तिलकमेव समुदिता उदयं प्राप्ता शशिकला चन्द्रकला सरसिजनयनस्य पद्मनेत्रस्य कृष्णस्य हृदयमेव सलिलनिधिः सागरः तं विततेन विस्तृतेन रभसेन हर्षेण च रभसो वेगहर्षयोरिति मेदिनी परितरलं परितः सर्वतः तरलं चञ्चलं व्यतनुत अकरोत्। मन्दोदर्धेः पूर इवेन्दुदर्शनात् मुक्तः मन्दर्धेः प्रवभूव गाम्भीर्यमिति रघुवंशः।

(२१६) स्रगियमपि [illegible] शशिकला रसेषु षट्सु नवसु च रविभिः [illegible] यतिर्भवेत् [illegible] स्रक् नाम [illegible]।

Digitized by Google

अयि सहचरि! रुचिरतरगुणमयी
मदिमवसतिरनपगतपरिमला।
स्वगिव निवस विलसदनुपमरसा
सुमुखि! मुदितदनुजदलनहृदये॥ (२१७)

३। वसुमुनियति रिति मणिगुणनिकरः॥ (२१८)

नरकरिपुरवतु निखिलसुरगति-
रमितमहिमभरसहजनिवसतिः।
अनवधिमणिगुणनिकरपरिचितः
सरिदधिपतिरिव धृततनुविभवः॥ (२१९)

---

(२१७) उदाहरति अयीति। अयि सुमुखि! सुवदने! सहचरि! सखि! रुचिरतरगुणमयी अतिसौन्दर्यवतीत्यर्थः अतिशोभनतनुमयी च मदिम्नः मार्दवस्य वसतिराश्रयः अतिकोमलेत्यर्थः अनपगतपरिमला सौरभशालिनीत्यर्थः विलसन् स्फुरन् अनुपमः अतुल्यः रसोऽनुरागः अत्यन्त मकरन्दः यस्मात्तथाभूता स्वगिव माधव सुदितं हृष्टं यत् दनुजदलनस्य कृष्णस्य हृदयं तत्र निवस वासं कुरु। कृष्णं भजेति भावः।

(२१८) वक्ष्यति। इयं मणिगुणा वसुषु अष्टसु मुनिषु सप्तसु यतिर्विरामो यत्र तादृशी चेत् मणिगुणनिकरो नाम वृत्तं स्यात्।

(२१९) उदाहरति नरकेति। निखिलानां सर्वेषां सुराणां देवानां गतिराश्रयः नाथ इति यावत् अमितानाम् अपरिमितानां महिम्नां भरस्य अतिशयस्य सहजनिवसतिः निसर्गसिद्धम् अनवधीनां मणीनां समग्ररत्नानां गुणनिकरैः गुल्फजङ्घादिवर्णैः सौन्दर्यातिशयैश्च परिचितः श्वेतोरक्तसचापीत इदानीं कृष्णतां गत इत्यनेन नामावर्णत्वस्य प्रतिपादितत्वात् सौन्दर्यातिशयवत्त्वाच्च अत्यन्त बहुरत्नाधारत्वादिति भावः विख्यातः शोभितश्चेत्यर्थः सरिदधिपतिरिव समुद्र इव धृतः गृहीतः तस्याः शरीरस्य विभवः महिमा येन तथाभूतः नरक-

Digitized by Google

४। न न म य य युतेयं मालिनी भोगिलोकैः ॥ (२२०)
मृगमदकृतचर्चा पीतकौषेयवासा
रुचिरशिखिशिखण्डावद्धधम्मिल्लपाशा।
अनृजु निहितमंसे वंशमुत्कापयन्ती
धृतमधुरिपुलीला मालिनी पातु राधा ॥ (२२१)

५। एकन्यूनौ विद्युन्मालापादौ चेन्नीलाखेलः ॥ (२२२)
पायादो गोविन्दः कालिन्दीकूलचौणीचक्रे
रासोल्लासक्रीड़न्गोपीभिः सार्द्धं लीलाखेलः।

रिपुः नरकस्य भूमिसुतस्य नरकाणां निरयाणाञ्च रिपुः संहर्त्तेत्यर्थः कृष्णः अवतु रक्षतु।

(२२०) मनेति। मनमयययुता मनग्रहयेन ततो मनखेन ततश्च याभ्यां गणाभ्यां युता भोगिलोकैः भोगिभिरष्टाभिः लोकैः सप्तभिश्च वर्णैः किल्पेति शेषः इयं मालिनी नाम वृत्तं स्यात्।

(२२१) उदाहरति। मृगमदेन कस्तूरिकया कृता चर्चा अङ्गरागो यया यस्या वा तथोक्ता कस्तूरीकृताङ्गरागेत्यर्थः पीतं यत् कौषेयं कृमिकोषोत्थं वासः वसनं यस्याः तथाभूता पीताम्बरेत्यर्थः रुचिरैः मनोज्ञैः शिखिशिखण्डैः मयूरपिच्छैः आवद्धः रञ्जित इति भावः धम्मिल्लः संयतकेशः पाश इव यस्यास्तादृशी धम्मिल्लाः संयताः कचा इत्यमरः। ऋजु यथा तथा अंशे स्कन्धदेशे निहितं वंशं वेणुम् उत्कापयन्ती उच्चैर्वादयन्ती मालिनी धृतमाला अतएव धृता मधुरिपोः कृष्णस्य लीला यया तथाभूता राधा पातु रक्षतु अस्मानिति शेषः।

(२२२) एकेति। विद्युन्मालायाः मो मो गो गो विद्युन्माला इत्युक्तलक्षणायाः पादौ चरणौ एकेन वर्णेन न्यूनौ हीनौ चेत् लीलाखेलो नाम वृत्तं स्यात्।

(२२३) उदाहरति पायादिति। मन्दाकिन्याः स्वर्गङ्गायाः तीरोपान्ते तैरक्रीड़ाभिः खेच्छाविहारिणीभिः खेलनीभिः क्रीड़न्तीभिः

Digitized by Google

मन्दाकिन्यास्तीरोपान्ते खैरक्रीड़ाभिर्लोलो
यद्वद्देवानामीशः सर्वेशाभिः खेलन्तीभिः ॥ (२२३)
मा कान्ते ! पक्षस्यान्ते पर्य्याकाशे देशेस्वाप्सीः
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत् ।
क्षुत्क्षामः प्राटंश्चेतश्चेतो राहुः क्रूरः प्राद्यात्
तस्मादध्वान्ते हर्म्यस्यान्ते ग्रथ्यैकान्ते कर्तव्या ॥ (२२४)
इति कण्ठाभरणः ॥

६ । विपिनतिलकं न स न रेफयुग्मैर्भवेत् ॥ (२२५)
विपिनतिलकं विकसितं वसन्तागमे
मधुव्रतमदैर्मधुकरैः क्वणद्भिर्वृतम् ।

सर्वेशाभिः अशुरोभिः लोलः सामिलाषः सदृष्ण इति यावत् लोल-सलसतृष्णयोरित्यमरः । देवानामीशो देवेन्द्रो बहत् यथा, तथा कालिन्दी यमुना तस्याः कूलकौणीचक्रे तीरभूमौ रासोल्लासेन क्रीड़न्त्यः या गोप्यः ताभिः सार्द्धं लीलया खेलतीति तथाभूतः गोविन्दः कृष्णः वः युष्मान् पायात् अव्यात् ।

(२२४) मा कान्ते इति । हे कान्ते ! पक्षस्य अन्ते पौर्णमास्यवसाने पर्य्याकाशे समन्तात् आकाशमये इत्यर्थः अनावृते इति भावः देशे प्रदेशे इत्यर्थः रात्रौ रजन्यां मा स्वाप्सीः शयनं मा कृथः, शयने विघटमाह कान्तमिति चेत् यदि राहुः क्षुत्क्षामः क्षुधार्त्तः इतश्च इतश्च प्राटन् पर्य्यटन् सन् तव कान्तं कमनीयं वक्त्रं पूर्णं चन्द्रं वृत्तं ज्ञातं मत्वा प्राद्यात् ग्रसेत् । तस्मात् ध्वान्ते तिमिरे अन्धकाराच्छन्ने इति यावत् हर्म्यस्य अट्टस्य अन्ते उपरिदेशे एकान्ते विजने गत्वा शयनं कर्त्तव्या ।

(२२५) विपिनेति । नसनरेफयुग्मैः नगणसगणनगणरगण-युगलैः यस्य पादो भवेत् तत् वृत्तं विपिनतिलकं नाम ।

(२२६) उदाहरति विपिनेति । सुग्धः सुन्दरः मोहनरूप इत्यर्थः

Digitized by Google

मलयमरुता रचितलास्यमालोकयन्
व्रजयुवतिभिर्विहरति स्म मुग्धो हरिः ॥ (२२६)

७। तूणकं समानिकापदद्वयं विनान्तिमम् ॥ (२२७)

सा सुवर्णकेतकं विकाशि भृङ्गपूरितं
पञ्चबाणबाणजालपूर्णहेमतूणकम्।
राधिका वितर्क्य माधवाद्य मासि माधवे
मोहमेति निर्भरं त्वया विना कलानिधे! ॥ (२२८)

८। स्त्री मो यौ चेद्भवेयुः सप्ताष्टकैश्चन्द्रलेखा ॥ (२२९)

हरिः कृष्णः वसन्तागमे मधुना कौसुमेन कृतः मदः उल्लासो येषां तथाभूतैः अतएव कलझङ्किः गुञ्जद्भिः मधुकरैः भ्रमरैः पूतं व्याप्तं विकसितं विपिनतिलकं वनतिलपुष्पं मलयमरुता मलयपवनेन रचितं कृतं लास्यं नर्त्तनं यस्य तादृशं कम्पितमित्यर्थः लास्यं स्त्रियस्तु नर्त्तने इत्यमरः। आलोकयन् पश्यन् व्रजयुवतिभिः गोपीभिः विहरति स्म विजहार।

(२२७) तूणकमिति। अन्तिमम् अन्त्यवर्णं विना अन्त्यवर्णहीन-मित्यर्थः समानिकायाः ग्लौ रजौ समानिका तु इति लक्षणायाः पदद्वयं चरणयुगलं तूणकं नाम वृत्तं स्यात्।

(२२८) उदाहरति सेति। हे कलानिधे! कलानां चतुःषष्टि-विधानां कामविद्यानां निधे आश्रय! अभिज्ञेत्यर्थः माधव! कृष्ण! सा राधा अद्य माधवे वैशाखे मासि त्वया विना तद्विरहेत्यर्थः विकासि विकसरम् अतएव भृङ्गैः पूरितं पञ्चबाणस्य कामस्य सुवर्ण-केतकं स्वर्णकेतकीपुष्पं बाणजालैः शरनिचयैः पूर्णं हेमतूणकं स्वर्ण-तूणीरभूतं वितर्क्य विशेषेण तर्कयित्वा सम्भाव्येत्यर्थः निर्भरम् अति-मात्रं मोहं मूर्च्छाम् एति प्राप्नोति।

(२२९) स्त्रीति। पादे स्त्रौ मगणरगणौ ततः मगणः तदनु

१०। भवति नजौ भजौ र सहितौ (प्रभद्रकम्) ॥(२३३)छ०प०

११। सजना नयौ शरदृशयति रि य (मेला) ॥ (२३४)छ०प०

१२। (चन्द्रकान्ताभिधा) रौ म् सौ यो विरमः खराष्टौ ॥ (२३५)

इति छ० प०

१३। ननतभरक्तताष्ट खरै (रूपमालिनी) ॥ (२३६) छ० प०

१४। (ऋषभाख्य) मेतदुदितं सयसा सयौ चेत् ॥ (२३७)छ०प०

आरण्यसजा वनमालया लसता शोभमानेन मूर्ज्ञा शिरसा चित्रा अद्भुतरूपा कंसारातेः कृष्णस्य मूर्त्तिः यद्वत् यथा वर्त्तते स्फुरति शेषः इयं मूर्त्तिः तद्वत् मे मम हृदि क्रीड़ति, अस्मात् हृदयदेशे स्फुरिमूर्त्ति-क्रीड़नात् स्फुरिस्मरणादिति भावः अन्यः स्वर्गः मोक्षो वा कः विद्यते ? तत् न जाने। एतदेव स्फुरिस्मरणं स्वर्गो मोक्षश्च नान्य इति भावः।

(२३३) भवतीति। नजौ भजौ रसहितौ नगणजगणभगण-जगणरगणाः पादे यदि स्युः तदा तत् वृत्तं प्रभद्रकं नाम भवति।

(२३४) सजना इति। यस्य पादे सजना सगणजगणनगणाः ततो न यौ नगणयगणौ शरेषु पञ्चसु दशसु च यतिर्विरामो यस्मात् तादृशी इयं एवा नाम वृत्तं स्यात्।

(२३५) चन्द्रेति। यस्य पादे रौ रगणौ मसौ मगणसगणौ यस्य यगणश्च, तथा खराष्टौ खरेषु सप्तसु अष्टसु च विरामः विच्छेदः, तदा तत् वृत्तं चन्द्रकान्ता अभिधा नाम।

(२३६) ननेति। नगणद्वय तगणभगणरगणैः कृता रचिता उप-मालिनी नाम वृत्तं स्यात् यत्र अष्टखरैः अष्टाभिः खरैः सप्तभिश्च वर्णैः विराम इत्यर्थः।

(२३७) ऋषभाख्यमिति। चेत् यदि पादे स यस्मा सजौ सगण-यगणसगणेभ्यः परं सजौ गणौ भवतः, तदा एतत् वृत्तम् ऋषभ नाम उदितमुक्तम्।

Digitized by Google

विच्छेदे ते मुरारे ! पाण्डु प्रकाश्या कृशाङ्गी
म्लानच्छायं दुकूलं न भ्राजते बिभ्रती सा ॥
राधाभ्रोदस्य गर्भे लीना यथा चन्द्रलेखा
किञ्चार्त्ता त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम् ॥ (२३०)

९ । चित्रा नाम च्छन्दश्चित्रश्चेत्त्रयो मा यकारौ ॥ (२३१)
गोपालीलीलालोला यदत् कलिन्दात्मजान्ते
खेलन्मुक्ताहारारण्यस्रग्लसन्मूर्द्धचित्रा ।
कंसारातेर्मूर्त्तिस्तदन्मे हृदि क्रीड़तीयं
कोऽन्यः स्वर्गो मोक्षो वास्माद्विद्यते तन्न जाने ॥ (२३२)

यगणद्वयम् एते गणाः भवेयुः चेत् यदि, तदा सप्ताष्टकैः सप्तभिरष्टभिश्च वर्णैर्विच्छिन्ना चन्द्रलेखा नाम वृत्तं स्यात् ।

(२३०) उदाहरति विच्छेदे इति । कृष्णं प्रति कस्याचित् राधासख्या उक्तिः । हे मुरारे कृष्ण ! सा राधा ते तव विरहे पाण्डुः प्रकाश्यः कान्तिर्यस्याः तथाभूता कृशाङ्गी तथा म्लाना मलिना छाया कान्तिः शोभेति यावत् यस्य तादृशः दुकूलं वस्त्रं बिभ्रती परिदधाना न भ्राजते न शोभते । किञ्च आर्त्ता कातरा सती अभ्रोदस्य मेघस्य गर्भे लीना चन्द्रलेखा यथा चन्द्रकलेव त्वां स्मरन्ती ध्यायन्ती जीवयोगं धत्ते प्राणान् धारयति ध्रुवमेतत्प्रेक्षे ।

(२३१) चित्रेति । चेत् यदि त्रयो मा मगणाः यकारौ यगणौ च पादे स्युः, तदा तत् चित्रम् अपूर्वं मनोहरमित्यर्थः छन्दः चित्रा नाम भवति ।

(२३२) उदाहरति गोपेति । कलिन्दस्य सूर्यस्य आत्मजाया यमुनाया अन्ते तटे इत्यर्थः गोपानां गोपबालकानाम् आलीभिः सङ्घैः गवां गोपालीभिः सङ्घैर्वा या लीला विहारः तत्र लीला सामिलाषा खेलन् चलन् दोलायमान इत्यर्थः मुक्ताहारः यत्र तादृशी तथा

१५ । कथयन्ति (मानसहंस) नाम सजौ जभराः ॥ (२३८)
इति छ० प०

१६ । सगणैः शिववक्त्रमितै र्गदिता (नलिनी) ॥ (२३९)छ०प०

१७ । शंस (निशिपालक) मिदं भजसनाश्वरः ॥ (२४०)छ०प०

अष्टिः । [६५५३६]

(षोड़शाक्षरा वृत्तिः)

१ । चित्रसंज्ञमीरितं समानिकापदद्वयन्तु ॥ (२४१)
विद्रुमारुणाधरौष्ठशोभि वेणुवाद्यकृष्ट-
वल्लवीजनाङ्गसङ्गजातमुग्धकण्टकाङ्ग ! ।
त्वां सदैव वासुदेव ! पुण्यलभ्यपाद ! देव ! ।
वन्यपुष्पचित्रकेश ! संस्मरामि गोपवेश ! ॥ (२४२)

---

(२३८) कथयन्तीति । यस्य पादे सजौ सगणजगणौ ततो जभराः जगणभगणरगणाः सन्ति तत् वृत्तं मानसहंस नाम कथयन्ति बुधा इति शेषः ।

(२३९) सगणैरिति । शिववक्त्राभितैः शिववक्त्राणि पञ्च तन्मितैः सगणैः प्रतिपादनीति शेषः यत् वृत्तं सा नलिनी नाम गदिता कथिता ।

(२४०) शंसेति । यस्य पादे भजसना रश्च भगणजगणसगण-नगणरगणाः क्रमेणेत्यर्थः इदं वृत्तं निशिपालकं शंस कथय ।

(२४१) चित्रेति । समानिकापदाः गौ रजौ समानिकाविति यस्यायाः पदद्वयन्तु चरणद्वयमेव एवकारार्थस्तु शब्दः । चित्रसंज्ञं चित्रनामकं वृत्तम् ईरितम् उक्तम् ।

(२४२) उदाहरति विद्रुमेति । विद्रुमः प्रवालः तद्वत् अरुणः रक्तः यः अधरोष्ठः तस्मिन् शोभते इति तथोक्तं यत् वेणुवाद्यं तेन

२। भत्रिनगैः खरात् खमृषभगजविलसितम् ॥ (२४३)
यो हरिरुच्चखान खरतरनखशिखरै-
र्दुर्जयदैत्यसिंहसुविकटहृदयतटम्।
किं त्विह चित्रमेष यदखिलमपहृतवान्
कंसनिदेशदुष्टवृषभगजविलसितम् ॥ (२४४)
गजतुरगविलसितमिति शम्भौ।
३। भात् स म त न गैरष्टच्छेदे स्यादिह चकिता ॥ (२४५)

कृष्णानाम् उल्लसितानां वल्लवीजनानाम् अङ्गसङ्गेन जातम् उत्सवं सुखं सुन्दरं वस्तुकं रोमाञ्चः यस्य तादृशम् अङ्गं यस्य तत्सम्बोधने हे वासुदेव! वसुदेवसुत! हे पुण्यलभ्यपाद! पुण्यैः सुकृतैः लभ्यः पादः यस्य तथाभूतः तत्सम्बुद्धौ, हे देव! हे वन्यपुष्पचित्रवेष! वन्यैः पुष्पैः चित्रा मनोहराः वेषा यस्य तत् सम्बुद्धौ, हे गोपवेष! सदैव सततमेव त्वां संस्मरामि।

(२४३) अत्रेति। अत्रिनगैः भनघरनखगणघटितत्वात् परं गुरुणा ऋषभगजविलसितं नाम वृत्तं स्यात् यत्र खरात् सप्तमवर्णात् परं खं शून्यं यतिरिति यावत्।

(२४४) उदाहरति य इति। यः हरिः खरतरैः तीक्ष्णतरैः नखशिखरैः नखाग्रैः दुर्जयस्य जेतुमशक्यस्य खराक्षरैरयीति शेषः दैत्यसिंहस्य हिरण्यकशिपोः सुविकटम् अतिकठिनं हृदयतटं हृत्-पिण्डम् उच्चखान विददार, एष हरिः अखिलं सकलं कंसस्य निदे-शेन आज्ञया दुष्टयोः सदर्पयोः ऋषभः वृषरूपोऽरिष्टासुरः गजः कुवलयापीडाख्यः तयोः विलसितं विक्रीडितं संग्रामे विचरणमिति यावत् यत् अपहृतवान् नाशयामास इह जगति इदं किं चित्र-माश्चर्यं नु वितर्के। सिंहहन्तुर्गोगजवधो न विस्मयमावहतीति भावः।

(२४५) भादिति। भात् भनघात् परं यमतनगैः यगणमनण-

Digitized by Google

दुर्जयदनुजश्रेणीदुश्चेष्टाशतचकिता
यद्भुजपरिघत्राता याता साध्वसविगमम् ।
दीव्यति दिविषन्माला यश्वन्नन्दनविपिने
गच्छत शरणं कृष्णं तं भीता भवरिपुतः ॥ (२४६)

४ । प्रमाणिकापदद्वयं वदन्ति पद्मचामरम् ॥ (२४७)

सुरद्रुमूल मण्डपे विचित्ररत्ननिर्मिते
लसद्वितान भूषिते सलीलविभ्रमालसम् ।
सुराङ्गनाभ वल्लवीकर प्रपद्मचामर-
स्फुरत् समीर वीजितं सदाच्युतं भजामि तम् ॥ (२४८)

तगणनगणैः ततो गुरुणैकेन पद्म अन्ते चकिता नाम वृत्तं स्यात् अष्टच्छेदे अष्टसु विरामे यतीत्यर्थः ।

(२४६) उदाहरति दुर्जयेति । दुर्जयानां दनुजानां दानवानां श्रेण्या या दुश्चेष्टाः अत्याचाराः तासां शतैः चकिता उपद्रुता दिविषदां देवानां माला गणः यस्य भुजौ एव परिघौ अर्गलौ ताभ्यां त्राता रक्षिता अतएव साध्वसविगमं भयाभावं याता प्राप्ता निर्भयीभूतेति यावत् यश्वत् सततं नन्दनविपिने दीव्यति विहरति, भवरिपुतः संसारशत्रोः भीता यूयं तं कृष्णं शरणं गच्छत प्राप्नुत ।

(२४७) प्रमाणिकेति । प्रमाणिकायाः प्रमाणिका जरौ लगाविति लक्षणायाः पदद्वयं चरणयुगलं पद्मचामरं नाम वृत्तं वदन्ति ।

(२४८) उदाहरति विविधैः विविधैः रत्नैः मण्डिते रञ्जिते लसता शोभमानेन वितानेन चन्द्रातपेन भूषिते सुरद्रूणां देवतरूणां कल्पवृक्षाणामित्यर्थः मूले यत् मण्डपं मन्दिरं तस्मिन् सलीलेन सविलासेन विभ्रमेण भक्तिविशेषेण अलसं मन्थरं सुराङ्गनाभा देवाङ्गनासदृश्यः या वल्लव्यः गोप्यः तासां करप्रपद्मेन यानि चामराणि धृतानि

५। भौ नौ त्री गौ मदनललिता वेदैःषड्तुभिः ॥ (२४९)
विभ्रष्टस्रग् गलितचिकुरा धौताधरपुटा
ग्लायत् पत्रावलिकुच तटोच्छ्वासोर्मितरला।
राधात्यर्थं मदनललितान्दोलाऽलसवपुः
कंसारातेरतिरसमहो चक्रेऽतिचटुलम् ॥ (२५०)
६। नजभजरैः सदा भवति वाणिनी गयुक्तैः ॥ (२५१)

नीति ग्रेषः तेभ्यः स्फुरन् यः समीरः वायुः तेन वीजितं तम् अच्युतं कृष्णं सदा भजामि।

(२४९) भाविति। यस्य भगणभगणौ ततो नगणः तदनु नगण-भगणौ ततश्च गुरुः, तदृत्तं मदनललिता नाम स्यात् तत्र वेदैः चतुर्भिः षड्भिः पुनः षड्भिश्च वर्णैः यतिर्भवति।

(२५०) उदाहरति विभ्रष्टेति। राधा अत्यर्थम् अतिशयेन मदन-ललितेन कामव्यापारेण य आन्दोलः क्षोभः तेन अलसं मन्थरं वपुः शरीरं यस्याः तथाभूता अतएव विभ्रष्टा च्युता स्रक् माल्यं यस्याः तथोक्ता गलितचिकुरा स्खलितकेशा, धौतं क्षालितं रागहीनमित्यर्थः अधरपुटं यस्याः तथोक्ता अधररसपानादिति भावः, तथा ग्लायन्त्यः ग्लानिं गच्छन्त्यः पत्रावल्यः यवोः मर्दनातिशयादिति भावः तथा-भूतयोः कुचतटयोः पयोधरतटयोः उच्छ्वासोर्मिभिः निश्वासभर-चपला क्लान्तिजनितनिश्वासभरेण कम्पितपयोधरेति भावः सती कंसा-रातेः कृष्णस्य अतिचटुलम् अतिचपलं रतिरसं रागातिरेकं चक्रे कृत-वती अहो आश्चर्यं तादृशीं सुरतस्खलितां राधां दृष्ट्वा पुनरपि कृष्णः मन्मथवशंवदोऽभवदिति भावः।

(२५१) नजेति। गयुक्तैः गुर्वक्षरयुतैः नजभजरैः नगणजगण-भगणजगणरगणेभ्यः परं गुरुणा वर्णेनेति यावत् यस्य पादो भवति तत् वृत्तं सदा वाणिनी नाम भवति।

Digitized by Google

स्फुरतु ममाननेऽद्य ननु वाणि ! नीतिरम्यं
तव चरण प्रसादपरिपाकतः कवित्वम् ।
भवजलराशिपारकरणक्षमं मुकुन्दं
सतत महं स्तवैः स्वरचितैः स्तवामि नित्यम् ॥ (२५२)

७ । यमौ नः स्त्रौ गश्च प्रवरललितं नाम वृत्तम् ॥ (२५३)

भुजोत्क्षेपः शून्ये चलबलयझङ्कारयुक्तो
मुधा पादन्यासः प्रकटिततुलाकोटिनादः ।
स्मितं वक्त्रेऽकस्मादृषि पटुकटाक्षोर्मिलीला
हरौ जीयादीदृक् प्रवरललितं वल्लवीनाम् ॥ (२५४)

---

(२५२) उदाहरति । स्फुरत्विति । ननु वाणि ! हे सरस्वति ! अद्य मम आनने तव चरणयोः पादयोः प्रसादस्य कृपायाः परिपाकतः फलेनेत्यर्थः नीतिरम्यं सुनयसम्पन्नं कवित्वं स्फुरतु येन अहं स्वरचितैः स्तवैः स्तुतिवचनैः भवजलराशिपारकरणक्षमं संसाराब्धिमन्तरणकरमित्यर्थः मुकुन्दं कृष्णं सततं नित्यं प्रतिदिनं स्तवामि कीर्त्तयामि ।

(२५३) यमाविति । यस्य पादे यमौ नः यगणमगणनगणा इत्यर्थः ततः स्त्रौ सगणरगणौ तदनु गश्च गुरुश्च, तत् वृत्तं प्रवरललितं नाम भवति ।

(२५४) उदाहरति भुजोत्क्षेप इति । शून्ये आकाशे चलबलयझङ्कारयुक्तः चञ्चलबलयध्वनिसहितः भुजोत्क्षेपः बाहुप्रसारणमित्यर्थः आश्लेषलौल्यादिति भावः । प्रकटितः प्रकाशितः तुलाकोटिनादः नूपुरध्वनियेन तथाभूतः सुधा मिथ्या अकारणमिति यावत् पादन्यासः पदविक्षेपः, अकस्मात् अकारणं सहसेत्यर्थः वक्त्रे वदने स्मितं मन्दहासः तथा दृशि नेत्रे पटुकटाक्षाणां चटुलापाङ्गदर्शनानां या ऊर्मिः परम्परा सैव लीला विलासः ईदृक् इत्यम्भूतं

Digitized by Google

८। द्विगुणितवसुलघुभिरचलधृतिरिह ॥ (२५५)
तरणिदुहितृतटरुचिरतरवसति-
रमरमुनिमुखजनविहितनुतिरिह।
मुररिपुरभिनवजलधररुचितनु-
रचलधृतिरुदयति सुकृतिहृदि खलु ॥ (२५६)

९। गरुडरुतं न जौ भ ज त गा यदा स्युस्तदा ॥ (२५७)
अमरमयूरमानसमुदे पयोदध्वनि-
र्गरुडरुतं मुरारिभुजगेन्द्रसन्नासने।

वल्लवीनां गोपीनां हरौ कृष्णे कृष्णं प्रतीत्यर्थः प्रवरम् उत्कृष्टं मनोहरमित्यर्थः खचितं विचेष्टितविशेषैः जीयात् सर्वोत्कर्षेण वर्त्ततां। सुकुमारतयाङ्गानां विन्यासो खचितं विदुरिति दर्पणः।

(२५५) द्विगुणितेति। इह यत्र द्विगुणिता द्वाभ्यां संख्याता वसवः अष्टौ लघवः लघुवर्णाः तैः षोडशभिर्ह्रस्वैरित्यर्थः अचलधृतिर्नाम वृत्तं स्यात्।

(२५६) उदाहरति तरणीति। तरणिः सूर्यः तस्य दुहिता यमुना तस्यास्तटे रुचिरतरा अतिमनोहरा इत्यर्थः वसतिः आश्रवस्थानं कुञ्जमटकमिति यावत् यस्य तथोक्तः, अमरैः देवैः मुनिभिश्च ऋषिभिस्तैरित्यर्थः जनैः विहिता कृता नुतिः स्तुतिर्यस्य तथोक्तः देवमुनिभिः स्तूयमान इत्यर्थः अभिनवो यो जलधरो मेघः तद्वत् रुचिः कान्तिर्यस्यासावित्थी तनुर्यस्य तथाभूतः नवनीरदकान्तिरित्यर्थः तथा अचला धृतिः सन्तोषो यस्य तथाभूतः वा अचले पर्वते गोवर्द्धने धृतिर्धारणं यस्य तथाविधः मुररिपुः कृष्णः इह जगति सुकृतिनां पुण्यवतां हृदि हृदये उदयति खलु तिष्ठत्येव।

(२५७) गरुडेति। यदा प्राद्दे नजौ भगणजगणौ ततो भजतगाः भगणजगणतगणा गुरुश्च स्युः, तदा गरुडरुतं नाम वृत्तं स्यात्।

(२५८) उदाहरति अमरेति। अमरा देवा एव मयूराः तेषां

Digitized by Google

धरणिभरावतारविधिडिण्डिमाडम्बरः
स जयति कंसरङ्गभुवि सिंहनादो हरेः ॥ (२५८)

१० । संकथिता भरौ नरनगाश्च (धीरललिता) ॥ (२५९)
इति छ० प०

११ । पञ्चभकारयुता (ऽश्वगति) र्यदिचाल्यगुरुः ॥ (२६०)
इति छ० प०

१२ । नजर भभेन गेन च स्यान् (मणिकल्पलता) ॥ (२६१)
इति छ० प०

१३ । यस्मिन् सर्वे गा राजन्ते ब्रह्माद्यं तद् (रूपं) नाम ॥
(२६२) इति छ० प०

मानसस्य चित्तस्य मुदे भक्तानाय पयोदध्वनिः मेघगर्जितं सुरारयः असुरा एव भुजगेन्द्राः नागेन्द्रास्तक्षकादयः तेषां वन्नाशने भीषणे गरुडकृतं गरुडस्य पक्षीन्द्रस्य रवः, तथा धरण्या भरावतारविधौ भार-हरणव्यापारे डिण्डिमाडम्बरः वाद्यविशेषनिस्वनः डिण्डिमः स्यादेक-वादो गुरुवर्ण इत्यमरावली कंसस्य रङ्गभुवि संग्रामाङ्गणे हरेः कृष्णस्य च प्रसिद्धः सिंहनादः जयति ।

(२५८) संकथितेति । यस्य पादे भरौ भगणरगणौ तदन्तु नर-नगाः नगणरगणनगणेभ्यः परं गुरुवर्णः, तदुदितं धीरललिता नाम संकथिता उक्ता ।

(२६०) पञ्चेति । यदि अन्त्योवर्णः गुरुः स्यात् तदा पञ्चभिः भकारैः भगणैः युता अश्वगतिर्नाम वृत्तं स्यात् ।

(२६१) यस्य पादः नजरभभेन गेन च नगणजगणरगणभगण-द्वयात् परं गुरुश्च भवति, तत् वृत्तं मणिकल्पलता स्यात् ।

(२६२) यस्मिन्निति । यस्मिन् पादे सर्वे गा गुरवः राजन्ते तत् वृत्तं ब्रह्माद्यं रूपं ब्रह्मरूपमित्यर्थः नाम स्यात् ।

Digitized by Google

१४। भो रयना नगौ च यस्यां (वरयुवति) रियम्॥ (२६३)

इति छ० प०

अत्यष्टिः। [१३१०७२]

(सप्तदशाक्षरा वृत्तिः)

१। रसै रुद्रैश्छिन्ना य म न स भला गः शिखरिणी॥ (२६४)

करादस्य भ्रष्टे ननु शिखरिणीदृश्यतिशिखो-

र्विलीनाः स्मः सत्यं नियतमवधेयं तदखिलैः।

इति व्रज्यागोपानुचितनिभृतालापजनितं

स्मितं बिभ्रद्देवो जगदवतु गोवर्द्धनधरः॥ (२६५)

२। ज सौ ज स य ला वसुयुगहयतिश्च पृथ्वी गुरुः॥ (२६६)

---

(२६३) भो रयना इति। यस्यां भगणरगणयगणनगणास्ततश्च नगणो गुरुश्च दृश्यं वरयुवतिर्नाम वृत्तं स्यात्।

(२६४) रसैरिति। यस्य पादे यमनसभलागः यगणमगणनगण-सगणभगणेभ्यः परं लघुरेको गुरुश्चैकः, सा रसैः षड्भिः रुद्रैः एका-दशभिश्च छित्वा विच्छेदवती शिखरिणी नाम वृत्तं स्यात्।

(२६५) उदाहरति करादिति। ननु भोः देवेति अतिमहत्त्वा-दतिदुर्वहे शिखरिणि पर्वते गोवर्द्धने इत्यर्थः अस्य अतिशिखोः अति-बाहुकस्य करात् हस्तात् भ्रष्टे पतिते सति विलीनाः स्मः सत्यं वयं निश्चिन्ता भवामो निश्चितं, तत् तस्मात् अखिलैः सर्वैरस्माभिः नियतम् अवश्यम् अवधेयम् अवहितैः भाव्यम्। इतीत्थं व्रजस्थानां विभ्रतां गोपानाम् अनुचितैः अयुक्तैः निभृतैः आलापैः अन्योन्यसंलापैः जनितं स्मितं बिभ्रत् गोवर्द्धनधरो देवः कृष्णः जगत् अवतु रक्षतु।

(२६६) जसाविति। यस्य पादे जसौ जगणसगणौ ततो जस-

दुरन्तदनुजेश्वरप्रकरदुस्थपृथ्वीभरं
जहार निजलीलया यदुकुलेऽवतीर्याशु यः ।
स एष जगतां गतिर्दुरितभारमस्माद्यां
हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ॥ (२६७)

३ । दिङ्मुनि वंशपत्रपतितं भ र न भ न लगैः ॥ (२६८)

नूतनवंशपत्रपतितं रजनिजललवं
प्रश्य मुकुन्द ! मौक्तिकमिवोत्तममरकतगम् ।
एष च तच्चकोरनिकरः प्रपिबति मुदितो
वान्तमवेत्य चन्द्रकिरणैरमृतकणमिव ॥ (२६९)

यत्रा जगणसगणयगणा लघुः गुरुश्च स्यात् तत् वृत्तं वसुषु अष्टसु अङ्केषु नवसु च यतिर्यस्यां तथाभूता पृथ्वी नाम स्यात् ।

(२६७) उदाहरति दुरन्तेति । यः यदुकुले अवतीर्य निजलीलया आशु शीघ्रं दुरन्तानां दनुजेश्वराणां दैत्येन्द्राणां प्रकरेण समूहेन दुस्था या पृथ्वी तस्या भरः तं जहार, जगतां गतिः नाथः स एष हरिः कृष्णः स्तुतयः स्तवाः स्मरणानि च चाटवः प्रियोक्तयः तैः तोषितः तुष्टिं नीतः सन् अस्माद्यां दुरितभारं पापराशिं हरिष्यति नाशयिष्यति ।

(२६८) दिङ्मुनीति । यस्य पादो भरनभनलगैः भगणरगण-नगणभगणनगणेभ्यः परं लघुगुरुभ्यां भवति तत् वृत्तं दिङ्मुनि दशसु सप्तसु च विच्छेदमित्यर्थः वंशपत्रपतितं नाम भवति ।

(२६९) उदाहरति नूतनेति । हे मुकुन्द ! कृष्ण ! नूतनवंशपत्रेषु पतितं रजनिजललवं निशायामिरविन्दुः उत्तममरकतगम् उत्तमं-मरकतस्थितं मौक्तिकमिव पश्य अवलोकय । एष च चकोरनिकरः मुदितः हृष्टः सन् चन्द्रकिरणैः वान्तम् अमृतकणमिव अवेत्य विदित्वा प्रपिबति ।

Digitized by Google

सम्मति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले।
खण्डितविग्रहं बलभिदोधनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः॥ *

इति भारवी।

वंशपत्रपतितेति केचित्॥

४। मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ गौ ययुग्मम्॥ (२७०)
प्रेमालापैः प्रियवितरणैः प्रीणितालिङ्गनाद्यै-
र्मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला।
एवं शिक्षावचनसुधया राधिकायाः सखीनां
प्रीतः पायात् स्मितसुवदनो देवकीनन्दनो नः॥ (२७१)

---

* सम्मतीति दृष्टान्तौ विविधा नानाविधाः शिखरमणीनां पृष्ठस्थितानां रत्नानां रुचः कान्तयः सम्मति शरत्समये इत्यर्थः क्षीण-पयसि जलशून्ये अतएव लघुनि अतएव भिदां भेदम् उपेयुषि प्राप्त-वति जलधरपटले मेघवृन्दे कथमपि शनकैः मन्दं मन्दं सद्यं जन्म यस्य तथोक्तम् उत्पन्नमित्यर्थः खण्डितविग्रहं छिन्नविग्रहं बलभिदः इन्द्रस्य धनुः पूरयितुं सम्पादयितुं विभवः समर्थाः भवन्ति।

(२७०) मन्दाक्रान्तेति। यस्य पादे मगणश्चा भनौ भगणनगणौ ततो गुरुद्वयं तदनु मगणद्वयं तत् वृत्तम् अम्बुधिरसनगैः चतुर्भिः षड्भिः सप्तभिश्च विच्छिन्नं मन्दाक्रान्ता नाम स्यात्।

(२७१) उदाहरति प्रेमालापैरिति। बाला सुग्धा कान्ता प्रेमा-लापैः प्रेमव्यञ्जकवचनैः प्रियाणां वस्तूनां वितरणैः दानैः तथा आलिङ्गनाद्यैः प्रीणिता प्रीतिं गमिता सन्तोषितेत्यर्थः तदनु तदनन्तरं मन्दं यथा तथा न तु द्रुतमिति भावः आक्रान्ता आसक्तिं नीता सती वश्यतां वशंवदताम् एति प्राप्नोति राधिकायाः सखीनाम् एवम्

Digitized by Google

५ । न स म र स ला गः षड्वेदैर्हयैर्हरिणी मता ॥ (२७२)

व्यधित स विधिर्नेत्रं नीत्वा ध्रुवं हरिणीगणाद्
व्रजमृगदृशां सन्दोहस्योल्लसन्नयनश्रियम् ।
यदयमनिशं दूर्वाश्यामे मुरारिकलेवरे
व्यकिरदधिकं बद्धाकाङ्क्षे विलोलविलोचनम् ॥ (२७३)

६ । यदि भवतो न जौ भ ज ज ला गुरु नर्दटकम् ॥ (२७४)

व्रजवनितावसन्तलतिकाविलसन्मधुपं
मधुमथनं प्रणम्रजनवाञ्छितकल्पतरुम् ।

इत्थं चित्तावचनमेव सुधा अमृतं तया प्रीतः अतएव स्मितेन सुन्दरं वदनं यस्य तथाभूतः देवकीनन्दनः कृष्णः नः अस्मान् पायात् रक्षतु ।

(२७२) नसेति । यस्य पादे नसमरसलागः नगणसगणमगणरगण-सगणात्मको लघुरेको गुरुश्चैक इत्यर्थः तत् वृत्तं षड्भिः चतुर्भिः सप्तभिश्च विच्छिन्नं हरिणी नाम मता कथिता ।

(२७३) उदाहरति व्यधितेति । ध्रुवम् उत्प्रेक्षे स विधिः विधाता हरिणीगणात् नेत्रं नीत्वा व्रजमृगदृशां व्रजाङ्गनानां सन्दोहस्य समू-हस्य उल्लसन्ति यानि नयनानि तेषां श्रीः शोभा तां व्यधित कृतवान् । यत् यस्मात् अयं व्रजमृगदृशां सन्दोहः दूर्वाश्यामे दूर्वावत् श्यामले अतएव बद्धा कृता आकाङ्क्षा यस्य तादृशे मुरारिकलेवरे कृष्णदेहे अधिकं विलोलविलोचनं सहृष्णनयनं व्यकिरत् व्यक्षिपत् । दूर्वासु हरीणां दृष्टिः सस्पृहं पततीति भावः ।

(२७४) यदीति । यदि नजौ नगणजगणौ भवतः, तथा भज-जलाः भगणजगणा लघुगुरुश्चैकः प्रतिपादमिति शेषः तदा नर्दटकं नाम वृत्तं स्यात् ।

(२७५) उदाहरति व्रजेति । व्रजवनिताः गोपाङ्गना एव वसन्त-लतिकाः वासन्त्यो लताः तासु विलसन् मधुपः भ्रमरः तं प्रणम्राणां जनानां वाञ्छितकल्पतरुम् अभीष्टप्रदमित्यर्थः विभुं कृष्णं कोऽपि

Digitized by Google

विभुमभिनौति कोऽपि सुकृती मुदितेन हृदा
रुचिरपदावलीघटितनर्दटकेन कविः ॥ (२७५)

७। हयऋतुसागरैर्यतियुतं यदि कोकिलकम् ॥ (२७६)
लसदरुणेक्षणं मधुरभाषणमोदकरं
मधुसमयागमे सरसकेलिभिरुल्लसितम्।
अलिललितद्युतिं रविसुतावनकोकिलकं
ननु कलयामि तं सखि! सदा हृदि नन्दसुतम् ॥ (२७७)

८। वेदर्त्वश्वैर्म भ न म य ला गश्चेत्तदा हारिणी ॥ (२७८)
यस्या नित्यं श्रुतिकुवलये श्रीर्मालिनी लोचने
रागः स्वीयोऽधरकिसलये लाक्षारसारुणम्।

सुकृती पुण्यवान् कविः रुचिरेण मनोज्ञेन पदावलीघटितेन नर्दटकेन छन्दोविशेषेण मुदितेन हृदा अभिनौति अभिष्टौति।

(२७६) हयेति। यदि नर्दटकं हय ऋतुसागरैः सप्तभिः षड्भिः चतुर्भिश्च यतिर्विरामः तद्युक्तं भवति तदा कोकिलकं नाम स्यात्।

(२७७) उदाहरति लसदिति। ननु सखि! लसन्ती अरुणे रक्ते ईक्षणे यस्य तथोक्तं मधुरेण भाषणेन वचनेन यः मोदः सन्तोषः तं करोतीति तथाभूतं मधुसमयागमे वसन्तागमे सरसकेलिभिः मधुरविहारैः उल्लसितम् अलिर्भ्रमरः तद्वत् ललिता मनोहारिणी द्युतिर्यस्य तादृशं श्यामवर्णमित्यर्थः तथा रविसुतायाः यमुनायाः वने कोकिलकं कोकिलसदृशं तं नन्दसुतं कृष्णं हृदि मनसि कलयामि स्मरामि।

(२७८) वेदर्त्वश्वैरिति। चेत् यदि भभनमयला मगणभगणनगणयगणास्ततो लघुः, तदन्तु गुरुर्भवति प्रतिपादमिति शेषः तदा वेदर्त्वश्वैः चतुर्भिः षड्भिः सप्तभिश्च वर्णैः विच्छिन्नं वृत्तं हारिणी नाम स्यात्।

(२७९) उदाहरति। यस्या इति। यस्याः श्रीर्मालिनी स्त्रिया

Digitized by Google

गौरी कान्तिः प्रकृतिरुचिरा रम्याङ्गरागच्छटा
सा कंसारेरजनि न कथं राधा मनोहारिणी ॥ (२७९)

९। भाराक्रान्ता म भ न र स ला गुरुः श्रुतिषड्हयैः ॥(२८०)

भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणात्
कम्पं धत्ते श्रमजलकणं तथा परिमुञ्चति।
इत्याहृष्वन् जयति जलदस्वनाकुलवल्लवी
संश्लेषोत्थं स्मरविलसितं विलोक्य गुरुं हरिः ॥ (२८१)

सौन्दर्येण राजेते शोभेते इति तथोक्ते लोचने नित्यं सततं श्रुतिकुवलये कर्णयोर्नीलोत्पलभूते विभूषणे इत्यर्थः, अधरविसलये अधरपल्लवे स्त्रीयः नैसर्गिकः रागः लाक्षारसैरारञ्जनं तथा प्रकृतिरुचिरा स्वभावरम्या गौरी कान्तिः रम्यस्य अङ्गरागस्य च्छटा दीप्तिः, सा राधा कंसारेः कृष्णस्य मनोहारिणी कथं न अजनि ? अपितु मनोहारिण्येवाजनीत्यर्थः।

(२८०) भाराक्रान्तेति। यस्य पादे मभनरसला मगणभगणनगणरगणसगणास्ततो द्वौ गुरुश्चैकः तत् उक्तं चतुर्भिः षड्भिः सप्तभिश्च वर्णैः विच्छित्तं भाराक्रान्ता नाम स्यात्।

(२८१) उदाहरति हरिः कृष्णः गुरुं पितरं गुरुजनं वा विलोक्य दृष्ट्वा गिरीन्द्रस्य गोवर्द्धनस्य विधारणात् मम इयं तनुः शरीरं भाराक्रान्ता मन्थरेत्यर्थः अतो कम्पं धत्ते धारयति कम्पते इत्यर्थः तथा श्रमजलकणं खेदवारिबिन्दुं परिमुञ्चति त्यजति खेदः स्रवतीति भावः इति इत्थं जलदस्वनेन मेघध्वनिना आकुलानां भीतानां वल्लवीनां गोपीनां संश्लेषोत्थम् आलिङ्गनजातं स्मरविलसितं कामविकारं कम्पादिसात्विकभावमिति भावः आहृष्वन् गोपयन् जयति सर्वोत्कर्षेण वर्त्तते।

Digitized by Google

१०। रसयुगहययुङ् नौ स्त्री सोलगौ हि यदा (हरिः) ॥
(२८२) इति छ० प०

११। भवेत् (कान्ता) युगरसहये र्यभौ नरसालगौ ॥ (२८३)
इति छ० प०

१२। ससजे (रतिभ्रायिनी) भजपरै गुरुभ्याम् ॥ (२८४)
इति छ० प०

१३। अवेहि (पञ्चचामरं) जरौ जरौ जगौलघुश्च ॥ (२८५)
इति छ० प०

धृतिः। [२६२१४४]

(अष्टादशाक्षरा वृत्तिः)

१ स्यादभूतर्त्वग्नैः कुसुमितलतावेल्लिता मृतौ न यौ यौ ॥(२८६)

---

(२८२) रसेति। यदा नौ नगणौ स्त्रौ मगणरगणौ ततः सगणः ततश्च लघुर्गुरुश्चैकः प्रतिपादमिति शेषः तदा रसयुगहययुङ् षड्भिः चतुर्भिः सप्तभिश्च विच्छित्तिभिरित्यर्थः वृत्तं हरिर्नाम स्यात्।

(२८३) भवेदिति। यस्य पादे यभौ यगणभगणौ, नरसा नगण-रगणसगणाः ततो लघुर्गुरुश्चैकः, तत् वृत्तं युगरसहयैः चतुर्भिः षड्भिः सप्तभिश्च विच्छित्तिभिरित्यर्थः कान्ता नाम भवेत्।

(२८४) ससजैरिति। यस्य पादः ससजैः सगणसगणजगणैः भजपरैः ततो भगणजगणाभ्यां ततश्च गुरुभ्यां भवति तत् वृत्तम् अतिभ्रायिनी नाम स्यात्।

(२८५) अवेहीति। यस्य पादे जरौ जगणरगणौ ततश्च जरौ जगणरगणौ, ततो जगौ जगणो गुरुर्लघुश्च, तद्वृत्तं पञ्चचामरम् अवेहि जानीहि।

(२८६) स्यादिति। यस्य पादे मृतौ मगणतगणौ, नयौ नगण-

क्रीड़त् कालिन्दीललितलहरीवारिभिर्दाक्षिणात्यै-
र्वातैः खेलद्भिः कुसुमितलता वेल्लिता मन्दमन्दम्।
भृङ्गाली गीतैः किसलयकरोल्लासितैर्लास्यलक्ष्मीं
तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार॥ (२८७)
ग्राम्याजानूपं पिशितलवणं शुष्कशाकं नवान्नं
गौडं पिष्टान्नं दधि सशर्करं निर्जलं मद्यमल्पम्॥
धाना वल्लूरं समसनमथो गुर्वसाम्यं विदार्हि
स्वप्नश्वारात्री श्वयथुगदवान् वर्जये दङ्गनाञ्च॥ (२८८)

इति वैद्यके।

यगणौ ततौ यौ यगणौ स्तः, तत् वृत्तं भूतर्त्वश्वैः पञ्चभिः षड्भिः सप्तभिश्च विच्छिन्नं कुसुमितलतावेल्लिता नाम स्यात्।

(२८७) उदाहरति क्रीड़दिति। क्रीड़न्त्यः उद्गच्छन्त्यः कालिन्द्याः यमुनायाः या ललित लड़र्यः रुचिरतरङ्गाः तासां वारिभिः जलैः सह खेलद्भिः वहद्भिरित्यर्थः दाक्षिणात्यैः दक्षिणदिग्भवैः वातैः मलयसमीरणैरित्यर्थः मन्दं मन्दं वेल्लिता कम्पिता तथा भृङ्गालीनां मधुकरनिचयानां गीतैः किसलयाः पल्लवा एव कराः तेषाम् उल्लासितैः उत्क्षेपणैः अभिनयैरिति भावः लास्यलक्ष्मीं नर्त्तनश्रियं तन्वाना विस्तारयन्ती कुर्वतीत्यर्थः कुसुमितलता पुष्पितलता चक्रपाणेः कृष्णस्य चेतः मानसं रभसतरलं हर्षलोलं चकार।

(२८८) ग्राम्येति। पिशितं मांसं लवणमिति पिशितलवणं समाहारद्वन्द्वः। ग्राम्यम् अजम् अनूपञ्चेति तथोक्तं तथा च ग्राम्यं छागादिमांसं लवणञ्च यत् पाकेन निर्वृत्तम्, अजं अजजातं कच्छपादिमांसं लवणं साधुवृत्त्या तथा आनूपं शूकरादिमांसं मरुवृत्तीरभवं लवणञ्च सम्भारीति ख्यातं शुष्कं शाकं नवान्नं नवौदनं गौड़ं गुड़निष्पन्नं पिष्टकं सशर्करं शर्करैः तिलतण्डुलादिकृतैः लड्डुकादिभिः सहित-

२। न ज भ ज रैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम् ॥ (२८९)
तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं
मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम्।
सुरहरचित्तचेष्टितकलाकलापसंस्मारकं
क्षितितलनन्दनं व्रज सखे! सुखाय वृन्दावनम् ॥ (२९०)
अहृत धनेश्वरस्य युधि यः समेतमायो धनम्
तमहमितो विलोक्य विबुधैः कृतोत्तमायोधनम्।

मित्यर्थः दधि, क्षिप्तं क्षिप्तिकृत्यं पायसादीत्यर्थः मद्यम् अच्छं धाना अङ्कुरितभृष्टयवान् वल्लूरं शुष्कमांसं समसनं गुरु दुष्पचम् असात्म्यम् असह्यं विदाहि अजीर्णमित्यर्थः द्रव्यम् अरात्रौ दिवसे स्वप्नं निद्राम् अञ्जनां स्त्रियञ्च वयःगुणवान् गोफव्याधियुक् नरः वर्जयेत् त्यजेत्।

(२८९) नजेति। यस्य पादः नजभजरैः रेफसहितैः नगण-जगणभगणजगणेभ्यः परं रगणयुगलेन भवति तत्तृत्तं शिवैरेका-दशभिः हयैः सप्तभिश्च विच्छिन्नमित्यर्थः नन्दनं नाम स्यात्।

(२९०) उदाहरति तरणीति। हे सखे! तरणिसुतायाः यमु-नायाः तरङ्गपवनैः सलीलं यथा तथा आन्दोलितं वीजितं मधुरिपोः कृष्णस्य पादपङ्कजरजोभिः चरणपद्मरेणुभिः सुपूतम् अतिशयेन पवित्रीकृतं पृथ्वीतलं भूमिर्यस्य तादृशं तथा सुरहरस्य कृष्णस्य चित्ता मनोज्ञा या चेष्टितकलाः क्रीड़ाविलसितानि तासां कलापस्य समूहस्य संस्मारकम् अतएव क्षितितलनन्दनं पृथिव्या नन्दनकाननभूतं वृन्दावनं सुखाय व्रज गच्छ।

(२९१) आहृतेति। यः युधि युद्धे समेतमायः मायावी सन्नि-त्यर्थः धनेश्वरस्य कुबेरस्य धनम् अहृत हृतवान् विबुधैः देवैः कृतम् उत्तमम् अत्युत्कटम् आयोधनं युद्धं येन तादृशं निष्कृता निरस्ता

विभवमदेन निष्कृतक्रियातिमात्रसम्पन्नकं
व्यथयति सत्पथादधिगताथ वेह सम्पन्नकम् ॥ (२९१)
इति भट्टौ ।

३ । इह न न र चतुष्कसृष्टन्तु नाराचमाचक्षते ॥ (२९२)
दिनकरतनयातटीकानने चारु सञ्चारिणी
श्रवणनिकटक्लृप्तमेणेक्षणा कृष्ण ! राधा त्वयि ।
मनु विकिरति नेत्रनाराचमेषातिदूरच्छेदनं
तदिह मदनविभ्रमोद्भ्रान्तचित्ता वधत्स्व द्रुतम् ॥ (२९३)
रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां

क्लृप्तेत्यनेन तथाभूतेन विभवमदेन ऐश्वर्यमत्ततया अतिमात्रम् अतिशयेन सम्पन्न एव सम्पन्नकः तं लक्ष्मणमित्यर्थः तं रावणं विलोक्य इतः प्राप्तः आगत इत्यर्थः, अथवा अधिगता प्राप्ता सम्पद् इह जगति कं जनं सत्पथात् साधुमार्गात् न व्यथयति न भ्रंशयति ? अपितु सर्वमेव भ्रंशयतीत्यर्थः ।

(२९२) ननेति । इह छन्दोग्रन्थे ननरचतुष्कसृष्टं नहयात् परं रगणचतुष्टयेन सृष्टं रचितं दृष्टं नाराचम् आचक्षते कथयन्ति ।

(२९३) उदाहरति दिनकरेति । मनु सम्बोधने हे कृष्ण ! दिनकरस्य सूर्यस्य या तनया यमुनानाम्न्यास्तटीकानने तीरनिकुञ्जे चारु सविलासं यथा तथा सञ्चारिणी एणेक्षणा हरिणाक्षी एषा राधा मदनविभ्रमेण कामविलसितेन उद्भ्रान्तं विक्षिप्तमित्यर्थः चित्तं यस्यास्तादृशी सती श्रवणनिकटक्लृप्तम् आकर्णलग्नमित्यर्थः अतिदूरच्छेदनम् अतिशयेन हृदयवेधनं नेत्रनाराचं कटाक्षरूपमस्त्रविशेषं त्वयि विकिरति निक्षिपति, तत् तस्मात् द्रुतं शीघ्रम् अवधत्स्व अवहितो भव प्रतिकुर्वित्यर्थः ।

(२९३) रघुपतिरिति । रघुपतिरपि रामोऽपि जातवेदसि अग्नौ

Digitized by Google

प्रियसुहृदि विभीषणे संक्रमय्य श्रियं वैरिणः।
रविसुत सहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥ (२९४)

इति रघौ।

४। मन्दाक्रान्ता नयुगलजठरा कीर्त्तिता चित्रलेखा ॥ (२९५)

यद्वेऽस्मिन् जगति मृगदृशां सारूपं यदासी-
दाक्रष्टेदं व्रजयुवतिसभा वेधसा सा व्यधायि।
नैतादृक् चेत् कथमुदधिसुतामन्तरेणाच्युतस्य
प्रीतन्तस्यां नयनयुगमभूच्चित्रलेखाङ्कितायाम् ॥ (२९६)

विभुहां प्रियां सीतां प्रष्टुश्च प्रियसुहृदि विभीषणे वैरिणः रावणस्य श्रियं राजलक्ष्मीं संक्रमय्य समर्प्येत्यर्थः रविसुतसहितेन सुग्रीवसहितेन ससौमित्रिणा लक्ष्मणेन तेन विभीषणेन अनुयातः तथा भुजाभ्यां विजितं यत् विमानरत्नं पुष्पकाख्यं देवयानमित्यर्थः तदाधिरूढः सन् पुरीं राजधानीम् अयोध्यां प्रतस्थे।

(२९५) मन्दाक्रान्तेति। मन्दाक्रान्ता मन्दाक्रान्ताम्बुधिरसनगै-र्मोभनौ गौ ययुग्ममित्युक्तलक्षणा नयुगलं नगद्वयं जठरे यस्यास्तादृशी चेत् चित्रलेखा नाम कीर्त्तिता भवति। तथाच मन्दाक्रान्तायां पञ्च-लघुभ्यः परमेको लघुर्देव इति भावः। नभरलघुयुतेत्यपि पाठः तत्र नगशब्दात् परं लघुयुतेत्यर्थः।

(२९६) उदाहरति यद्वे इति। यद्वे उत्प्रेक्षे, अस्मिन् जगति मृगदृशां मृगनयनानां रमणीनां यत् सारूपं सौन्दर्य्यमित्यर्थः। आसीत् वेधसा विधात्रा इदं सारम् आकृष्य संगृह्येत्यर्थः सा व्रजयुवतिसभा व्रजाङ्गनासमाजः व्यधायि विरचिता सृष्टेत्यर्थः। चेत् यदि एतादृक् एष आकारः न भवतीति शेषः, तदा कथम् उदधिसुतां लक्ष्मीम् अन्त-रेण विना अच्युतस्य कृष्णस्य चित्रलेखा चित्रविलिखितं तद्वत् अङ्कितायाम्

Digitized by Google

५। मः सौ जः स त सा दिनेश ऋतुभिः शार्दूलललितम् ॥ (२९७)

ज्ञात्वा कंसमृगे पराक्रमविधिं शार्दूललालितम्
यश्चक्रे क्षितिभारकारिषु दरं चैद्यप्रभृतिषु।
सन्तोषं परमन्तु देवनिवहे त्रैलोक्यशरणं
श्रेयो नः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः ॥ (२९८)

६। मात्सौ जौभरसंयुतौ करिवाणखैः (हरिणप्लुता) ॥ (२९९)

इति छ० प०

आश्चर्यरूपायां तस्यां व्रजयुवतिसभायां नयनयुगं प्रीतमभूत् लक्ष्मी-सौन्दर्य्यादपि व्रजाङ्गनानां सौन्दर्य्यमधिकमिति लक्ष्मीं विहाय कृष्ण-स्यैव अनुरागी आसीदिति भावः।

(२९७) म इति। यस्य पादे मगणसगणजगणाः ततः सगण-तगणसगणाः, तत् इत्तं दिनेशैः सूर्य्यैः द्वादशभिरित्यर्थः ऋतुभिः षड्भिश्च वर्णैः विच्छिन्नमित्यर्थः शार्दूललालितं नाम स्यात्।

(२९८) उदाहरति ज्ञात्वेति। यः कंस एव मृगः कंसमृगः तस्मिन् शार्दूलः व्याघ्रः शार्दूलद्वीपिनौ व्याघ्रे इत्यमरः तद्वत् ललितं सुन्दरं पराक्रमविधिं विक्रमव्यापारं क्षितिभारकारिषु चैद्यप्रभृतिषु शिशु-पालप्रभृतिषु दुर्जनेषु राजसु दरं भयं तथा देवनिवहे देवसमूहे परमं सन्तोषं चक्रे कृतवान् त्रैलोक्यशरणं त्रिभुवनगतिः अपारमहिमा लक्ष्मीप्रियतमः श्रीपतिः सः कृष्णः नः अस्माकं श्रेयः कल्याणं तनोतु विस्तारयतु।

(२९९) मात्स इति। मगणात् सगणः ततो द्वौ जगणौ तदनु मगणरगणौ यस्य पादे स्युः, तत् इत्तं करिवाणखैः अष्टभिः प्रज्ञैः विरामैरुपलक्षितं हरिणप्लुता नाम स्यात्।

Digitized by Google

७। पञ्चभकारयुता (ऽश्वगति) र्यदिचान्त्य सरचिता ॥ (३००)
इति छ० प०

८। (सुधा) तर्वैस्तर्कै र्भवति ऋतुभि र्यौ मो न सतसाः ॥
(३०१) इति छ० प०

९। वर्णाश्वै र्मननतत मकैः कीर्त्तिता (चित्रलेखेयम् ॥(३०२)
इति छ० प०

१०। भादूरनना नसौ (भ्रमरपदक) मिदमभिहितम् ॥
(३०३) इति छ० प०

११। (शार्दूलं) वद मासषट्कयति मः सोजसौ रोमवेत् ॥
(३०४) इति छ० प०

---

(३००) पञ्चेति। पञ्चभिर्भकारैः भगणैः युता यदि च अन्त्ये सरचिता सगणनिर्मिता स्यात् तदा अश्वगतिनाम वृत्तं भवति।

(३०१) सुधेति। यस्य पादे यगणः तदनु नगणसगणतगणसगणाः, तद्वृत्तं तर्वैः तर्वैः षड्भिः षड्भिः तथा ऋतुभिः षड्भिः विच्छिन्नं सुधा नाम स्यात्।

(३०२) वर्णाश्वैरिति। यस्य पादः मगणनगणयुगलतगणयुगलसगणैः, तद्वृत्तं वर्णाश्वैः एकादशभिः सप्तभिश्च वर्णैः छिन्नं चित्रलेखा इयं कीर्त्तिता।

(३०३) भादिति। यस्य पादे भात् भगणात् परं रगणनगणत्रयसगणाः स्युः, इदं वृत्तं भ्रमरपदकम् अभिहितम्।

(३०४) शार्दूलमिति। चेत् यदि मगणः, ततः सगणजगणसगणाजदृत्तं रगणो भगणश्च प्रतिपादमिति शेषः भवति, मासेषु द्वादशसु षट्सु च यतिर्विरामो यत्र तथाभूतं वृत्तं शार्दूलं नाम वद।

Digitized by Google

१२। अर्थाश्वाश्वै र्मभनयरयुगै र्वृत्तं मतं (केसरम्) ॥ (३०५)
इति छ० प०

१३। भौन् जौ भ्रौ चे (च्चल) मिदमुदितं युगैर्मुनिभिःखरैः ॥
(३०६) इति छ० प०

१४। सैका वसुविरति स्तनौ रैश्वतुर्भिर्युता (लालसा) ॥
(३०७) इति छ० प०

१५। भवति नयुगलं रभौ रौ दशभि (र्गजेन्द्रलता) ॥ (३०८)
इति छ० प०

१६। तद्भूतर्त्वश्वै र्मौ भ्मौ विरति श्चेत् (सिंहविस्फूर्जितंयौ ॥
(३०९) इति छ० प०

---

(३०५) अर्थाश्वाश्वैरिति। यस्य पादः भगणभगणनगणभगण-रगणयुगलैः भवति, तत् वृत्तं अर्थाश्वाश्वैः अर्थैः पुरुषार्थैः धर्मकामार्थ-मोक्षैश्चतुर्भिरिति भावः अश्वैः सप्तभिः पुनश्च अश्वैः सप्तभिः विच्छित्तं केसरं नाम मतम्।

(३०६) भ्रावितिं। चेत् यदि भगणभगणनगणजगणभगणरगणाः भवन्ति प्रतिपादमिति शेषः इदं वृत्तं युगैश्चतुर्भिः मुनिभिः खरैः सप्तभिश्च विच्छित्तं चलं नाम उदितम् उक्तम्।

(३०७) सैकेति। तनौ तगणनगणौ ततश्चत्वारो गणाः यस्य पादे भवन्ति, सा एका वसुविरतिः अष्टवर्णविरामो लालसा नाम वृत्तं स्यात्।

(३०८) यस्य पादे नयुगलं रभौ रगणभगणौ ततश्च रगणद्वयं, सा दशभिः वर्णैर्विच्छित्तेति शेषः गजेन्द्रलता नाम वृत्तं भवति।

(३०९) तद्भूतेति। यस्य पादे भगणौ ततो भगणमगणौ ततश्च यगणौ स्तः तत् वृत्तं भूतर्त्वश्वैः पञ्चभिः षड्भिः सप्तभिश्च विरतिश्चेत् तदा सिंहविस्फूर्जितं नाम स्यात्।

Digitized by Google

१७। सौ जजौ भरसंयुतौ करिवाणखै (हरनर्त्तनम्) ॥ (३१०)

इति छ० प०

१८। इदं (क्रीड़ाचक्रं) सदीर्घं समस्तै र्यकारैः समेतम् ॥

(३११) इति छ० प०

१९। वेदाक्रान्तै र्मभनययुगैः स्यादियं (चन्द्रलेखा) ॥(३१२)

इति छ० प०

२०। (हीरक) मुदितं भसनजनै रिहरगणो ऽन्ततः ॥(३१३)

इति छ० प०

अतिधृतिः। [५२४२८८]

(जनविंशत्यक्षरा वृत्तिः)

१। रसर्त्तुखै र्यौनसौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् ॥

(३१४)

---

(३१०) सौविति। यस्य पादे रगणसगणौ ततो जगणद्वयं ततश्च भगणरगणौ, तत् वृत्तं करिवाणखैः अष्टपञ्चपञ्चभिः विच्छिन्नं हरनर्त्तनं नाम स्यात्।

(३११) इदमिति। यस्य पादे यगणः ततो सगणः तदनु यगणत्रयं तत् क्रीड़ाचक्रं नाम वृत्तं स्यात्।

(३१२) वेदाक्रान्तैरिति। यस्य पादः मगणभगणजगणयगणयुक्तश्चेत् भवति इयं चतुर्भिः सप्तभिश्च विच्छिन्ना चन्द्रलेखा नाम स्यात्।

(३१३) हीरकमिति। इह छन्दोपन्थे यस्य पादः भगणसगणनगणजगणनगणयुक्ततो रगणः, तत् वृत्तं हीरकं नाम उदितं कथितं स्यात्।

(३१४) रसेति। यस्य पादे यगणमगणौ ततः नगणरगणौ ततो

Digitized by Google

कदम्बामोदाढ्या विपिनपवनाः केकिनः कान्तकेकाः
विनिद्राः कन्दल्यो दिशि दिशि मुदा दर्दुरा हृष्टनादाः।
निशा नृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिता चेत्
प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात्किमन्यत् ॥(३१५
उदञ्चत्कावेरीलहरिषु परिष्वङ्गरङ्गे लुठन्तः
कुह्वकण्ठी कण्ठीरवरवलवत्रासितप्रोषितेभाः।
अमी चैत्रे मैत्रावरुणितरुणी केलिकङ्केलिमल्ली
चलद्वल्लीहल्लीसकसुरभयश्चण्डि! चञ्चन्ति वाताः ॥ (३१६)

इति कस्यचित् ॥

रगषड्दयं ततश्च गुरुः, तत् दृत्तं रसर्त्वब्धैः रसैः षड्भिः ऋतुभिः षड्भिः अश्वैः सप्तभिश्च विच्छित्तं मेघविस्फूर्जिता नाम स्यात्।

(३१५) उदाहरति कदम्बेति। विपिनपवनाः वनवायवः कदम्बानां नीपकुसुमानाम् आमोदेन सौरभेण च आढ्याः युक्ताः, केकिनः मयूराः कान्ता रम्याः केकाः स्वरविशेषाः येषां तथाभूताः, कन्दल्यः भूमिकदलीविशेषाः विनिद्राः विकसिताः, दर्दुराः भेकाः दिशि दिशि प्रतिदिशं हृष्टाः उद्गताः नादाः ध्वनिः येषां तथाभूताः, निशा रजनी नृत्यन्तीनां विद्युतां सौदामिनीनां विलसितेन स्फुरणेन सहिताः दीप्यमानैः मेघैः विस्फूर्जिता ध्वनिता तदेवं समये चेत् यदि असौ दनुजदलनः कृष्णः प्रियः स्वाधीनः वशे वर्त्तते इति भावः तदा अस्मात् सुखादिति शेषः अन्यत् परं राज्यं राजत्वसुखं किम् ? न किमपीत्यर्थः। कस्यचित् गोप्या उक्तिरियम्।

(३१६) उदञ्चदिति। हे चण्डि! अतिकोपने! चण्डस्त्वत्यन्तकोपन इत्यमरः। चैत्रे मधौ उदञ्चन्त्यः उच्छलन्त्यः कावेर्यां नद्यां या लहर्यस्तरङ्गाः तासु परिष्वङ्गः आश्लेषः, स एव रङ्गः विलासः तस्मिन् तदर्थमित्यर्थः लुठन्तः एतेनैषां शैत्यं दर्शितम्। कुह्वकण्ठी कोकिला

२। भवेल्लेव च्छाया तयुगगयुता स्यादहादग्रान्तेयदा॥ (३१७)
अभीष्टं लुष्टो यो वितरति लसद्दोश्चारुग्राखोज्ज्वलः
स्फुरन्नानारत्नस्तवकिततनुश्चित्रांशुकालम्बितः।
न यस्याङ्घ्रेश्छायामुपगतवतां संसारतीव्रातप-
स्तनोति प्रोत्तापं स जगदवतात् कंसारिकल्पद्रुमः॥ (३१८)

सैव कण्ठीरवः सिंहः तस्य रवेणेव शब्देनेवापि त्रासिता भीषिता प्रोषिता विरहिण्य एव दृभा हरिणः यैः तथाभूताः एतेन उद्दीपक-त्वोक्त्या वायूनां मान्द्यं सूचितम्। तथा मेघावरुद्धेः अगस्त्यस्य तरुणी कान्ता लोपामुद्रेति यावत् तस्याः केलिकदम्बैः क्रीड़ा-प्रोक्तरुः मल्ली मल्लिका, चम्पकश्च चम्पका ताभां कल्पीवर्कं कल्पं कल्पनमित्यर्थः तेन सुरभयः सुगन्धाः एतेन सौगन्ध्यं सूचितम्। तदेवं त्रिविधगुणयुक्ता वाताः वान्ति वहन्ति तस्मात् मानं त्यजेति भावः।

(३१७) भवेदिति। सैव मेघविस्फूर्जितैव यदा यदि द्वादशान्ते द्वादशवर्णान्ते तगणद्वयेन ततो गुरुणा युता स्यात् तदा छाया नाम वृत्तं भवेत्।

(३१८) उदाहरति अभीष्टमिति। लसद्भिर्विराजद्भिः दोर्भिः भुजैरेव चारुग्राखाभिः उज्ज्वलः स्फुरद्भिर्दीप्यमानैर्नानारत्नैः खचिता रञ्जिता तनुः मूर्त्तिर्यस्य तथाभूतः तथा चित्रांशुकैः विचित्रवसनैः आलम्बितः आवृतः यः लुष्टः सेवितः मनु अभीष्टं फलमिति शेषः। वितरति ददाति, यस्य चक्रुः चरणस्य मूलस्य च छायां आश्रयम् अनातपञ्च उपगतवतां प्राप्नवतां संसार एव तीव्रः उत्कटः आतपः घोरताप इत्यर्थः प्रोत्तापं प्रकटम् आध्यात्मिकादितापम् उत्तापञ्च न तनोति न विस्तारयति अपितु निवारयतीति भावः स कंसारिः कृष्ण एव कल्पद्रुमः जगत् अवतात् रक्षतु।

Digitized by Google

३। सूर्याश्वैर्मः स ज स्ताताः सगुरवः शार्दूलविक्रीड़ितम् ॥ (३१९)

गोविन्दं प्रणमोत्तमाङ्ग ! रसने ! तं घोषयाहर्निशं
पाणी ! पूजयतं मनः ! स्मर पदे ! तस्यालयं गच्छतम् ।
एवञ्चेत् कुरुताखिलं मम हितं श्रीर्षोदयस्तद्ध्रुवं
न प्रेक्षे भवतां कृते भवमहाशार्दूलविक्रीड़ितम् ॥ (३२०)

४। म्नौभ्नौ यो नो गुरुश्चेत् स्वरमुनिकरणैराह सुरसाम् ॥ (३२१)

कामक्रीड़ासतृष्णो मधुसमयसमारम्भरभसात्
कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदयः ।

---

(३१९) सूर्याश्वैरिति । यस्य पादे मसजजताः सगुरवः मगण-सगणजगणसगणतगणहयात् परं गुरुः, तत् वृत्तं सूर्याश्वैः द्वादशभिः सप्तभिश्च विच्छिन्नमित्यर्थः शार्दूलविक्रीड़ितं नाम स्यात् ।

(३२०) उदाहरति गोविन्दमिति । हे उत्तमाङ्ग ! शिरः ! त्वं गोविन्दं कृष्णं प्रणम, हे रसने ! जिह्वे ! त्वं तं गोविन्दम् अहर्निशं सततं घोषय वद । हे पाणी भुजौ ! युवां गोविन्दं पूजयतं, हे मनः त्वं गोविन्दं स्मर चिन्तय, हे पाद ! चरणौ ! युवां तस्य गोविन्दस्य आलयं मन्दिरं गच्छतः । हे श्रीर्षोदयः उत्तमाङ्गादयः ! चेत् यदि यूयम् एवम् इत्थं पूर्वोक्तप्रकारं मम हितं कुरुथ, तत् तदा ध्रुवं निश्चितं भवतां कृते साङ्घ्रये इति भावः भवः संसार एव महा-शार्दूलः दृष्टव्याघ्रः तस्य विक्रीड़ितं विचेष्टितं न प्रेक्षे न पश्यामि ।

(३२१) म्नाविति । यस्य पादे मगणरगणौ भगणनगणौ ततो यगणनगणौ ततश्च चेत् यदि गुरुः भवति, तदा स्वरमुनिकरणैः सप्तभिः सप्तभिः पञ्चभिश्च विच्छिन्नं सुरसां नाम वृत्तम् आह कथयति ।

(३२२) उदाहरति कामक्रीड़ेति । असौ गोविन्दः कृष्णः मधु-

Digitized by Google

गोविन्दो वल्लवीनामधररससुधां प्राप्य सुरसां
यद्वे पीयूषपानैः प्रचयकृतसुखं व्यस्मरदसौ ॥ (३२२)
५। मो गौ नौ तौ गौ स्वरहयतुरगैः फुल्लदाम प्रसिद्धम् ॥
(३२३)

यश्चक्षोकानां प्रकटितकदनं ध्वस्तमालोक्य कंसं
हृष्यच्चेतोभिस्त्रिदिववसतिभिर्व्योमसंस्थैर्विमुक्तम् ।
मुग्धामोदेन स्थगितदशदिगाभोगमाकृतभृङ्गं
मौली दैत्यारेर्न्यपतदनुपमं स्वस्तरोः फुल्लदाम ॥ (३२४)

सगणस्य वसन्तकाकस्य यः समारम्भः उदयः तेन यः रभसः हर्षः उल्लास इति यावत् रभसो वेगहर्षयोरित्यमरः । तस्मात् कामक्रीडायां सुरतविहारे सक्तस्य सम्भिलाषः अतएव कालिन्द्यां यमुना तस्याः कूले तीरे यत् कुञ्जं लतादिभिश्छन्नं वनं तस्मिन् निकुञ्जकुञ्जौ वा क्लीबे लतादिभिश्छन्नोदरे इत्यमरः । विकसत्प्रकृतत्वेन विकारौत्सुक्येन आकृष्टं हृदयं यस्य तथाभूतः सन् वल्लवीनां गोपीनां सुरसां मधुराद्याम् अधररसमुधां प्राप्य पीयूषस्य अमृतस्य पानैः प्रचुरम् अत्यन्तं कृतम् अनुभूतं सुखं व्यस्मरत् विसस्मार इति यद्वे उत्प्रेक्षे ।

(३२३) भोगाविति । यस्य पादे मगणो गुरुहयं ततो नगणौ ततस्तगणो ततश्च गुरुहयं भवति तत् वृत्तं स्वरहयतुरगैः पञ्चभिः सप्तभिश्च विच्छिन्नं फुल्लदामनाम प्रसिद्धं विख्यातं भवति ।

(३२४) उदाहरति यश्चक्षोकानामिति । यश्चत् सततं लोकानानां जगतां प्रकटितं कृतं कदनं पीडनं येन तादृशं कंसं ध्वस्तं निहतमालोक्य हृष्यत् हर्षं भजत् चेतो येषां तथोक्तैः प्रीतैरित्यर्थः व्योमसंस्थैः अन्तरीक्षचारिभिः त्रिदिवं स्वर्गः वसतिर्येषां तैः स्वर्गवासिभिर्देवैः विमुक्तं पुष्पं सुखेन सुन्दरेण आमोदेन स्थगितः पूरितः दशदिशानाम् आभोगः विस्तारः येन तथाभूतम् आभोगः परिपूर्णतेत्यमरः । आकृता

६। नयुगलगलघु निरन्तरौ यदा स (पञ्चचामरः) ॥ (३२५)
इति छ० प०

७। वृत्तं (विम्बाख्यं) शरमुनितुरगे र्मौ तौ नसौ ततो चेद्गुरुः ॥
(३२६) इति छ० प०

८। रसैः षड्भि र्लोकै र्यमनसजजा गुरु (मकरन्दिका) ॥
(३२७) इति छ० प०

९। वृनाश्वैः स्याद् यभनयजजगाः कीर्त्तिता (मणिमञ्जरी) ॥
(३२८) इति छ० प०

भृङ्गा भ्रमरा येन तथाभूतम् अनुपमम् अतुल्यं खसरोः स्वर्गतरोः पारिजातस्य फुल्लं विकसितं दाम मालां दैत्यारेः कृष्णस्य मौलौ शिरसि न्यपतत् निपपात।

(३२५) न युगलेति। यदा न युगलगलघु नगद्वयात् परं गुरुर्लघुश्च निरन्तरः तदा स पञ्चचामरः नाम वृत्तं स्यात्।

(३२६) वृत्तमिति। यस्य पादे मतौ मगणतगणौ नसौ नगणसगणौ ततः तगणद्वयं तदन्ते गुरुश्चेत् भवति तत् वृत्तं शरमुनितुरगैः पञ्चभिः सप्तभिः सप्तभिश्च विच्छिन्नं विम्बाख्यं विम्बं नाम स्यात्।

(३२७) रसैरिति। यस्य पादे जगणभगणनगणसगणेभ्यः परं जगणद्वयं ततश्च गुरुर्भवति, तद्वृत्तं रसैः षड्भिः षड्भिः लोकैः सप्तभिश्च विच्छिन्नमित्यर्थः मकरन्दिका नाम स्यात्।

(३२८) वृनाश्वैरिति। यस्य पादे यभनयजजगाः यगणभगणनगणयगणजगणद्वयात् परं गुरुः भवति तत् वृत्तम् वृनाश्वैः वृनैः स्वर्यैः द्वादशभिरित्यर्थः तथा अश्वैः सप्तभिश्च विच्छिन्नं मणिमञ्जरी नाम कीर्त्तिता स्यात्।

Digitized by Google

१०। गजाश्वितुरगैर्जसौ जसतभागश्चेत् (समुद्रतता) ॥(३२९)
इति छ० प०

वृत्तिः। [१०४८५७६]
(विंशत्यक्षरा वृत्तिः।)

१। श्रेया सप्ताश्वषड्भिर्मरभनययुताभ्भौ गः सुवदना ॥
(३३०)

प्रत्याकृत्येन्द्रियाणि त्वदितरविषयान्नासाग्रनयना
त्वां ध्यायन्ती निकुञ्जे परतरपुरुषं हर्षोत्पुलका।
आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका
कामार्त्तिं त्वत्कुकामा ननु नरकरिपो! राधा मम सखी ॥
(३३१)

---

(३२९) गजेति। यस्य पादे जसौ जगच्चसगश्चौ ततो जसतभाः जगणसगणतगणभगणाः ततश्च चेत् यदि गुरुः, तदा तद्वृत्तं गजाश्वितुरगैः अष्टभिः चतुर्भिः सप्तभिश्च विच्छिन्नं समुद्रतता नाम स्यात्।

(३३०) श्रेयेति। यस्य पादे मरभनययुता भौ गः मगणरगणभगणनगणयगणेभ्यः परं भगणो लघुर्गुरुश्च, तत् वृत्तं सप्ताश्वषड्भिः सप्तभिः सप्तभिः षड्भिश्च वर्णैः विच्छिन्नमित्यर्थः सुवदना नाम श्रेया।

(३३१) उदाहरति प्रत्याकृत्येति। ननु सम्बोधने। हे नरकरिपो! कृष्ण! या मम सखी सुवदना राधा कामार्त्तिं मदनपीडां त्वत्कुकामा सती त्वत्तः इतरः अन्यः यो विषयः इन्द्रियग्राह्यपदार्थः तस्मात् इन्द्रियाणि चित्तवृत्तीरित्यर्थः आकृत्य निवार्येत्यर्थः नासाग्रे नयनं यस्यास्तथाभूता परतरपुरुषं परमात्मानं परपुरुषञ्च त्वां निकुञ्जे ध्यायन्ती चिन्तयन्ती अतएव हर्षेण आनन्देन उत्फुल्लानि पुलकानि यस्याः तथोक्ता रोमाञ्चितकलेवरेत्यर्थः तथा आनन्दाश्रुभिः प्लुते

२ । स ज जा भ रौ स ल गा यदा कथिता तदा खलु गीतिका ॥ (३३२)

करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा
रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा ।
बहुलानुरागनिवासरासससुद्भवा भवरागिणं
विदधौ हरिं खलु वल्लवीजनचारु चामरगीतिका ॥ (३३३)

इति महाकाव्ये ॥

३ । वृत्तमीदृग्यन्तु नामतो रजौ रजौ रजौगुरुर्लघुश्च ॥ (३३४)

आच्छन्ने अक्षिणी यस्याः तादृशी अतएव योगः समाधिः तत्र यः एकोऽद्वितीयः रसः रागः तं वेत्तीति तथाभूता वसति तिष्ठति ।

(३३२) सजसा इति । यदा सजसाः सगणजगणसगणाः ततो भरौ भगणरगणौ ततश्च सलगाः सगणो लघुर्गुरुश्च प्रतिपादमिति शेषः तदा गीतिका नाम वृत्तं कथिता खलु ।

(३३३) उदाहरति करतालेति । करतालैः चञ्चलानां कङ्कणानां करभूषणविशेषाणां स्वनेन झङ्कारेण यत् मिश्रणं सम्मेलनं तेन मनोरमा मनोहारिणी रमणीयो यो वेणुनिनादः वंशीरवः तस्य रङ्गिमा लालित्यं तस्य सङ्गमेन योगेन सुखावहा प्रीतिदायिनीत्यर्थः । बहुलस्य समधिकस्य अनुरागस्य प्रेम्णः निवासेन आश्रयेण यः रासः तेन ससुद्भवा समुत्पन्ना वल्लवीजनानां व्रजाङ्गनानां चारुचामरगीतिका मधुरविचित्रगीतिका समवेतभङ्गीत्यर्थः चामरन्तु प्रकीर्णकमित्यमरः । हरिं कृष्णं भवरागिणं संसारानुरागवन्तं विदधौ खलु चकारैव परमसुखस्थानं संसार इति निर्द्धारयामासेति फलितार्थः ।

(३३४) वृत्तमिति । यस्य पादे रजौ रजौ रजौ रगणात् परं लगयः, इत्थं वारत्रयं ततो गुरुः लघुश्च भवति, ईदृशं वृत्तं नामतः नाम्ना वृत्तं स्यात् ।

Digitized by Google

चित्रवृत्तिलीलया निसर्गरम्यदेहरूपविभ्रमेण
राजमानसहयोविलाससम्मदा कलाकुतूहलेन।
यः समं व्रजाङ्गनाजनैः सुराङ्गनानिभैः सुखं समेत्य
विष्णुरत्रलास चित्तपद्मकोषषट्पदः स मे सदास्तु ॥(३२५
४। रसाश्वाश्वैः शोभानयुगगजठरा मेघविस्फूर्जिता चेत् ॥
(३२६)
सदा मूलोन्मीलत्सरसिजयुगला मध्यनस्रा फलाभ्यां
तयोरूर्ध्वं राजत्तरलकिसलयाश्लिष्टसस्निग्धशाखा।

---

(३२५) उदाहरति चित्रेति। यः चित्रम् अद्भुतं वृत्तं चरितं यस्यां तादृशी या शोभा विलासः तया राजमानस्य शोभमानस्य सहयसः यौवनस्य विलास एव सम्मद् तया, निसर्गरम्यं स्वभावमनोहरं यद् देहस्य शरीरस्य रूपं सौन्दर्यं तस्य विभ्रमेण विलासेन, तथा कलासु चतुःषष्टिविधासु कलागीतादिविद्यासु कुतूहलेन सुराङ्गनानिभैः देवाङ्गनासदृशैः व्रजाङ्गनाजनैः समं सह सुखं समेत्य सङ्गत्य उल्लासाय विलजहार, स विष्णुः कृष्णः सदा सततं मे मम चित्तस्य मनस एव पद्मकोषस्य षट्पदः भ्रमरः अस्तु भवतु सदा मच्चित्ते तिष्ठतीति भावः।

(३२६) रसेति। चेत् यदि मेघविस्फूर्जिता रसर्त्वश्वैः वेदौ म्रौ ररगुरुयुतौ मेघविस्फूर्जिता स्यादित्युक्तलक्षणया न युगगजठरा नगद्वयं गुरुश्च जठरे मध्ये यस्यास्तादृशी भवति तदा तत् वृत्तं रसाश्वाश्वैः षड्भिः सप्तभिः सप्तभिश्च विच्छिन्नमित्यर्थः शोभा नाम स्यात्। तथाच मेघविस्फूर्जितायाः नगणस्थाने नगणः ततश्च गुरुश्चेत् शोभा भवतीति भावः।

(३२७) उदाहरति सदेति। सदा सततं मूले उन्मीलत् सरसिजयुगलं पद्मद्वयं सरसयुगलमिति भावः यस्यास्तथोक्ता, फलाभ्यां स्तनाभ्यामिति भावः मध्ये नम्रा विनता, तयोः फलयोः ऊर्ध्वं उपरि

लसन्मुक्तारक्तोत्पलकुवलयवच्चन्द्रविम्बान्वितार्था
महाशोभा मौली मिलदलिपटलैः कृष्ण ! सा कापि वल्ली ॥
(३३७)

५ । ख्याता पूर्वैः (सुवंशा) यदिमरभना सहयं गो गुरुश्च ॥
(३३८) इति छ० प०

६ । सभरा स्त्री यलगा स्त्रयोदशयति (मत्तेभविक्रीडितम्) ॥
(३३९) इति छ० प०

प्रकृतिः । [२०९७१५२]
(एकविंशत्यक्षरा वृत्तिः ।)

राजन्तौ तरुणिवरुचयौ चञ्चलनवपल्लवौ करावितिभावः यस्याः तथाभूता आश्लिष्टे युक्ते स्निग्धे सुकोमले भाले मुखावितिभावः यस्याः तादृशी । लसन्ति शुक्ला रक्तोत्पलकुवलयानि इन्दौ यत्रेत्याश्रीति भावः विद्यन्ते अस्मिन्निति तथोक्तं यत् चन्द्रविम्बं मुखमितिभावः तेन अन्वितं शोभितम् अर्थः यस्याः तथाविधा तथा मौलौ शिरसि मिलद्भिः सङ्कलद्भिः अलिपटलैः भ्रमरपुञ्जैः केशनिवहैरितिभावः महती शोभा यस्यास्तादृशी कापि अनिर्वचनीया वल्ली लता सा राधेतिभावः दृष्टव्या त्वयेति शेषः । अत्रातिशयोक्तिरलङ्कारः ।

(३३८) ख्यातेति । यदि मरभना मगणरगणभगणनगणाः ततः सहयं सगणयुगलं ततश्च गुरुद्वयं प्रतिपादमिति शेषः तदा तदुक्तं पूर्वैः पण्डितैरिति शेषः सुवंशा ख्याता कथिता ।

(३३९) सभरा इति । यस्य पादे सभराः सगणभगणरगणाः ततो स्त्री नगणभगणौ ततश्च यगणः सप्तदश वर्णाः, तत् उक्तं स्त्रयोदशयतिर्विरामो यत्र तथाभूतं मत्तेभविक्रीडितं नाम स्यात् ।

Digitized by Google

१। स्रग्वैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्॥

(३४०)

व्याकोषेन्दीवराभा कनककमलसत्पीतवासाः सुहासा
वर्हैरत्युच्चकान्तैर्वलयितचिकुरा चारुकर्णावतंसा।
अंसव्यासक्तवंश्यीध्वनिसुखितजगद्वल्लवीभिर्लसन्ती
मूर्त्तिर्गोपस्य विष्णोरवतु जगति नः स्रग्धरा हारिहारा॥

(३४१)

२। न ज भ ज जा ज रौ यदि तदा गदिता सरसी कवीश्वरैः॥ (३४२)

---

(३४०) स्रग्वैरिति। मगणरगणभगणनगणेभ्यः परं यगणत्रयं यस्य पादे भवति, सा इयं त्रिसुनि यतियुता त्रिभिः सप्तभिः विच्छित्तेरर्थः स्रग्धरा नाम वृत्तं कीर्तिता कथिता।

(३४१) उदाहरति व्याकोषेति। व्याकोषेन्दीवराभा विकसितनीलोत्पलकान्तिः कनककमलवत् कमितस्वर्णवत् लसत् विराजत् पीतं वासः वसनं यस्याः तादृशी कनकरुचेति पाठे तप्तकाञ्चनवदित्यर्थः। सुहासा चारुहासिनी उच्चकान्तैः उत्तिलचन्द्रकैः अतएव कान्तैः मनोज्ञैः वर्हैः मयूरपिच्छैः वलयितः, वद्धः चिकुरः केशः यस्याःतथाभूता चारुमनोज्ञाः कर्णावतंसाः कर्णभूषणं यस्याः तथोक्ता अंसे स्कन्धदेशे व्यासक्ता या वंश्यो वेणुः तस्या ध्वनिना निनादेन सुखितं जगत् यया तादृशी वल्लवीभिर्गोपाङ्गनाभिः लसन्ती विराजन्ती स्रग्धरा मालाधारिणी हारी मनोहारी हारो यस्यास्तथाभूता गोपस्य गोपालकस्य विष्णोः कृष्णस्य मूर्त्तिः जगति नः युष्मान् अवतु रक्षतु।

(३४२) नजेति। यदि नजभजजा नगणजगणभगणजगद्वयं ततः जरौ जगच्चरणौ तदा तदुक्तं कवीश्वरैः श्रेष्ठैः कविभिः सरसी नाम गदिता कथिता।

Digitized by Google

चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्मिषु
स्फुटदनाम्बुजासु विलसद्भुजबालमृणालवल्लिषु ।
कुचयुगचक्रवाकमिथुनानुगतासु कलाकुतूहली
व्यरचयदच्युतो व्रजमृगीनयनासरसीषु विभ्रमम् ॥ (३४३)
तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ।
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय-
श्चिरगलितश्रियो जलनिधेश्च तदाऽभवदन्तरं महत् ॥ (३४४)

इति माघे ॥

—०—

---

(३४३) उटाङ्करति चिकुरेति । कलाश्च रूप्यादिकाश्च चतुःषष्टि-विधाश्च कुतूहली कौतुकवान् अच्युतः कृष्णः चिकुरकलापाः केशपाशा एव शैवलानि तैः जनितः प्रमदो हर्षातिशयः याभिः तथोक्तासु लसन्त्यः स्फुरन्त्यः रसा रागा एव ऊर्मयः जलतरङ्गा यासां तासु कुचयुगान्येव चक्रवाकमिथुनानि चक्रद्वन्द्वानि तैः अनुगतासु युक्तासु व्रजमृगीनयनाः व्रजाङ्गना एव सरसः तासु विभ्रमं विकारं व्यरचयत् विशेषेण कृतवानित्यर्थः । साङ्गरूपकमिदं तदुक्तं दर्पणे । अङ्गिनो यदि साङ्गस्य रूपणं यत् तत्तदेव स्फीति ।

(३४४) तुरगेति । परितः सर्वतः तुरगशतैः अश्वसहस्रैरित्यर्थः आकुलस्य व्याप्तस्य अपरिमितास्ववलस्येति यावत् प्रतिपथं प्रतिमार्गं प्रमथिताः क्षोभिता दलिताश्च भूभृतः राजानः पर्वताश्च येन तथा-भूतस्य सततं धृता श्रीः शोभा लक्ष्मीश्च येन तादृशस्य पुरः अग्रतः नगराद्वा परिचलतः गच्छतः बलानुजः कृष्णः तस्य बलस्य सैन्यस्य बलं सैन्ये बलो राम इति यावत् । परं केवलम् एकस्यैव तुरङ्गस्य अश्वस्य जन्य उत्पत्तिमात्रं यस्मात् तथोक्तस्य एकोऽपि जात एव सन्

आकृतिः। [४१८४३०४]

(द्वाविंशत्यक्षरा वृत्तिः)

१। मौ गौ नौ यत्वारो गो गो वसुभुवनयतिरिति भवति हंसी॥ (३४५)

सार्द्धं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती
कामक्रीड़ाकूतस्फीतप्रमदरसरभसमलघु रसन्ती।
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसारातेः! पश्य स्वेच्छं सरभसगतिरिह विलसति हंसी॥
(३४६)

साध्यतमस्तीति भावः मन्थनसमये उच्चैःश्रवस एव जातत्वादिति भावः। मद्दीभूता मन्दरेण मथितस्य आलोड़ितस्य तथा चिरं विगता श्रीर्लक्ष्मीर्यस्मात् मन्थनकाले लक्ष्मीरुत्पन्नैव नारायणमाश्रितेति भावः तादृशस्य जलनिधेः वसुद्रस्य तदा हरिप्रस्थानसमये महत् अन्तरं दूरगमनात् व्यवधानम् उत्तरीत्या प्रभेदश्च अभवत्। अत्रोपमेयस्य वक्षानुजवस्य उपमानभूतात्तज्जलनिधेराधिक्यवर्णनात् व्यतिरेकालङ्कारः। तदुक्तं दर्पणे। आधिक्यमुपमेयस्योपमानाद्न्यूनतापि वा। व्यतिरेक इति।

(३४५) सार्द्धमिति। यस्य पादे मगणद्वयं ततो गुरुद्वयं तदनु नगणचतुष्टयं ततश्च गुरुद्वयं तत् वृत्तं वसुषु अष्टासु भुवनेषु चतुर्दशसु यतिर्विरामो यस्यां तादृशी हंसी नाम भवति।

(३४६) उदाहरति सार्द्धमिति। हे कंसारातेः! कृष्ण! पश्य अवलोकय, हंसी एकान्ते विजने कान्तेन प्रियेण हंसेन सार्द्धं सुरभि सुगन्धं विकचकमलमधु विकसितपद्ममकरन्दं पिबन्ती कामक्रीड़ाया रतिविहारस्य आकूतेन आशयेन स्फीतः प्रवृद्धः प्रमदरसस्य आनन्दातिरेकस्य रभसः वेगः यस्मिन् तद् यथा तथा रभसो वेगहर्षयोरित्य-

Digitized by Google

२ । सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा ॥ (३४७)
माधवमासि विकस्वरकेसरपुष्पलसन्मदिरामुदितै-
र्भृङ्गकुलैरुपगीतवने वनमालिनमालि ! कलानिलयम् ।
कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसम्
तं भज माधविकामृदुनर्त्तकयामुनवातकृतोपगमा ॥ (३४८)
३ । भ्रौनरना रना वथ गुरु र्दिगर्कविरमं हि (भद्रकमिदम्) ॥
(३४९) इति कु० प०

मरः । अलघु तारं रमन्ती कूजन्ती तथा सरभसा सवेगा गतिर्यस्याः तादृशी त्वरमाणेति भावः दृढ अस्मिन् कालिन्दीये वासन्ते पवनस्य मतनेन सञ्चारेण परितरलाः परागाः कौसुमरजांसि यत्र तादृशे पद्मारण्ये कमलकानने स्वेच्छं स्वच्छन्दं यथा तथा विलसति विहरति । कस्यासित् गोप्याः स्वैरविहारार्थिन्या उक्तिरियम् ।

(३४७) सप्तेति । सप्तभिर्भकारैर्भगणैर्युतः एकगुरुर्यस्यां तथोक्ता इयम् उदारतरा अतिमनोहरा मदिरा नाम वृत्तं गदिता उक्ता ।

(३४८) उदाहरति माधवेति । हे आलि सखि ! त्वं माधवमासि वैशाखे मासि वैशाखे माधवोराध इत्यमरः । विकस्वराणि यानि केसरपुष्पाणि वकुलकुसुमानि तेषु लसन्तीभिः राजन्तीभिः मदिराभि-र्मधुभिः मुदिताः हृष्टाः तत्पानेनेति भावः तैः भृङ्गाणां मधुकराणां कुलैः उपगीतं यत् यत् तस्मिन् माधविकाया माधवीलतायाः मृदुनर्त्त-केन मन्दमन्दं सञ्चालकेनेत्यर्थः यामुनवातेन यमुनासमीरणेन कृतः उपगमः सान्निध्यं यस्याः तथोक्ता तद्वायुसेवितेति यावत् कुञ्जमेव गृहं तस्य उदरे अभ्यन्तरे पल्लवेन कल्पितं रचितं तल्पं यया येन तथोक्तम् अनल्पः गाढः मनोजरसः कामरसः यस्य तादृशं कलानिलयं चतुःषष्टिकामविद्यानिपुणमित्यर्थः वनमालिनं तं कृष्णं भज सेवस्व ।

(३४९) भ्राविति । यस्य पादे भगणरगणौ ततो नगणरगण-नगणाः ततश्च रगणनगणौ अथ अनन्तरं गुरुः, इदं वृत्तं दिगर्क-

४। (खाखित्यं) भूजगेन्द्रेण भाषितमेतच्चेन्मसरस्तजनगुभिः ॥ (३५०) इति छ० प०

५। सजता नसौ ररौ गः फणितुरगहयैः स्यात् (महास्रग्धराख्या) (३५१) इति छ० प०

विकृतिः। [८३८८६०८]

(त्रयोविंशत्यक्षरा वृत्तिः)

१। न ज भ ज भा ज भौ लघुगुरू बुधैस्तु गदितेयमद्रितनया ॥ (३५२)

खरतरशौर्य्यपावकशिखापतङ्गनिभमग्नदृप्तदनुजो
जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा।

विरमं दिक्षु दशसु अर्केषु द्वादशसु विरमः यतिर्यत्र तथाभूतं भद्रकं नाम स्यात्।

(३५०) खाखित्यमिति। चेत् यदि मगणसगणरगणसगणतगण-जगणनगणेभ्यः परं गुरुणा रचितं वृत्तं स्यात् प्रतिपादं तदेतत् खाखित्यं नाम भुजगेन्द्रेण पिङ्गलेन भाषितम्।

(३५१) सजता इति। यस्य पादे सजताः सगणजगणतगणाः, नसौ नगणसगणौ ततो रगणद्वयं ततश्च गुरुः, तत् वृत्तं फणितुरग-हयैः अष्टभिः सप्तभिश्च विच्छिन्नमित्यर्थः महास्रग्धराख्या महास्रग्धरा नाम स्यात्।

(३५२) नजेति। यस्य पादे नगणजगणभगणजगणभगणाः ततो जगणभगणौ ततश्च लघुसहितौ गुरुश्च, इयं बुधैः पण्डितैः अद्रितनया नाम वृत्तं गदिता उक्ता।

(३५२) उदाहरति खरतरेति। हे कंस! खरतरं तीक्ष्णतरं यत् शौर्यं वीर्यं तदेव पावकः अग्निः तस्य शिखासु ज्वालासु पतङ्गनिभः

भुवनहितावतारचतुरस्वराचरधरोऽवतीर्ण इह हि
क्षितिवलयेऽस्ति कंस ! शमनस्त्वेति तमवोचदद्रितनया ॥
(३५३)

विलुलितपुष्परेणुकपिशं प्रशान्तकलिकापलाशकुसुमं
कुसुमनिपातविचित्रवसुधं सशब्दनिपतद्द्रुमोत्कशकुनम् ।
शकुननिनादनादितककुब्विलोलविपलायमानहरिणं
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ॥
(३५४) इति भट्टौ ॥

शलभसदृशः मग्नः पतितः इन्द्रः दानवः यस्य तथाभूतः जलाधिसुतायाः लक्ष्म्याः विलासवसतिः क्रीडानिलयः सतां सज्जनानां गतिराश्रयः अगैः खैः जगद्भिरिति भावः मान्यः प्रशंसनीयः महिमा माहात्म्यं यस्य तथाभूतः भुवनानां जगतां हिताय यः अवतारः जन्मग्रहणं तत्र चतुरः चराचरधरः विश्वम्भर इत्यर्थः इह क्षितितले अवतीर्णः सन् तव शमनः हन्तेत्यर्थः अस्ति इति अद्रितनया पार्वती तं कंसम् अवोचत् ।

(३५४) विलुलितेति । पवनात्मजः हनूमान् विलुलितानां भ्रंशितानां पुष्पाणां रेणुभिः परागैः उत्पतद्भिरिति भावः कपिशं पिङ्गलं प्रशान्तानि पातितानीत्यर्थः कलिकाः कोरकाः पलाशानि पत्राणि कुसुमानि च यत्र तादृशं कुसुमानां निपातेन विचित्रा रञ्जिता इति भावः वसुधा भूमिर्यत्र तथोक्तं सशब्दं यथा तथा निपतद्भ्यः द्रुमेभ्यः वृक्षेभ्यः उत्काः उत्कण्ठिताः शकुनाः पक्षिणो यत्र तथाभूतं शकुनानां पक्षिणां निनादेन कूजनेन नादिताः पूरिताः ककुभः दिशः यत्र तथाविधं विलोलाश्चञ्चलाः सन्तः विपलायमानाः हरिणा यत्र तथोक्तं यथा तथा हरिणविलोचनायाः मृगनयनायाः सीतायाः अधिवसतिं वासभूमिं रिपोः शत्रोः रावणस्य वनम् अशोककाननमिति यावत् बभञ्ज भग्नवान् ।

Digitized by Google

भद्रललितमिदमन्यत्र ॥

२। मत्ताक्रीड़ं वस्विष्याग्रायति मयुगगयुगमनुलघु गुरुभिः ॥ (३५५)

मुग्धोन्मीलन्मत्ताक्रीड़ं मधुसमयसुलभमधुरमधुरसाद्
गाने गाने किञ्चित् स्यन्दत्पद्मरुणनयनयुगलसरसिजम्।
रासोल्लासक्रीड़त्कम्रव्रजयुवतिवलयरचितभुजरसं
सान्द्रानन्दं वृन्दारण्ये स्मरत हरिमनघचरणपरिचयम् ॥(३५६)

३। वृत्तं (सुन्दरिका) पिङ्गलमुनिनोक्ता सहयतो भसताज्-
लभगाः ॥ (३५७) इति छ० प०

——

---

(३५५) मत्ताक्रीड़मिति। यस्य पादः मयुगेन मगणहयेन गयुगेन गुरुद्वयेन मनुलघुभिः चतुर्दशलघुभिः ततश्च गुरुश्चा भवति, तत् वृत्तं वसुषु अष्टसु इषुषु पञ्चसु आभाति दशसु यतिर्विरामो यत्र तथाभूतं मत्ताक्रीड़ं नाम स्यात्।

(३५६) उदाहरति मुग्धोन्मीलदिति। वृन्दारण्ये मुग्धं मनोज्ञं यथा तथा उन्मीलन्ती स्फुरन्ती मत्तस्येव आक्रीड़ः विलासो यस्य तादृशं मधुसमये वसन्तकाले सुलभं सुप्राप्यं यत् मधुरं मधु तस्य रसात् आस्वादात् गाने गाने प्रतिसङ्गीतमित्यर्थः किञ्चित् ईषत् स्यन्दत् पतं खञ्जरीटम् अरुणं रक्तं नयनयुगसरसिजं नेत्रपद्मद्वयं यस्य तथाभूतं रासोल्लासेन रतिविहारकौतुकेन क्रीड़न्तीनां कम्राणां कमनीयानां व्रजयुवतीनां वलयेषु मण्डलेषु रचितः कृतः भुजयोः रसः आश्लिङ्गन-व्यापार इत्यर्थः येन तथोक्तम् अनघः निष्पापः पापनाशक इत्यर्थः चरणपरिचयः पादपद्मसेवा यस्य तादृशं सान्द्रानन्दं घनानन्दं हरिं कृष्णं स्मरत यूयमिति भक्तान् प्रत्युक्तिः।

(३५७) वृन्दरिकेति। यस्य पादे सहयतः सगणयुगलात् परमि-

Digitized by Google

संस्कृतिः । [१६७७२१६]

(चतुर्विंशत्यक्षरा वृत्तिः)

१ । भूतमुनीनैर्यतिरिह भतनाः स्भौ भ न याश्च यदि
भवति तन्वी ॥ (३५८)

माधव ! मुग्धैर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः
कम्पमुपेता मलयजसलिलैः प्लावनतोऽप्यविगततनुदाहा ।
पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिदूनै-
र्निश्वसती सा मुहुरतिपरुषं ध्यानलये तव निवसति तन्वी ॥
(३५९)

लक्षणं भगणसगणतगणजगणाः ततो लघुः ततश्च भगणो गुरुश्च, तदुक्तं पिङ्गलमुनिना सुन्दरिका उक्ता ।

(३५८) भूतेति । यदि इह छन्दोपन्ये भगणतगणभगणाः ततः सगणभगणौ ततश्च भगणनगणयगणाः भवन्ति प्रतिपादं, तदा तदुक्तं भूतैः पञ्चभिः मुनिभिः सप्तभिः दनैः सूर्यैर्द्वादशभिः विच्छिन्नं तन्वी नाम स्यात् ।

(३५९) उदाहरति माधवेति । हे माधव ! लक्ष्मण ! सा तन्वी लक्ष्मणो राघवेति शेषः मुग्धैः मनोहरैः मधुकराणां भ्रमराणां विरुतैः गुञ्जितैः तथा कोकिलानां कूजितानि रवाः मलयसमीरा मलयपवनाश्च तैः कम्पमुपेता भयात् कम्पितेत्यर्थः मलयजसलिलैः चन्दनरसैः प्लावनतः सर्वाङ्गसेचनादपीत्यर्थः अविगतः तनुतापः शरीरसन्तापः यस्यास्तादृशी, तथा देहजस्य कामस्य संज्वरभरः सन्तापातिशयः तेन परिदूनैः म्लानैरित्यर्थः पद्मपलाशैः कमलदलैः विरचितं कल्पितं शयनं यस्या सा तथाभूता मुहुः पुनः पुनः अतिपरुषम् अतिरूक्षम् अत्युष्णमित्यर्थः निःश्वसती तव ध्यानलये ध्यानयोगे निवसति त्वामेव ध्यायन्ती तिष्ठतीति भावः ।

Digitized by Google

२। नाम (किरीट) मिदं भगणा यदि पिङ्गलनागमुनीन्द्र-
मतं किल ॥ (२६०) इति छ० प०

३। सगणै रिहवृत्तवरं वसुभिः किल (दुर्मिल) मुक्तमिदं
कविभिः ॥ (२६१) इति छ० प०

अतिकृतिः। [३२५४४३२)

(पञ्चविंशत्यक्षरा वृत्तिः।)

१। क्रौञ्चपदा स्यात् भौ मसभाग्वेदिषुशरवसुमुनियति
रिनलघुगैः ॥ (२६२)

क्रौञ्चपदालीचित्रिततीरा मदकलखगकुलकलकलरुचिरा
फुल्लसरोजश्रेणिविलासा मधुमुदितमधुपरवरभसकरी।
फेनविलासप्रोज्ज्वलहासा ललितलहरिभरपुलकितसुतनुः
पश्य हरे! ऽसौ कस्य न चेतो हरति तरलगतिरहिमकिर-
णजा ॥ (२६२)

---

(२६०) नामेति। यदि भगणाः अष्टाविति शेषः तदा पिङ्गल-
नागमुनीन्द्रस्य मतम् इदं वृत्तं किरीटं नाम स्यात्।

(२६१) सगणैरिति। वसुभिः अष्टाभिः सगणैः यस्य पादो
भवति इदं वृत्तवरं पद्यश्रेष्ठं कविभिः दुर्मिलमुक्तम्।

(२६२) क्रौञ्चेति। चेत् यदि भगणभगणसगणभगणाः ततो
द्वादशलघवः गुरवश्चैकः प्रतिपादमिति शेषः तत् वृत्तम् इषु शरवसु-
मुनियतिः पञ्चसु पञ्चसु अष्टसु सप्तसु च यतिर्विरामो यत्र तादृशी
क्रौञ्चपदा नाम स्यात्।

(२६३) उदाहरति क्रौञ्चपदेति। हे हरे! कृष्ण! क्रौञ्चानां
वकपक्षिणां पदावलीभिः पदन्यासैभिः चित्रितं तीरं यस्यास्तथोक्ता

उत्कृतिः । [६७१०८८६४]

(षड्विंशत्यक्षरा वृत्तिः ।)

१ । वस्वीशाश्वैश्छे दोपेतं म म त न नयुग र स ल गै- ।
भुंजङ्गविजृम्भितम् ॥ (२६४)

हेलोद्वृत्तोद्वृत्पादप्रकटविकटनटनभरो रणत्कर-
तालक-

स्वारुप्रेङ्खच्चूडावर्हः स्फुतितरलनवकिसलयस्तरङ्गित-
हारधृत् ।

वल्यत्रागस्त्रीभिर्भक्त्या मुकुलितकरकमलयुगं कृतस्तु-
तिरच्युतः,

पायान्नश्छिन्दन् कालिन्दीङ्कृतनिजवसति वृहद्भुं-
जङ्गविजृम्भितम् ॥ २६५

यस्यास्तीरे वकाश्चरन्तीति भावः । मदकलानां मदोत्कटानां खग-
कुलानां पक्षिसंघानां कलकलैः कोलाहलैः रुचिराः मनोहारिणी
फुल्लाभिर्विकसिताभिः सरोजानां पद्मानां श्रेणिभिर्विलासः विशेष-
शोभा यस्यास्तादृशी मधुस्रुतानां मधुपाननत्तानां मधुपानां भ्रमराणां
रवेण रभसकरी हर्षजननी फेनानां विलासः प्रकाश एव प्रोल्लस-
हासः उत्कटहासः यस्यास्तथाभूता तथा खलितेन मनोज्ञेन लहरि-
भरेण तरङ्गातिशयेन पुलकिता रोमाञ्चिता शोभना तनुः अवयवः
यस्याः तादृशी तरला चपला गतिर्यस्यास्तथाभूता असौ अङ्गिनकिर-
णजा यमुना कस्य चेतः चित्तं न हरति सर्वस्यैव हरतीत्यर्थः ।

(२६४) वस्वीशाश्वैरिति । वस्व पादे भगणमगणयतगणनगणनगण-
युगलरगणसगणाः ततो लघुर्गुरुश्चैकः, तत् वृत्तं वस्वीशाश्वैः अष्टाभिः
एकादशभिः सप्तभिश्च विच्छिन्नं भुजङ्गविजृम्भितं नाम स्यात् ।

(२६५) उदाहरति हेलेति । हेलया उद्वृत्तौ उत्पतन्तौ

Digitized by Google

अथ दण्डकः।

१। यदिह नयुगलं ततः सप्तरेफास्तदा चण्डदृष्टिप्रपातो भवेद्दण्डकः॥ २६६

प्रलयघनघटामहारम्भमेघावलीचण्डदृष्टिप्रपाताकुलं गोकुलं

सपदि समवलोक्य सव्येन हस्तेन गोवर्द्धनं नाम शैलं दधच्छीलया।

न्यञ्चन्तौ निपतन्तौ पादौ यस्य तादृशः प्रकटः स्फुटः विकटः उत्कटः उद्भटः नटनभरः कलातिशयः यस्य तथाभूतः रचनं करतालः यस्य तथोक्तः हस्तकरतलध्वनिरित्यर्थः चारु मनोज्ञं यथा तथा भ्रेजनं चलत् चूडावर्हं चूडायां निहितमयूरपिच्छं यस्य तथाभूतः, श्रुत्योः कर्णयोः तरङ्गौ चञ्चलौ नवौ किसलयौ पल्लवौ यस्य तथाभूतः तरङ्गितः अनेकाङ्गुल इति भावः यो हारः तं धरतीति तथोक्तः लम्बन्तीभिः विभ्रतीभिः नागस्य कालियस्य स्त्रीभिः भक्त्या सङ्कुचितं करयोर्भुजयोर्युगलं यस्मिन् तद् यथा तथा कृता स्तुतिर्यस्य तथाभूतः अच्युतः कृष्णः कालिन्द्या यः ह्रदः तस्मिन् कृता निजवसतिर्येनेति तत् दुष्टतः भुजङ्गस्य विजृम्भितं चेष्टितम् उपद्रवं छिन्दन् सन् वः युष्मान् पापात् रक्षतु।

(२६६) यदिहेति। यत् यदि इह छन्दोग्रन्थे नयुगलं नगद्वयं ततः सप्तरेफाः रगणसप्तकं तदा चण्डदृष्टिप्रतापो नाम दण्डको भवेत्।

(२६७) उदाहरति प्रलयेति। प्रलये कल्पान्ते या घनघटा मेघाडम्बरः तस्या इव महान् आरम्भः यस्याः तथाविधा या मेघावली तस्या चण्डदृष्टिप्रतापेन आकुलं गोकुलं समवलोक्य सपदि तत्क्षणात् सव्येन वामेन हस्तेन गोवर्द्धनं नाम शैलं लीलया अनायासेन दधत् धारयन्। हे कमलनयन! नलिननेत्र! रक्ष रक्ष इति जल्पन्तीभिः

कमलनयन ! रक्ष रक्षेति जल्पत्तवस्यन्मुग्धगोपाङ्गनालिङ्गनानन्दितो

गलदभिनवधातुधाराविचित्राङ्गरागो मुरारातिरस्तु प्रमोदाय वः ॥ (२६७)

२ । प्रतिचरणविघट्टनरेफाः स्फुरर्णोऽर्णवव्यालजीमूतलीला-

करोद्दामगर्जादयः ॥ (२६८)

जय जय जगदीश ! विष्णो ! हरे ! राम ! दामोदर ! श्रीनिवासाच्युतानन्द ! नारायण !

त्रिदशगणगुरो ! मुरारे ! मुकुन्दासुरारे ! हृषीकेश ! पीताम्बर ! श्रीपते ! माधव ! ।

गरुडगमन ! कृष्ण ! वैकुण्ठ ! गोविन्द ! विश्वम्भरोपेन्द्र ! चक्रायुधाधोक्षज ! श्रीनिधे !

बलिदमन ! नृसिंह ! शौरे ! भवाम्भोधिघोरार्णसि त्वं निमज्जन्तमभ्युद्धरोपेत्य माम् ॥ (२६९)

लसन्तीभिः सुग्धाभिः गोपाङ्गनाभिः आलिङ्गनेन आनन्दितः गलद्भिः स्रवद्भिः अभिनवधातुधाराभिर्गैरिकादिनिस्रवैः विचित्रः अङ्गरागो यस्य तथाभूतः मुरारातिः कृष्णः वः युष्माकं प्रमोदाय अस्तु भवतु ।

(२६८) प्रतीति । यस्य दण्डकस्य प्रतिचरणम् एको रगणः अधिकः सः अर्णः, अर्णवः, व्यालः, जीमूतः, लीलाकरोद्दामः गर्जः इत्यादिसंज्ञः स्यादित्यर्थः ।

(२६९) अर्णोनामकछन्दोलक्षणमाह जयेति । जगदीशेत्यादि घोरे इत्यन्तं सम्बोधनान्तं पदं जयजय सर्वोत्कर्षेण वर्तस्वेत्यर्थः । भवः संसार एवाम्भोधिः समुद्रः तस्य घोरे भीषणे अर्णसि जले निमज्जन्तं निपतन्तं माम् उपेत्य अभ्युद्धर परित्रायस्व ।

Digitized by Google

एवमर्षवादीनामप्युदाहरणानि बोध्यानि ॥

३। प्रचितकसमभिधो धीरधीभिः स्मृतो दग्धको नहया-
दुत्तरैः सप्तभिर्यैः ॥ (३७०)

मुरहर! यदुकुलाम्भोधिचन्द्र! प्रभो! देवकीगर्भरत्न!
त्रिलोकैकनाथ!

३। प्रचितकपटसुरारिव्रजोद्दामदन्तावलस्तोमविद्रावणे
केसरीन्द्र!।

चरणनखरसुधांशुच्छटीर्म्लपनिःशेषितध्यायिचेतोनि-
विष्टान्धकार!

प्रणतजनपरितापोग्रदावानलोच्छेदमेघ! प्रसीद प्रसीद
प्रसीद ॥ (३७१)

---

(३७०) प्रचितकेति। यस्य पादः नहयात् नगणयुगलात् उत्तरैः परैः सप्तभिः यैर्यगणैः भवति, स दग्धकः धीरधीभिः बुधैः प्रचितकं समभिधा संज्ञा यस्य तथोक्तः स्मृतः।

(३७१) उदाहरति सुरहरेति। हे सुरहर! सुरवैरी! यदुकुलमेव अम्भोधिः समुद्रः तस्य चन्द्रः तत् सम्बुद्धौ, प्रभो! निष्प्रत्यूहपरिपूरणसमर्थ! सर्वयज्ञिमज्ञित्यर्थः देवकीगर्भरत्न! देवकीजठरमणे! त्रिलोकैकनाथ! त्रिभुवनैकाधिप! प्रचितकपटा मायाविन इत्यर्थः ये सुरारयः असुराः तेषां व्रजः समूह एव उद्दामः उत्कटः मदोद्धत इत्यर्थः दन्तावलस्तोमः गजनिवहः तस्य विद्रावणे ध्वंसने केसरीन्द्रः मृगराजराजः तत् सम्बुद्धौ, चरणनखरा एव सुधांशवः तेषां छटा समूहः तया उल्लेखेन प्रकाशेन निःशेषितं नाशितं ध्यायिनां योगिनां चेतोनिविष्टं चित्तस्थितम् अन्धकारं येन तथाभूतः तत्सम्बुद्धौ, तथा प्रणतजनानां परितापः आध्यात्मिकादितापत्रयमित्यर्थः स एव उप-

४ । सगणः सकलः खलु यत्र भवेत्तमिह प्रवदन्ति बुधाः
कुसुमस्तवकम् ॥ (३७२)

विरराज यदीयकरः कनकद्युतिवन्मुरवामदृशः कुचकुम्भलगः,

भ्रमरप्रकरेण यथावृतमूर्त्तिरशोकलताविलसत्कुसुमस्तवकः ।

स नवीनतमालदलप्रतिमच्छवि विभ्रदतीव विलोचनहारि वपुः

चपलारुचिरांशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुजमध्यगतः ॥ (३७३)

दावानलः भीषणवनाग्निः तस्य उच्छेदे निर्वापणे मेघः तत्सम्बुद्धौ प्रसीद प्रसीद प्रसीद सततं प्रसन्नो भवेत्यर्थः ।

(३७२) यत्र दण्डके सकलः नवसंख्यक इति भावः सगणः भवेत्, इह छन्दोग्रन्थे बुधाः तं कुसुमस्तवकं कुसुमाख्यरचमिति वा पाठः प्रवदन्ति ।

(३७३) उदाहरति विरराजेति । यदीयकरः यस्य भुजः इत्यर्थः कनकद्युतिवन्मुरायाः काञ्चनप्रभोन्नतानतयोः वामदृशः मृगाक्ष्याः राधाया इति भावः कुचकुम्भलगः स्तनसुकुम्भगामी सन् भ्रमरप्रकरेण भृङ्गवृन्देन आवृता मूर्त्तिर्यस्य तथोक्तः अशोकलतायां विलसन् कुसुमस्तवकः यथा पुष्पगुच्छ इव विरराज शुशुभे, नवीनस्य तमालदलस्य तमालपत्रस्य प्रतिमा सदृशी छविः कान्तिर्यस्य तथाभूतम् अतीव विलोचनहारि नेत्रयोरत्यानन्ददायीत्यर्थः वपुः शरीरं बिभ्रत् दधत् तथा चपला विद्युत् तद्वत् रुचिरा स्फुरन्ती या अंशुकवल्ली वसनलतां तस्या धरतीति धरः पदादित्वादत् । स हरिः कृष्णः मदीयं मत्सम्बन्धिं यत् हृदम्बुजं हृदयकमलं तत्र गतः स्थितः अस्तु भवतु ।

Digitized by Google

५। यत्र रेफः परं स्वेच्छया गुम्फतः स मृतो दण्डको
मत्तमातङ्गलीलाकरः ॥(३७४)

हेमगौरं वसानोऽशुकं शक्रनीलासिते वर्षणि स्रष्टृ-
व्यानुलेपाङ्किते

तारहारांशुवद्योनभश्चित्रमालाञ्चितो भव्यभूषोज्ज्वलाङ्गः
समं सीरिणा।

अञ्जनाभाम्बरेणेन्दुकुन्दाभदेहेन लीलापरीहासहासो-
र्म्मिकौतूहलैः

कंसरङ्गाद्रिगः पातु वश्चक्रपाणिर्गतिक्रीड़या मत्तमा-
तङ्गलीलाकरः ॥ (३७५)

---

(३७४) यत्रेति। यत्र दण्डके परं केवलं स्वेच्छया रेफः रगणः नवसंख्यक इति भावः गुम्फितः रचितः, स दण्डकः मत्तमातङ्गलीला-करः नाम स्मृतः कथितः।

(३७५) उदाहरति हेमगौरमिति। शक्रनीलम् इन्द्रनीलं नील-कान्तमणिरित्यर्थः तद्वत् असितं श्यामं तस्मिन् स्रष्टृ न ब्रह्मणेन दिव्येन उत्कृष्टेन अनुलेपेन अङ्गरागेण अङ्किते चिह्निते वर्षणि देहे हेमगौरं पीतवर्णमित्यर्थः अंशुकं वसनं वसानः दधानः तारो मुक्ता-हारस्य अंशुः प्रभा यत्र तादृशं यत् वक्ष एव नभः आकाशं तत्र चित्रा या माला वनमालेत्यर्थः तया अञ्चितः शोभितः, भव्याभिर्मनो-ज्ञाभिर्भूषाभिः उज्ज्वलम् अङ्गं यस्य तथाभूतः अञ्जनाभं कज्जलप्रभं नीलवर्णमित्यर्थः अम्बरं वस्त्रं यस्य तादृशेन इन्दुश्च कुन्दं माध्यकुसुमविशे-षश्च तद्वत् आभा यस्य तादृशः देहो यस्य तथाभूतेन श्वेतकान्तिनेत्यर्थः सीरिणा बलभद्रेण समं सीत्या परिहासस्य हासस्य च ऊर्मीणां पर-म्पराणां कोलाहलैः कलरवैः कंसस्य रङ्गः संग्रामसमाज एव अद्रिः पर्वतः तत्र गतः गतिक्रीड़या विहरणव्यापारेण मत्तस्य मातङ्ग

६। लघुर्गुरुर्निजेच्छया यदा निवेश्यते तदैष दण्डको भवत्यनङ्गशेखरः॥ (३७६)

उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके! विजृम्भमाणगौरदीधितिः

रतिस्वहस्तनिर्मितः कलाकुतूहलेन चारुचम्पकैरनङ्गशेखरः किमु।

इति प्रमोदकारिणीं प्रियाप्रसादलक्षणां गिरं समुद्गिरन् मुरारिरङ्गतां

प्रदोषकालसङ्गभोगसम्मना मनोजकेलिकौतुकी करोतु वः कृतार्थताम्॥ (३७७)

दण्डिनः श्लोकाकरः मत्तगज इव विचरत्यकारीत्यर्थः चक्रपाणिः कृष्णः वः युष्मान् पातु रक्षतु।

(३७६) लघुरिति। यदा निजेच्छया स्वेच्छया लघुः ततः गुरुः निवेश्यते, तदा एष दण्डकः अनङ्गशेखरो नाम भवति।

(३७७) उदेतीति। हे राधिके! अद्य पुरः अग्रतः विजृम्भमाणा उद्गच्छन्तः गौराः दीधितयः यस्य तथोक्तः असौ सुधाकरचन्द्रः कलाया शिल्पकर्मणः कुतूहलेन कौतुकेन चारुचम्पकैः मनोहरचम्पकपुष्पैः रत्या कामपत्न्या स्वहस्तेन निर्मितः सृष्टः अनङ्गस्य कामस्य शेखरः शिरोभूषणं किमु उतेति? विलोकय पश्य। इति इत्थं प्रमोदकारिणीम् आनन्दविधायिनीं प्रियायाः राधायाः प्रसादः प्रसन्नता मानभञ्जनमिति भावः लक्षणम् आयय इति यावत् यस्याः तथाभूताम् अद्भुतां मनोहारिणीं गिरं वाचं समुद्गिरन् कथयन् प्रदोषकाले रजनीमुखे यः सङ्गमः तेन तदर्थम् उल्लसत् उत्सुकमिलार्थः मनो यस्य तादृशः मनोजस्य कामस्य केलौ क्रीडायां कौतुकी लालस इत्यर्थः मुरारिः कृष्णः वः युष्माकं कृतार्थतां साफल्यं करोतु।

Digitized by Google

७। यत्र दृश्यते गुरोः परोलघुःक्रमात् स उच्यते बुधैरशो-
कपुष्पमञ्जरीति ॥ (३७८)

मूर्द्ध्नि चारुचम्पकस्रजा सलीलवेष्टनं लसल्लवङ्गचारु-
चन्द्रिका कचेषु

कर्णयोरशोकपुष्पमञ्जरीवतंसको गले च कान्तकेशरो-
पक्लृप्तदाम।

फुल्लनागकेशरादिपुष्परेणुरूषणं तनौ विचित्रमित्युपा-
त्तवेश एष

केशवः पुनातु वः स्वपुष्पभूषितः स मूर्त्तिमानिवागतो-
मधुर्विहर्त्तुमत्र ॥ (३७९)

८। यकारैः कवीच्छानुरोधानिवद्धैः प्रसिद्धो
विशुद्धोऽपरोदण्डकः (सिंहविक्रीड़नामा)॥ (३८०) छ०प०

---

(३७८) यत्रेति। यत्र दण्डके गुरोः परः क्रमात् लघुः दृश्यते, स बुधैः पण्डितैः अशोकमञ्जरीति उच्यते।

(३७९) उदाहरति मूर्द्ध्नीति। मूर्द्ध्नि शिरसि चारुचम्पकस्रजा मनोज्ञचम्पकमालया सलीलं सविलासं वेष्टनं कचेषु केशेषु लसन्ति विलसन्ति लवङ्गानि लवङ्गकुसुमानि चारुचन्द्रिकाः मनोज्ञमल्लिकाश्च, कर्णयोः वतंसकः भूषणम् अशोकपुष्पमञ्जरी, गले कण्ठे च कान्तं मनोहरं केशरैः वकुलकुसुमैः उपक्लृप्तं गुम्फितं दाम माल्यं, तनौ शरीरे विचित्रं फुल्लानां विकसितानां नागकेशरादिपुष्पाणां रेणुभिः परागैः रूषणं प्रसाधनम् इति इत्थम् उपात्तः गृहीतः वेशः येन तथाभूतः एष केशवः कृष्णः स्वैः स्वकीयोद्भवैरित्यर्थः पुष्पैः भूषितः अलङ्कृतः अत्र वृन्दावने इति भावः विहर्त्तुम् आगतः मूर्त्तिमान् मधुर्वसन्त इव वः युष्मान् पुनातु पवित्रीकरोतु आनन्दयतित्यर्थः।

(३८०) यकारैरिति। कवीनाम् इच्छानुरोधात् निबद्धैः रचितैः

९ । स्वेच्छया रजौ क्रमेण संनिवेशयत्युदारधीः
कविः स दण्डकः स्मृतो (जयत्यशोकमञ्जरी) ॥ (३८१) छ० प०
१० । यत्र रेफान् कविः स्वेच्छया पाठ सौकर्य्यसापेक्षया
रोपयत्येष धीरैः स्मृतो दण्डको (मत्तमातङ्गलीलाकरः) ॥ (३८२)
इति छ० प०
११ । न युगलगुरुयुगेवं यकाराः कवीच्छानुरोधा-
त्तदा यत्र वक्ष्यन्ते एषोऽपरो दण्डकः पण्डितैरीरितः (सिंह-
विक्रान्तनामा) ॥ (३८३) इति छ० प०
इति दण्डकप्रकरणम् ।
इति छन्दोमञ्जर्यां समवृत्ताख्यो नाम द्वितीयः स्तवकः ।

यकारैः यगणैः दशभिरिति शेषः अपरः पूर्वोक्तेभ्यः अतिरिक्तः विशुद्धः निर्दोषः सिंहविक्रीड़नामा दण्डकः प्रसिद्धः ।

(३८१) स्वेच्छयेति । उदारधीः महाबुद्धिः कविः स्वेच्छया निजाभिप्रायेण क्रमेण रजौ रगणजगणौ संनिवेशयति यदीति शेषः स दण्डकः अशोकमञ्जरीति स्मृतः सन् जयति सर्वोत्कर्षेण वर्त्तते ।

(३८२) यत्रेति । यत्र कविः स्वेच्छया पाठसौकर्य्यसापेक्षया पाठसौन्दर्य्यानुरोधेनेत्यर्थः रेफान् रगणान् त्रयोदशेति शेषः रोपयति रचयति, धीरैः बुधैः एष दण्डकः मत्तमातङ्गलीलाकरः नाम स्मृतः ।

(३८३) नेति । यत्र यदा कवीच्छानुरोधात् ।

Digitized by Google

अथ तृतीयः स्तवकः।

—००—

अथार्द्धसमवृत्तम्।

१। विषमे यदि सौ स ल गा दले
भौ युजि भादगुरुकावुपचित्रम् ॥ (१)
द्विरावृत्त्या श्लोकः पूरयितव्यः।
सुरवैरिवपुस्तनुतां मुदं हेमनिभांशुकचन्दनलिप्तम्।
गगनञ्चपलामिलितं यथा शारदनीरधरैरुपचित्रम् ॥ (२)
२। विषमे प्रथमाक्षरहीनं दोधकमेव हि वेगवती स्यात् ॥(३)
स्मरवेगवती व्रजरामा केशववंशरवैरतिमुग्धा।
रभसान्न गुरून् गणयन्ती केलिनिकुञ्जगृहाय जगाम ॥ (४)

---

(१) विषमे इति। यदि विषमे प्रथमे तृतीये चेत्यर्थः पादे सौ सगणौ ततः सलगाः सगणो लघुर्गुरुश्च युजि युग्मे पादे द्वितीये चतुर्थे इत्यर्थः भौ भगणौ, ततः भात् भगणात् गुरुको गुरुश्चयमित्यर्थः तद्वृत्तम् उपचित्रं नाम।

(२) उदाहरति सुरेति। हेमनिभं काञ्चनप्रतिमं पीतमित्यर्थः यत् अंशुकं वसनं तथा चन्दनं ताभ्यां लिप्तम् आच्छादितमित्यर्थः सुरवैरिणः कृष्णस्य वपुः शरीरं चपलामिश्रितं विद्युल्लाञ्छितं शारदनीरधरैः शरन्मेघैः उपचित्रं रञ्जितमित्यर्थः गगनं यथा आकाशमिव सुखम् आनन्दं तनुतां विस्तारयतु।

(३) विषमे इति। विषमे पादे पूर्वोक्ते प्रथमे तृतीये चेत्यर्थः प्रथमाक्षरेण हीनं दोधकं दोधकमिच्छति भणितवाद्दाविलुप्तवर्णं वेगवती नाम वृत्तं स्यात्।

(४) उदाहरति स्मरेति। स्मरस्य कामस्य वेगवती उद्दीप्तकामे-

Digitized by Google

३ । अयुजि प्रथमेन विवर्जितम् ॥ (५)
द्रुतविलम्बितकं हरिणप्लुता ।
स्फुटफेनचया हरिणप्लुता बलिमनोज्ञतटा तरणेः सुता ।
कलहंसकुलारवमालिनी विहरतो हरति स्म हरेर्मनः ॥ (६)
४ । अयुजि न न र ला गुरुः समे
तदपरवक्त्रमिदं न जौ ज रौ ॥ (७)
स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम् ।
मृगयुवतिगणैः समं स्थिता व्रजवनिता धृतचित्तविभ्रमा ॥ (८)

त्यर्थः व्रजराधा व्रजाङ्गना वेणवस्य कृष्णस्य वंशरवैः वेणुनिनादैः अतिसुग्धा कृतेत्यर्थः रभसात् वेगात् मदनस्येति भावः गुरून् पितृश्वशुरादीन् न गणयन्ती सती केलिनिकुञ्जमेव स्वकं तत्रौ जगाम गमेः कर्मणि षष्ठ्यौ ।

(५) अयुजीति । अयुजि विषमे पादे प्रथमेन अक्षरेण विवर्जितं विहीनं द्रुतविलम्बितकं द्रुतविलम्बितमाह नभौभरावित्युक्तलक्षणं हरिणप्लुता नाम वृत्तं स्यात् ।

(६) उदाहरति स्फुटेति । स्फुटाः प्रकटाः फेनानां चयाः समूहा यस्याः तथोक्ता हरिणवत् प्लुतं गतिर्यस्यास्तादृशी बलिभिः पूजाद्रव्यैः कुसुमादिभिरित्यर्थः मनोज्ञं मनोहरं तटं यस्यास्तथाभूता कलहंसकुलानाम् आरवेण निनादेन शोभते शोभत इति तथोक्ता तरणेः सूर्यस्य सुता यमुनेत्यर्थः विहरतः तटभूमौ क्रीडतः हरेः कृष्णस्य मनः हरति स्म अहार ।

(७) अयुजीति । अयुजि विषमे पादे नरला नगौ यौ ततो रगणः तदन्ते लघुः गुरुश्च, समे पादे द्वितीये तृतीये चेत्यर्थः नजौ नगणजगणौ ततो जरौ जगणरगणौ तत् इदं वृत्तम् अपरवक्त्रं नाम स्यात् ।

(८) उदाहरति स्फुटेति । स्फुटाभिः प्रकटाभिः सुमधुराभिः

वैतालीयं पुष्पिताग्राश्चेच्छन्त्यपरवक्त्रकम् ।

५ । अयुजि नयुगरेफतो यकारो
युजि तु न जौ ज र गाश्च पुष्पिताग्रा ॥ (९)
करकिसलयशोभया विभान्ती
कुचफलभारविनम्रदेहयष्टिः ।
स्मितरुचिरविलासपुष्पिताग्रा
व्रजयुवतिव्रततिर्हरेर्मुदेऽभूत् ॥ (१०)

वेणुगीतिभिः वंशीगीतैः तं माधवं कृष्णम् अपरवक्त्रम् असाधारण-मुखम् अवेत्य ज्ञात्वा व्रजवनिता गोप्यः व्रजयुवतिगणैः व्रजीदृन्दै-रित्यर्थः समं तेषां गानप्रियत्वादिति भावः धृतः चित्तस्य मनसः विभ्रमः विमोहनमित्यर्थः याभिः तथाभूताः सत्यः स्थिताः । वैता-लीयमिति वक्ष्यमाणं वैतालीयं पुष्पिताग्राश्च वृत्तम् अपरवक्त्रकं नाम वृच्छन्ति अपरवक्त्रनाम वैतालीयम् अपरवक्त्रनामिकां पुष्पिताग्राञ्च अयं वृच्छन्तीत्यर्थः ।

(९) अयुजीति । अयुजि विषमे पादे नयुगरेफतः नगणद्वयात् रगणः तस्मात् यकारः यगणः, युजि च युग्मे पादे नजौ नगणजगणौ ततः जरगाः जगणरगणौ ततश्च गुरुः, तत् पुष्पिताग्रा नाम वृत्तं स्यात् ।

(१०) उदाहरति करेति । करा एव किसलया नवपल्लवाः तेषां शोभया श्रिया विभान्ती राजमाना कुचाः स्तना एव फलानि तेषां भारेण विनम्रा विना देहयष्टिः यस्याः तथाभूता स्मितानां रुचिरा मनोज्ञा विलासा एव पुष्पाणि यत्र तादृशम् अग्रं मुखम् उपरि-भागश्च यस्याः तथाभूता व्रजयुवततिः व्रजाङ्गनागणः हरेः कृष्णस्य मुदे आनन्दाय अभूत् ।

Digitized by Google

६। अयुजोर्यदि सौ ज गौ युजोः
स भ रा लौ यदि सुन्दरी तदा ॥ (११)
यदवोचदुदीक्ष्य सुन्दरी परितः स्नेहमयेन चक्षुषा।
अपि कंसहरस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ (१२)
यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥(१३)

इति भारवी।

७। भवय मोजमतं गुरुणीचेद् युजिच नजौज्ययुतौ
(द्रुतमध्या) ॥ (१४) इति छ० प०

---

(११) अयुजोरिति। यदि अयुजोः विषमयोः पादयोः प्रथम-तृतीययोरित्यर्थः सौ सगणौ ततो जगौ जगणौ गुरुश्चेत्यर्थः, यदि च युजोः द्वितीयचतुर्थयोः पादयोः सभराः सगणभगणरगणाः ततो लघुर्गुरुश्च तदा सुन्दरी नाम वृत्तं स्यात्।

(१२) उदाहरति यदिति। सुन्दरी राधा परितः सर्वतः स्नेह-मयेन सस्नेहेन चक्षुषा उदीक्ष्य विचार्येत्यर्थः यत् अवोचत् उक्तवती, दुर्वचम् अन्यैरकथनीयमित्यर्थः तत् वचनं कंसहरस्य कृष्णस्य विस्मयं विदधीत कुर्वीत।

(१३) यदिति। मानिनी अभिमानवती द्रौपदी परितः सर्वतः स्नेहमयेन स्नेहप्रचुरेण चक्षुषा प्रानहच्छोकेत्यर्थः वीक्ष्य विविच्य यत् अवोचत उक्तवती, दुर्वचं वक्तुमशक्यम् अन्यैरिति शेषः तत् वचनं वागधिपस्य दुष्टसतेरपि विस्मयं विदधीत जनयेत्।

(१४) भवयमिति। ओजे विषमे पादे मतं भवयं भगणत्रयं ततो गुरुणी गुरुद्वयमित्यर्थः, युजि च समे पादे नजौ नगणजगणौ ज्ययुतौ ततो जगणयगणौ तत् वृत्तं द्रुतमध्या नाम स्यात्।

Digitized by Google

८। ओजे तपरौ जरौ गुरुचेत् मृदौ जगौ ग् (भद्रविराड्)
भवेदनोजे ॥ (१५) इति छ० प०

९। अयमे सजौ सगुरुयुग्मौ (केतुमती) समेभरनगादृगः ॥(१६)
इति छ० प०

१०। (आख्यानकी) तौ जगुरू ग ओजे जतावनोजे जगुरू
गुरुचेत् ॥ (१७) इति छ० प०

११। जतौ जगौ गो विषमे समे चेत्, तौज्गौग एषा
विपरीतपूर्वा ॥ (१८) इति छ० प०

१२। स्यादयुग्मके रजौ रयौ समे चेदृजरौजरौ गुरुर्जवात्-
परामतीयम् ॥ (१९) इति छ० प०

---

(१५) ओजे इति। ओजे विषमे पादे तपरौ तगणात् परौ जरौ जगणरगणौ ततो गुरुचेत्, तथा अनोजे समे पादे मृदौ मगण-सगणौ जगौ जगणौ गुरुश्च ततो गुरुचेत् तदुक्तं भद्रविराट् नाम छन्दः स्यात्।

(१६) अयमे इति। अयमे विषमे सजौ सगणजगणौ सगुरुयुग्मौ सगणौ गुरुश्चेत्यर्थः, समे पादे भरनगात् भगणरगणनगणात् परं गुरुद्वयं तदा केतुमती नाम वृत्तं स्यात्।

(१७) आख्यानकीति। ओजे विषमे तौ तगणौ जगुरुगः जगणो गुरुद्वयञ्चेत्यर्थः, अनोजे समे जतौ जगणतगणौ जगरु जगणो गुरुः पुनश्च गुरुश्चेत् तदा आख्यानकी नाम वृत्तं स्यात्।

(१८) जतावितिः। विषमे जतौ जगौ गः जगणतगणाभ्यां जगणो गुरुद्वयञ्चेत्यर्थः, समे पादे चेत् यदि तौ जगौ गः तगण-जगणाभ्यां परौ गुरू भवतः तदा एषा विपरीतपूर्वा नाम वृत्तं स्यात्।

(१९) स्यादिति। अयुग्मके विषमे रजौ रयौ रगणजगणरगण-जगणौ इत्यर्थः, समे पादे चेत् यदि जरौ जरौ जगणरगणौ पुनश्च

Digitized by Google

१३। अयुजि ननभभाः समकेपितु नयुगरयुगलं तदा
(कौमुदी) ॥ (२०) इति छ० प०

१४। यदिविषमे भवतो नजौजरौ सजयाः समेतु जगुरु
(मञ्जुसौरभम्) ॥ (२१) इति छ० प०

१५। विषमे ससजा यदा गुरु चेत् सभरा येनतु (मालभा-
रिणीयम्) ॥ (२२) इति छ० प०

इदि छन्दमञ्जर्यामर्धसमाख्यस्तृतीयः स्तवकः।

जगणरगणौ ततश्च गुरुर्भवति तदा इयं जवात् परामतो नाम वृत्तं स्यात्।

(२०) अयुजीति। अयुजि विषमे पादे ननभभाः नगणौ ततो भगणौ, समके समे पादे अपितु किन्तु नयुगरयुगलं नगणौ रगणौ चेत्यर्थः तदा कौमुदी नाम वृत्तं स्यात्।

(२१) यदीति। यदि विषमे पादे नजौ जरौ नगणजगणौ ततश्च जगणरगणौ, समेतु किन्तु समे पादे च जवाः सगणजगण-यगणाः रलघु रगणो लघुर्गुरुश्च तत् वृत्तं मञ्जुसौरभं नाम स्यात्।

(२२) विषमे इति। विषमे पादे यदा ससजा गुरु, सगणौ जगणौ गुरुश्चेत्यर्थः, चेत् समे पादे सभरा येन तु, किन्तु सगण-भगणरगणास्ततो यगणः इयं मालभारिणी नाम वृत्तं स्यात्।

Digitized by Google

चतुर्थः स्तवकः।

—००—

अथ विषमवृत्तम्।

१। प्रथमे स जौ यदि सलौ च
न स ज गुरुकाण्यनन्तरम्।
यद्यथ भ न भ गाः स्युरथो
स ज सा ज गौ च भवतीयमुद्गता॥ (१)

विलसास गोपरमणीषु तरणितनया प्रभोद्गता।
कृष्णनयनचकोरयुगे दधती सुधांशुकिरणोर्मिबिभ्रमम्॥(२)

२। प्रथमे स जौ यदि स लौ च
न स ज गुरुकाण्यनन्तरम्।

---

(१) प्रथमे इति। यदि प्रथमे पादे सजौ सलौ च सगण-जगणसगणा वसुवेदैर्यः, अनन्तरं द्वितीये पादे इत्यर्थः नयजगुरु-काणि नगणयगणजगणा गुरवश्चेत्यर्थः, यदि अथ अनन्तरं तृतीये पादे इत्यर्थः भनभगाः भगणनगणभगणा गुरवश्चेत्यर्थः स्युर्भवन्ति, अथो अनन्तरं चतुर्थे पादे सजसा जगौ च सगणजगणसगणा जगणो गुरुश्च भवति, इयम् उद्गता नाम वृत्तं स्यात्।

(२) उदाहरति विलसासेति। प्रभवा कान्त्या उद्गता वसुहिता वसुञ्जयेत्यर्थः तरणितनया यमुना गोपरमणीषु व्रजाङ्गनासु सखीषु अपिरत्नाध्याहार्यः अनादरे सप्तमी। ताः अपि अनादृत्येत्यर्थः। कृष्णस्य नयने एव चकोरौ पक्षिविशेषौ तयोर्युगे युगले सुधांशोश्चन्द्रस्य किरणानाम् ऊर्मिविभ्रमं तरङ्गभ्रान्तिं दधती कुर्वतीत्यर्थः विलसाम् विरराज कृष्णस्य यमुना अतिमनोहारिणी अभूदिति भावः। व्यति-रेकालङ्कारः।

(३) प्रथमे इति। प्रथमे आद्ये पादे यदि सजौ सलौ च

यत्यथ भ न ज ल गाः स्युरथो
स ज सा ज गौ च भवतीयमुद्गता ॥ (३)
अथ वासवस्य वचनेन
रुचिरवदनस्निलोचनम् ।
क्लान्तिरहितमभिराधयितुं
विधिवत्तपांसि विदधे धनञ्जयः ॥ (४)
इति भारवावुद्गताभेदः ।

३ । त्रयमुद्गतासदृश्यमेव पदमिह तृतीयमन्यथा ।
जायते रनभगैर्ग्रथितं कथयन्ति सौरभकमेतदीदृश्यम् ॥ (५)
परिभूतप्रफुल्लशतपत्रवनविस्तृतगन्धविभ्रमा ।

सगणजगणसगणा लघुश्चेत्यर्थः अनन्तरं द्वितीये पादे इत्यर्थः नसज-गुरवश्च नगणसगणजगणा गुरुश्चेत्यर्थः, अथ अनन्तरं तृतीये पादे इत्यर्थः यदि भनजगाः भगणनगणजगणा लघुर्गुरुश्च स्युः अथो चतुर्थे पादे सजसा जगौ च सगणजगणसगणा जगणो गुरुश्च भवति, इयम् उद्गता नाम स्यात् ।

(४) उदाहरति अथेति । अथ इन्द्रान्तर्धानानन्तरं रुचिरं प्रसन्नं वदनं यस्य तथाभूतः धनञ्जयः अर्जुनः वासवस्य इन्द्रस्य वचनेन उपदेशेन विलोचनं हरम् अभिराधयितुं क्लान्तिरहितम् अक्लम-मित्यर्थः अश्रमविगणय्येति भावः विधिवत् यथाविधि तपांसि विदधे कृतवान् ।

(५) त्रयमिति । इह छन्दोग्रन्थे त्रयं पदं प्रथमद्वितीयचतुर्थ-पादा इत्यर्थः उद्गतायाः पूर्वोक्तायाः सदृशं तृतीयं तृतीयपाद इत्यर्थः रनभगैः रगणनगणभगणैः गुरुणा च अन्यथा ग्रथितं जायते इतीत्थं शेषः, तदा ईदृश्यमेतत् इत्थं सौरभकं कथयन्ति ।

(६) उदाहरति परीति । हे हरे ! कृष्ण ! परिभूतः तिरः

कस्य हृदय हरतीह हरे! मुखपद्मसौरभकला तवाद्भुता ॥(६)

४। नयुगं सकारयुगलञ्च भवति चरणे तृतीयके।
तदुदितमुरुमतिभिर्ललितं यदि शेषमस्य सकलं यथोदिता ॥(७)

व्रजसुन्दरीसमुदयेन
मुदितमनसा स्म पीयते।
हिमकरगलितमिवामृतकं
ललितं मुरारिमुखचन्द्रविद्रुतम् ॥ (८)

भवत्यर्द्धसमं वक्त्रं विषमञ्च कदाचन।
तयोर्द्वयोरुपान्तेऽत्र छन्दस्तदधुनोच्यते ॥ (९)

स्फुतः फुल्लानां विकसितानां नवपल्लवनानां पद्मसमूहानां विस्तृतः विस्तारं गतः तत्सम्बन्धिनः सौरभविलासः यया तादृशी तव अद्भुता सुखपद्मस्य सौरभकला सौगन्ध्यलेशः दृष्ट्वा जगति कस्य जनस्य हृत् हृदयं न हरति? सर्वस्यैव हरतीत्यर्थः।

(७) नेति। यदि तृतीये चरणे नयुगं नकारयुगलञ्च भवति, अस्य पद्यस्य शेषं सकलं प्रथमहितीयचतुर्थचरणा इति भावः उदुगता यथा उदितासदृशमित्यर्थः भवति तत् उरुमतिभिः महामतिभिर्विद्वद्भिः ललितम् उदितम् उक्तम्।

(८) उदाहरति व्रजेति। व्रजसुन्दरीसमुदयेन गोपीगणेन मुदितमनसा प्रीतमनसा सता हिमकरात् चन्द्रात् गलितमिव निःसृतमिव ललितं मनोहरं मुरारेः कृष्णस्य मुखचन्द्रात् विद्रुतं विगलितम् अमृतमेव अमृतकं रस इत्यर्थः पीयते स्म पीतम्।

(९) भवतीति। वक्त्रं नाम अष्टाक्षरं वृत्तं कदाचन अर्द्धसमं विषमञ्च द्विविधं भवति तयोः द्वयोरर्द्धसमविषमयोः वक्त्रयोः उपान्ते वक्त्रभवर्णपर्य्यन्ते इत्यर्थः यत् छन्दः अक्षरनियमः, अत्र छन्दोग्रन्थे अधुना तत् उच्यते कथ्यते।

Digitized by Google

५ वक्त्रं युग्मगां म गौ स्यातामब्धे र्यौऽनुष्टुभिख्यातम् ॥ (१०)
वक्त्राम्भोजं सदा क्षीरं चक्षुर्नीलोत्पलं फुल्लम् ।
वल्लवीनां मुरारातेश्चेतोभृङ्गं जहारोच्चैः ॥ (११)
६ । युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्त्तितम् ॥ (१२)
रासकेलिसतृष्णस्य कृष्णस्य मधुवासरे ।
आसीन्नोपमृगाक्षीणां पथ्या वक्त्रमधुस्रुतिः ॥ (१३)
७ । पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः ॥ (१४)

---

(१०) वक्त्रमिति । अनुष्टुभि अक्षराचरवृत्ते युग्म्यां समपादाभ्यां द्वितीयचतुर्थाभ्यामित्यर्थः तौ प्राप्येत्यर्थः ववर्ण पञ्चमौ । मगौ मगणौ गुरुश्चेत्यर्थः स्यातां ततः अब्धेश्चतुर्थात् परं जगणः, तदा वक्त्रं नाम वृत्तं ख्यातम् ।

(११) उदाहरति वक्त्राम्भोजमिति । मुरारातेः कृष्णस्य क्षीरं विमलरं वक्त्रं वदनमेव अम्भोजं पद्मं तथा फुल्लं विकसितं चक्षुरेव नीलोत्पलं सदा सततं वल्लवीनां गोपीनां चेतोभृङ्गं चित्तमधुकरम् उच्चैः जहार ।

(१२) युजोरिति । युजोः समपादयोः द्वितीयचतुर्थयोरित्यर्थः चतुर्थतः चतुर्थवर्णात् परतः जेन जगणेन पथ्यावक्त्रं नाम वृत्तं प्रकीर्त्तितं कथितम् । तथाचास्य द्वितीयचतुर्थयोः पादयोः पञ्चमसप्तमवर्णौ लघू, षष्ठस्य गुरुर्भवत्येव तदन्यत्र नास्ति नियम इति भावः ।

(१३) उदाहरति रासेति । मधुवासरे वसन्तदिवसे रासकेलौ रासक्रीड़ायां सतृष्णस्य साभिलाषस्य कृष्णस्य वक्त्रात् मधुस्रुतिः सुधानिस्रवः गोपमृगाक्षीणां गोपीनां पथ्या अनुकूला मनोहारिणीति भावः आसीत् ।

(१४) पञ्चममिति । सर्वत्र सर्वस्मिन् वक्त्रे अक्षरे वृत्ते वा

प्रयोगे प्रायिकं प्राहुः केऽप्येतल्लक्षणक्षमम्।
लोकेऽनुष्टुविति ख्यातं तस्यानुष्टाक्षरता मता॥ (१५)
इति छन्दोमञ्जर्यां विषमवृत्ताख्यश्चतुर्थः स्तवकः।

पञ्चमः स्तवकः।

—oo—

अथ मात्रावृत्तम्।

१। लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः।
षष्ठो जश्च नलघु वा प्रथमार्द्धे नियतमार्य्यायाः॥

द्वितुर्यवोः पादयोरिति शेषः पञ्चमं पञ्चमोवर्णं ह्रस्वः लघु, षष्ठश्च षष्ठो वर्णश्च गुरु पादानां सर्वेषामेवेति शेषः, शेषेषु वर्णेषु अनियमः गुरुलघुनियमो नास्तीत्यर्थः।

(१५) प्रयोग इति। केऽपि पण्डिताः प्रयोगे श्लोकानामिति शेषः एतत् पूर्वोक्तं वक्ष्यमाणलक्षणं प्रायिकं बहुलं प्राहुः कथयन्ति, लोके च अनुष्टुभ्वृत्तमेतत् ख्यातं प्रसिद्धं तस्य अनुष्टुवृत्तस्य अष्टाक्षरता मता उक्ता। एतदतिरिक्तन्तु गाथां नाम कथयति वृत्तरत्नाकरः। यथा विषमाक्षरपादं वा पादैरयं दशधर्मवत्। वक्ष्यन्ते लोक्षणमत्र गाथेति तत्पूर्वसूरिभिः प्रोक्तमिति विषमाक्षरपादं यथा। मधुकैटभौ दुरात्मानाविति। देवीमाहात्म्यम्। पादैरयं चतुष्पादतिरिक्तमित्यर्थः यथा। दशधर्मं न जानन्ति धृतराष्ट्रनिबोध तान्। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः। त्वरमाणश्च भीतश्च कुब्जः कामी च ते दश।

(१) लक्ष्मैतदिति। आर्य्यायाः प्रथमार्द्धे सप्तगणाः त्रयोदशः सर्वा-त्यगण्यादिगुरवोऽन्त्य चतुष्कला द्विलघुकलवत्यः गोपेता मात्रावृत्तविद्-

षष्ठे द्वितीयखात् परकेन्ले सुखखाच्च संयतिपदनियमः।
चरमेऽर्द्धे पञ्चमके तत्रादिश्च भवति षष्ठो लः॥ (१)

तेति भावः नियतं भवति। इह आर्यायां विषमे प्रथमे तृतीये च पादे लः लघ्वः न भवति, षष्ठो गणः अस्य लघ्वो वा गुरुर्वा चतुर्लघुरूपो वा भवतीति शेषः। एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते। इति क्रमेण एकमात्रया एकोऽक्षरः एकेन च गुरुणा मात्राहयं बोद्धव्यम्। तथाच लघुचतुष्टयम् एकेन गुरुणा सहितं लघुद्वयं गुरुद्वयं वा चतुर्मात्रो गणो बोध्यः। केचित्तु दीर्घान्ता एवाक्षरमात्रादि, मात्राद्वयेन न भवतीत्याहुः। अत्र यति नियममाह षष्ठे इति षष्ठे गणे तु नगणलघुरूपे सति द्वितीय खात् द्वितीयलघोः परमिति शेषः तथा परके सप्तमे गणे तु लघुरूपे सति सुखखात् प्रथमलघोः परं स यतिपदनियमः पदविच्छेदस्थलम्। इह चरमेऽर्द्धे पञ्चमके गणे तु चतुर्लघुरूपे यतीत्यर्थः तत्रात् सुखखात् आद्य लघोः परं स यतिपदनियमः षष्ठ गणः एकलघुर्भवति। तथाच आर्यायाः पूर्वार्द्धे त्रिंशन्मात्राः परार्द्धे सप्तविंशतिमात्रा इति तत्रात् सप्तपञ्चाशन्मात्रा आर्येति फलितम्। अन्ये तु अस्याः पादान्ते एव यतिरिच्छन्ति। अस्याश्च गुरुलघुभेदेन संज्ञाभेदः यथा। यत्र सप्तविंशतिर्गुरवे लघवश्च त्रयः, सा त्रिंशदक्षरा लक्ष्मीनामार्या सर्ववन्द्या। यत्र षड्विंशतिर्गुरवः पञ्चलघवश्च, सा ऋद्धिनाम एकत्रिंशदक्षरार्या। यत्र पञ्चविंशतिर्गुरवः सप्तलघवश्च सा वृद्धिनामार्या। यत्र चतुर्विंशतिर्गुरवः लघवश्च नवसंख्यकाः सा बल्या नाम। यत्र त्रयोविंशतिर्गुरवः लघवश्चैकादश, सा विद्या नाम। यत्र द्वाविंशतिर्गुरवः लघवश्च त्रयोदश सा क्षमा नाम। इत्थं क्रमेण एकैकगुरुह्रासेन द्विद्विलघुवृद्धया देवी २१। गौरी २०। रात्रिः १९। धृतिः १८। आया १७। कान्तिः १६। मङ्गलावा १५। कीर्त्तिः १४। विद्या १३। कमोरमा १२। माहिनी ११। विभा १०। कामिता ९। शोभा ८। हरिणी ७। पत्नी ६। वारुणी ५। तुरगी ४। सिंही ३।

कृष्णः मिश्रः सुतो मे वल्लवकुलटाभिराकृतो न रटेत्।
अथमपि वसत्यसाविति जगाद गोष्ठां यशोदार्या ॥ (२)
वृन्दावने सलीलं वल्गुद्रुमकाण्डनिहिततनुयष्टिः।
क्षीरमुखार्पितवेणुः कृष्णो यदि मनसि कः स्वर्गः ॥ (३)
पथ्या विपुला चपला मुखचपला जघनचपला च।
गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधार्या ॥ (४)

कृष्णी २। तदेवं षड्विंशतिमात्राव्यार्यावाः। एकगुरुका आर्या न भवेदिति तन्नाम नोक्तम्। अस्याः पाठक्रमो यथा। प्रथमपादो वृंद-पदवत् अक्षरं पक्षते, द्वितीयः सिंहपदक्रमवत् उद्धतं पक्षते, तृतीयो गजेन्द्रपदवत् सलीलं पक्षते, चतुर्थः वर्धमानवत् चपलं पक्षते। अस्या जातिभेदो यथा। तयोरमवद्गुरुर्विप्रा। एकविंशतिवद्गुः क्षत्रिया। षड्विंशतिषड्गुर्वैश्या। तदन्या शूद्रा। अस्याः कोलोव्यादिर्नेया। एकनावका कुलीना। द्विनावका संकटीना। त्रीनावका रङ्का। चतुर्नावका वेश्या। नावको जगच्च इति बोध्यम्। अस्याः प्रथम-तृतीयपञ्चमषष्ठस्थानेषु जगणो भवति सार्या दोषायेति पिङ्गलाचार्यः।

(२) उदाहरति कृष्ण इति। कृष्णः मे मम मिश्रः सुतः अयौ वल्लवकुलटाभिः गवाभिर्गोपीभिः आकृतः आकृष्टः सन् रटेत् अथ-मपि न वसति इति आर्या। आर्यी यशोदा गोष्ठां वल्लवसमाजे जगाद। अत्र जगच्चतुर्थ्यार्या।

(३) वृन्दावन इति। वृन्दावने वल्गुद्रुमकाण्डे मनोहरतरुस्कन्धे निहिता अर्पिता तनुयष्टिर्येन तथोक्तः सलीलं सविभ्रमं क्षीरे दुग्धे अर्पितः निहितः वेणुः यंत्री येन तथाविधः कृष्णः मनसि यदि स्यादिति शेषः तदा कः स्वर्गः? नातःपरं स्वर्गसुखमिति भावः। अत्र न जगद्युक्तार्या।

(४) आर्यावा नवविधत्वं दर्शयति पथ्येति पथ्यादयः आर्यागी-त्यन्ता नव आर्याभेदा इत्यर्थः॥

२ । प्रथमगणत्रयविरतिर्दलयोरुभयोः प्रकीर्त्तिता पथ्या ॥(५)
जय जय नाथ ! मुरारे ! केशव ! कंसान्तकाच्युतानन्त !
कुरु करुणामिति भणितिः पथ्या भवरोगदुःस्थानाम् ॥ (६)
३ । संलक्ष्यगणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।
यस्यास्यां पिङ्गलनागो विपुलामिति समाख्याति ॥ (७)
पुंसां कलिकालव्यालहतानां नास्त्युपहृतिरल्पापि ।
वीर्य्यविपुला मुखे चत् स्यादगोविन्दाख्यमन्त्रकला ॥ (८)
४ । दलयोर्द्वितीयतूर्यौ गणौ जकारौ तु यत्र चपला सा ॥(९)

---

(५) पथ्यां लक्षयति प्रथमेति । उभयोर्द्वयोर्दलयोः प्रथमगणत्रये विरतिर्यस्यां तादृशी आर्य्या पथ्या नाम प्रकीर्त्तिता ।

(६) उदाहरति जयेति । हे नाथ मुरारे ! केशव ! कंसान्तक ! अच्युत ! अनन्त ! करुणां कृपां कुरु, इति भणितिः उक्तिः भवः संसार एव रोगः तेन दुःस्थानां पीड़ितानां पथ्या अनुकूला हितकारिणीत्यर्थः भवतीति शेषः ।

(७) विपुलां लक्षयति संलक्ष्येति । यस्या आर्य्यायाः द्वयोः शकलयोः खण्डयोर्द्वयोरित्यर्थः आदिमं गणत्रयं संलक्ष्य अतिक्रम्य पादो भवति पिङ्गलनागस्तां विपुलाम् इति नाम्ना समाख्याति कीर्त्तयति । अत्र गणत्रयान्ते यत्र क्वचित् पादान्तेति बोध्यम् ।

(८) उदाहरति पुंसामिति । कलिकाल एव व्यालः सर्पः तेन हतानां दष्टानां पुंसां चेत् यदि मुखे वीर्य्ये च प्रभावेच विपुला अतिमहती गोविन्द आख्या यस्य तस्य कृष्णस्येत्यर्थः मन्त्रकला मन्त्रविन्दुः स्यात्, तदा अल्पापि विन्दुरपीत्यर्थः उपहृतिः क्षतिः नास्ति ।

(९) चपलां लक्षयति दलयोरिति । यत्रार्य्यायां दलयोः पूर्वापरार्द्धयोः द्वितीयतृतीयौ गणौ जकारौ, सा चपला नामार्य्या ।

Digitized by Google

विराड्लक्षा श्लोकः पूरयितव्यः।

चपला न चेत् कदाचित् दृशां भवेद्भक्तिभावना कृष्णे।
धर्मार्थकाममोक्षास्तदा करस्था न सन्देहः॥ (१०)

५। आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः।
शेषः पूर्वजलक्ष्मा सुखचपला सोदिता मुनिना॥ (११)

नन्दसुत! वञ्चकोऽलं दृढं न ते प्रेम गच्छ तत्रैव।
यत्र भवति ते रागः क्वापि जगादेति सुखचपला॥ (१२)

६। प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे च चपलायाः।
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला॥ (१३)

कृष्णः शृङ्गारपटुर्यौवनमदरागचपललालिताङ्गः।

---

(१०) उदाहरति चलेति। चेत् यदि दृशां कृष्णे भक्तिभावना कदाचित् चपला न भवेत् तदा धर्मार्थकाममोक्षाश्चतुर्वर्गाः करस्थाः करतलवर्त्तिनः, न सन्देहः, संशयो नास्तीत्यर्थः।

(११) सुखचपलां लक्षयति आद्यमिति। यस्या आर्यायाः सकलम् आर्यां दलं पूर्वार्द्धमित्यर्थः चपलागतं लक्ष्म लक्षणं भजेत आश्रयेत्, शेषः परार्द्धमित्यर्थः पूर्वजलक्ष्मा आर्या पूर्वार्द्धलक्षणाक्रान्ता, सा मुनिना पिङ्गलेन सुखचपला उदिता उक्ता।

(१२) उदाहरति नन्दसुतेति। हे नन्दसुत कृष्ण! त्वं वञ्चकः धूर्त्तः, ते तव प्रेम दृढं स्थिरं न, यत्र यस्यां ते तव रागः अनुरागः प्रेमेत्यर्थः भवति तत्रैव गच्छ, सुखचपला अतिसुखरा क्वापि सुन्दरी इति जगाद उवाच।

(१३) जघनचपलां लक्षयति प्राक्प्रेति। या प्रथमेऽर्द्धे प्राक् प्रतिपादितं कथितं लक्ष्म आर्यापूर्वार्द्धलक्षणमित्यर्थः प्रथमात् इतरे अन्यस्मिन् अर्द्धे परार्द्धे इत्यर्थः चपलाया लक्ष्म आश्रयेत, विशुद्धधीभिः शुद्धमतिभिः पण्डितैः सा जघनचपला उक्ता।

(१४) उदाहरति कृष्ण इति। शृङ्गारे निधुवनव्यापारे पटु-

आसीद्व्रजाङ्गनानां मनोहरो जघनचपलानाम् ॥ (१४)

७ । आर्याप्रथमार्द्धसमं यस्याः अपरार्द्धमाह तां गीतिम् ॥(१५)

केशववंशीगीतिर्लोकमनोहरिणहारिणी जयति ।

गोपीमानग्रन्थे विमोचनी दिव्यगायनाश्चर्या ॥ (१६)

८ । आर्यापरार्द्धतुल्ये दलद्वये प्राहुरुपगीतिम् ॥ (१७)

नवगोपसुन्दरीणां रासोल्लासे मुरारातिम् ।

अक्षारयदुपगीतिः स्वर्गकुरङ्गीदृशां गीतेः ॥ (१८)

९ । आर्याप्रथमदलद्वितये विपरीते पुनरिहोद्गीतिः ॥ (१९)

र्निदुषः तथा यौवनस्य मदः तेन यो रागः विषयवासना तेन चपलं लोलं लक्षितं मनोहरम् अङ्गं यस्य तथाविधः कृष्णः जघनचपलानां अत्यकारिणीनामिति भावः व्रजाङ्गनानां मनोहरः आसीत् ।

(१५) गीतिं लक्षयति आर्येति । यस्याः अपरार्द्धम् आर्यायाः प्रथमार्द्धेन समं तां गीतिम् आहुः ब्रुवीति पिङ्गलनाग इति शेषः ।

(१६) उदाहरति केशवेति । लोकानां जगतां लोकस्य भुवने जने दलभरः मनांस्येव हरिणान्तान् हरतीति तथाभूता गोपीनां मानः प्रणयकोपः स एव ग्रन्थिः प्रेमप्रतिबन्धः इत्यर्थः तस्य विमोचनी विध्वंसनी मानहारिणीत्यर्थः दिव्यं गायतीति तथोक्ता अतएव आश्चर्या अपूर्वा केशवस्य कृष्णस्य वंशीगीतिः वेणुसङ्गीतं जयति सर्वोत्कर्षेण वर्त्तते ।

(१७) उपगीतिं लक्षयति आर्येति । आर्यायाः परार्द्धेन तुल्ये दलद्वये उभयार्द्धे सति उपगीतिं प्राहुः बुधा इति शेषः ।

(१८) उदाहरति नवेति । नवानां नवीनानां तरुणीनामित्यर्थः गोपसुन्दरीणां रासोल्लासे रासमहोत्सवे उपगीतिः स्वर्गस्थितौ गीतं मुरारातिं कृष्णं स्वर्गकुरङ्गीदृशां सुरसुन्दरीणां गीतेः कर्मणि षष्ठी गीतिमित्यर्थः अक्षारयत् ।

(१९) उद्गीतिं लक्षयति आर्येति । आर्यायाः प्रथमदले कृष्णदले

Digitized by Google

नारायणस्य सन्ततमुद्गीतिः संस्मृतिर्भक्त्या ।
अर्थायामासक्तिर्दुस्तरसंसारसागरे तरणिः ॥ (२०)

१० । आर्याप्राग्दलमन्तेऽधिकगुरु तादृग् परार्धमार्यागीतिः ॥ (२१)

हिरादृत्या श्लोकः पूरणीयः ।

हर्षांसुस्तिमितदृशः प्रमोदरोमाञ्चकञ्चुकाञ्चितदेहाः ।
आर्यां गीतिं भक्त्या गायन्ति श्रीपतेश्चरितसम्बद्धाम् ॥ (२२)

चारुसमीरणरमणे हरिणकलङ्किरणावली सविलासा ।
आवहरामोहा वेलामूले विभावरी परिहीनेति भट्टौ ॥(२३)

इत्यार्या ।

विपरीते पूर्वार्द्धे परार्द्धेच तस्मे परार्द्धे च पूर्वार्द्धतुल्ये इत्यर्थः इह पन्थे उद्गीतिः कथ्यते इति शेषः ।

(२०) उदाहरति नारायणस्येति । सन्ततम् अनवरतं नारायणस्य कृष्णस्य भक्त्या उद्गीतिः उच्चैः कीर्त्तनं संस्मृतिः सम्यक् अर्थं तथा अर्थायाम् आराधने आसक्तिरनुरागः दुस्तरे तरीतुमशक्ये संसारसागरे भवाब्धौ तरणिः नौका ।

(२१) आर्यागीतिं लक्षयति आर्येति । आर्यायाः प्राग्दलं पूर्वार्द्धम् अन्ते अधिकगुरु, परार्द्धञ्च तादृक् अधिकगुरु चेदिति शेषः तदा आर्यागीतिर्नाम ।

(२२) उदाहरति हर्षेति । हर्षांसुभिः आनन्दवारिभिः स्तिमिताः स्निग्धा दृशो येषां तथोक्ताः प्रमोदेन आनन्देन यः रोमाञ्चः स एव कञ्चुकः नारायणविशेषः तेन अञ्चितः अलङ्कृत इत्यर्थः देहो येषां तथाभूताः सन्तः भक्त्या श्रीपतेः कृष्णस्य चरितसम्बद्धाम् आर्यागीतिं साधुसङ्गीतं गायन्ति बुधा इति शेषः ।

(२३) चारुेति । चारुणा मनोज्ञेन समीरणेन वायुना लक्षयते-

अथ वैतालीयम्।

१। षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः।
न समान्त्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः॥ (२४
घुसृणेन मदेन चर्चितं तव यन्निन्दति राधिके! कुचम्।
मुदमातनुतेऽत्र पाकिमं वैतालीयमिदं फलं हरेः॥ (२५)

नेति भावः रमणे मनोहरे वेलामूले सप्तकृतीरे हरिणकलङ्कस्य चन्द्रस्य किरणावलीभिः सविलासा योषितेत्यर्थः अतएव आवद्धः जनितः रामस्य मोहो मूर्च्छा यस्यां तादृशी विरहिणीत्यासहीपकत्वादिति भावः विभावरी रजनी परिक्षीणा गता प्रभातेत्यर्थः ।

(२४) षड्विति। विषमे प्रथमे तृतीये च पादे षट्कला मात्राः, समे पादे द्वितीये चतुर्थे चेत्यर्थः अष्टौ कलाः स्युः। अत्र वैतालीये समे पादे ताश्च कलाः अष्टाविति शेषः निरन्तराः केवलघुरूपाः केवलगुरुरूपा वा नो भवन्ति, अपितु लघुगुरुमिश्रा एवेत्यर्थः। अत्र चाष्टकलासु मध्ये समा द्वितीयाप्रभृतिः कला पराश्रिता न स्यात् द्वितीयतृतीयकलयोः चतुर्थीपञ्चमकलयोस्तथा षष्ठीसप्तमकलयोरेकगुरुर्न कार्य इति भावः। अन्ते षट्कलान्ते अष्टकलान्ते च रलौ गुरुः रगणो लघुर्गुरुश्च ज्ञातव्या इति शेषः तथाच विषमे पादे चतुर्दशमात्राः, समे च षोडशमात्राः स्युरित्थं वैतालीयं नाम भवतीति फलितम्।

(२५) उदाहरति घुसृणेनेति। हे राधिके! यत् तालीयं फलं घुसृणेन कुङ्कुमेन कुङ्कुमं घुसृणं रक्तमिति यज्ञरत्नावली। मदेन हेमन्तेन मदोरेतसि वसन्ते मीमिति मेदिनी। चर्चितम् अनुलिप्तं तव कुचं निन्दति अनुकरोतीति भावः तर्हि पाकिमं पाकेन निष्पन्नं पक्वमित्यर्थः इदं तालीयं फलं तालफलं हरेः कृष्णस्य मुदं प्रमोदम् आतनुते करोति वैयङ्गोऽत्र पादपूरणार्थः। वै स्यात् सम्बोधने पादपूरणेऽनुनयेऽपि चेति मेदिनी। तद्वैतालीयमित्यपि पाठः।

Digitized by Google

२। तत्रैवान्तेऽधिके गुरौ स्यादौपच्छन्दसकं कवीन्द्रहृद्यम्॥ (२६)

विरामस्था श्लोकः पूरयितव्यः।

आतन्वानं मुरारिकान्तास्त्रौपच्छन्दसकं हृदो विनोदम्।
कंसं यो निर्जघान देवो वन्दे तं जगतां स्थितिं दधानम्॥ (२७) इति वैतालीयम्।

—०—

अथ पज्झटिका।

१। प्रतिपद्यमकितषोड़शमात्रा-
नवमगुरुत्वविभूषितगात्रा।
पज्झटिकापुनरत्र विवेकः
क्वापि न मध्यगुरुर्गण एकः॥ (२८)

---

(२६) औपच्छन्दसकं लक्षयति तत्रैवेति। तत्रैव वैतालीये अन्ते अधिके गुरौ सति औपच्छन्दसकं स्यात् तत् कवीन्द्राणां हृद्यं मनोरमम्।

(२७) उदाहरति आतन्वानमिति। यः देवः मुरारिकान्तास्तु असुराङ्गनास्तु औपच्छन्दसकम् आयवान्तरूपं वाद्यक्रियाविलासं हृदो विनोदं चित्तसन्तोषम् आतन्वानं कुर्वाणं कंसं निर्जघान, जगतां स्थितिं दधानं तं देवं हरिं वन्दे प्रणमामि।

(२८) प्रतिपदं प्रतिपादमित्यर्थः यमकिता युग्मविच्छिन्नाः षोड़शमात्रा यस्यां तथोक्ता तथा नवममात्रायां गुरुत्वेन विभूषितं रञ्जितं मात्रम् अवयवः यस्याः तथाभूता पज्झटिका नाम स्यात् अत्र पुनः विवेक एषः यत् क्वापि कुत्रापि मध्यगुरुः एकोऽपिगणो न स्यादिति शेषः।

Digitized by Google

तरलवतंसाश्लिष्टस्कन्ध-
श्चलतरपज्झटिकाकटिबन्धः ।
मौलिचपलशिखिचन्द्रकवृन्दः
कालियशिरसि ननर्त्त मुकुन्दः ॥ (२९)
नवमगुरुत्वं व्यभिचरति च ।
रणधरणीजितरजनिविहारीति ॥ (३०)
मात्रात्रयोदशकं यदि पूर्वं लघुकविरामि ।
पश्चादेकादशकन्तु दोहड़िका द्विगुणेन ॥ (३१)
प्राकृतभाषायां प्रचारः ।
राईदोहड़िपठण सुणि हसिअ काणगोआल ।
विन्दावणघणकुञ्जचलिओ वमण रसाल: ॥
इति छन्दोमञ्जर्यां मात्रावृत्ताख्यः पञ्चमः स्तवकः ।

---

(२९) उदाहरति तरलेति । तरलेन चञ्चलेन वतंसेन कर्णकुण्डलेन आश्लिष्टः स्पृष्टः स्कन्धः यस्य तादृशः तथा चलतरा अतिचञ्चला पज्झटिका क्षुद्रघण्टिका कटिबन्धे यस्य तथाभूतः मौलिषु श्रेष्ठेषु चपलानि स्निग्धानि मयूरस्य चन्द्रकवृन्दानि बर्हनिचयाः यस्य तथाविधः मुकुन्दः कृष्णः कालियस्य शिरसि ननर्त्त ।

(३०) नवमगुरुत्वं व्यभिचरति च यथा रणधरणी जितरजनि विहारीति ।

(३१) मात्रेति । पूर्वं प्रथमे पादे त्रयोदशमात्राः यदि लघुकविरामि अन्त्यलघु, पश्चात् द्वितीये पादे एकादशकम् एकादशमात्रा इत्यर्थः आदौ लघुकविरामीति बोद्धव्यं वा द्विगुणेन द्विरावृत्तेन दोहड़िका नाम ।

Digitized by Google

षष्ठः स्तवकः।

—००—

अथ गद्यप्रकरणम्।

१। पद्यं गद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः।
प्रागुक्तलक्षणं पद्यं गद्यं सम्यति गद्यते॥ (१)

२। अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्।
चूर्णकोत्कलिकाप्राय वृत्तगन्धि प्रभेदतः॥ (२)

३। अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।

---

(१) गद्यमिति। बुधाः पण्डिताः। वाङ्मयं वाक्यं पद्यं गद्यमिति द्विविधं प्राहुः। पद्यं प्राक् पूर्वोक्तं लक्षणं यस्य तथाभूतम्। सम्यति गद्यमुच्यते। पद्यं चतुष्पदीत्युक्तं प्राक् द्विपदादीनां वेदादिष्वेव प्रायशो दर्शनात् काव्यादावेव पादचतुष्टयत्वाभिधानाच्च वस्तुतस्तु छन्दोवद्वानां वाक्यानामेव पद्यत्वव्यवहारः तदुक्तं छन्दोनियमवद्वाक्यं पद्यमित्यभिधीयते। इति छन्दोवद्वपद्यं पद्यमित्यपि च। एतेन न्यूनाधिकपादात्मकगाथाया अपि पद्यत्वसिद्धम्। तच्च पञ्चधा, तथाचोक्तं छन्दोवद्वपदं पद्यं तेनैवेदं च सप्तकं द्वाभ्यान्तु युग्मकं खन्दानितकं त्रिभिरिष्यते। कलापकं चतुर्भिः स्यात् पञ्चभिः कुलकं मतमिति पञ्चभिरिति न्यूनसंख्याव्यवच्छेदार्थम्। तेन पञ्चातिरिक्तसंख्यकैरपि कुलकं वेदितव्यम्। केचित्तु एकश्लोको सप्तकं स्यात् द्वाभ्यां युगलकः स्मृतः। त्रिभिर्गुच्छवती प्रोक्ता चतुर्भिश्च प्रभद्रकम्। वाचावली पञ्चभिः स्यात् षड्भिश्च करपाटकः॥ इति।

(२) गद्यं तद्भेदांश्चाह अपाद इति। अपादः चरणानिवद्ध इत्यर्थः। पदानां सुप्तिङन्तानां सन्तानः समूहः गद्यं, तच्च त्रिधा मतं कथितं चूर्णकं १ उत्कलिकाप्रायं २ वृत्तगन्धि ३॥

(३) चूर्णकं लक्षयति अकठोराक्षरमिति। अकठोराणि अकर्क-

Digitized by Google

तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥ (३)

४ । भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
दृत्तैकदेशसम्बन्धाद् दृत्तगन्धि पुनः स्मृतम् ॥ (४)

चूर्णकं यथा—

सहि त्रयाणामेव जगतां गतिः परमपुरुषः पुरुषोत्तमो दृप्तदानवभरेण भङ्गुराङ्गीं भवनि भवलोक्य करुणार्द्रहृदय स्तस्था भारमवतारयितुं रामकृष्णस्वरूपेणांशतो यदुवंशे ऽवततार । यस्तु प्रसङ्गेनापि स्मृतोऽभ्यर्चितो वा गृहीतनामा पंसां संसारसागरपारमवलोकयति । (५)

उत्कलिकाप्रायं यथा—

प्रणिपातप्रवणसप्रधानाग्रेषसुरासुरादिवृन्दसौन्दर्य्यप्रकटकिरीटकोटिनिविष्टस्पष्टमणिमयूखच्छटाच्छुरितचरणनखचक्र !

यानि कोमलानीत्यर्थः अक्षराणि यत्र तादृशं खल्वः अवकृतः समासो यत्र तथाविधं वाक्यं चूर्णकं विदुः । तत्तु गद्यं वैदर्भरीतिस्थं वैदर्भरीत्या रचितमित्यर्थः वैदर्भीमाह दर्पणः । माधुर्य्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका । अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरिष्यते इति । हृद्यतरं अतिमनोहरं भवेत् ।

(४) उत्कलिकाप्रायं दृत्तगन्धि च लक्षयति भवेदिति । समासाढ्यं समासभूयिष्ठं दृढाक्षरं कठोराक्षरयुक्तं गद्यम् उत्कलिकाप्रायं भवेत् । दृत्तैकदेशसम्बन्धात् छन्दोवद्वाक्यैकादेशसत्त्वादेतोरित्यर्थः दृत्तस्य पद्यस्य गन्धो विद्यतेऽत्रेति व्युत्पत्त्या दृत्तगन्धि स्मृतं कथितम् ।

(५) चूर्णकमुदाहरति सहीति । भङ्गुराङ्गीम् अवनताङ्गीं भवोन्मुखीमित्यर्थः अवनिं पृथ्वीम् । गृहीतनामा गृहीतं कीर्त्तितं लोकैरिति भावः नाम यस्य तथाभूतः । संसारसागरपारम् अवलोकयति संसारार्णवतरणाय कृपादृष्टिं वितरतीति यावत् ।

(६) उत्कलिकाप्रायमुदाहरति प्रणिपातेति । प्रणिपातप्रवणानां

विक्रमोद्दानवामपादाङ्गुष्ठनखरश्मिस्वरखचितब्रह्माण्डविवर-
निःसरच्छरद्दलितकरकरप्रकरभासुरसुरवाहिनीप्रवाहपवित्रीकृत-
पिष्टपवित्रितय ! कैटभारे ! क्रूरतरसंसारसागरनानाप्रकारावर्त्तविवर्त्तमानविग्रहं मा मनुगटहाण। (६)

इत्तगन्धि यथा—

जय जय जनार्दन ! सुकृतिमनस्तड़ागविकसरचरणपद्म !
पद्मपत्रनयन ! पद्मापद्मिनीविनोदराजहंस ! भास्वरयशः-
पटलपरिपूरितभुवनकुहर ! हरकमलासनादिदेवन्दारकवृन्द-

प्रणामपरायां सेवमानानां प्रणामसहितानां सुरासुरादिवृन्दानां देवदानवदैत्यादिनिवहानां सौन्दर्येण प्रकटाः सकलजना ये किरीटा तेषां कोटिषु उपरिभागेषु निविष्टाः निहिताः स्पष्टा दीप्यमाना मणयः रत्नानि तेषां मयूखच्छटाभिः किरणसमूहैः क्षुरितं रञ्जितं चरणनखानां चक्रवालसमूहः यस्य तथाभूतः तत्सम्बुद्धौ। विक्रमेण उद्दामस्य वामपादस्य अङ्गुष्ठनखस्य शिखरेण अग्रभागेन खचितं विदीर्णं यत् ब्रह्माण्डं तस्य विवरात् रन्ध्रात् निःसरन्ती शरद्दलितकरकरप्रकरभासुरा शरदचन्द्रकिरणनिचयवत् भासमाना या सुरवाहिनी मन्दाकिनी तस्याः प्रवाहेण स्रोतसा पवित्रीकृतं पिष्टपवित्रितयं भुवनत्रयं येन तथाभूतः तत्सम्बोधने। हे कैटभारे ! कैटभासुरनिसूदन ! क्रूरतरस्य अतिभीषणस्य दुस्तरस्य संसारसागरस्य नानाप्रकारैरावर्त्तैः घटनाभिरित्यर्थैः विवर्त्तमानः व्यथमानः विग्रहः शरीरं यस्य तथाभूतं माम् अनुगटहाण रक्ष।

(७) इत्तगन्ध्युदाहरति जयेति। सुकृतिनां पुण्यवतां मनांस्येव तड़ागाः सरांसि, तेषु विकसरे चरणपद्मे यस्य तथाभूतः तत्सम्बुद्धौ सज्जनमनोनिवासेत्यर्थः। पद्मा लक्ष्मीरेव पद्मिनी कमलिनी तदाख्यकामिनी च तस्या विनोदे मनसः प्रीणने राजहंसः तत्सम्बोधने। राजहंसो यथा पद्मिनीं विनोदयति तथा त्वं लक्ष्मीं विनोदयसीति भावः।

वन्दनीयपदारविन्दद्वन्द्व! द्वन्द्वनिर्मुक्तयोगीन्द्रहृदयमन्दिराविष्कृतनिरञ्जनज्योतिःस्वरूप! विश्वरूप! अनाथनाथ! जगन्नाथ! मा मनवधिभवदुःखव्याकुलं रक्ष रक्ष। (७)

८। व्यवहारोचितं प्रायो मयाछन्दोऽत्र कीर्त्तितम्।
प्रस्तारादि पुनर्नोक्तं केवलं कौतुकं हि तत्॥ (८)
सर्गैः षोड़शभिः समुज्ज्वलपदैर्नव्यार्थभव्याशयैः
येनाकारि तदच्युतस्य चरितं काव्यं कविप्रीतिदम्॥
कंसारेः शतकं दिनेशशतकद्वन्द्वञ्च तस्यास्वसौ।
गङ्गादासकवेः स्तुती कुतुकिनां सच्छन्दसां मञ्जरी॥

इति छन्दोमञ्जर्य्यां गद्यप्रकरणाख्यः नाम षष्ठः स्तवकः।

समाप्तोऽयं ग्रन्थः।

भास्वरेण विराजता वयसा षटत्रेण राशिना परिपूरितं व्याप्तं भुवनकुक्षिरं जगदन्तरालं येन तथाभूतः तत्सम्बुद्धौ। फरकमलाक्षनादिद्वन्द्वारक्षाणां शिवविरिञ्चिप्रभृतिदेवानां द्वन्द्वैः नमैः वन्दनीयम् अर्चनीयं पदारविन्दद्वन्द्वं चरणकमलयुगलं यस्य तथाविधः तत्सम्बुद्धौ। द्वन्द्वनिर्मुक्तानां शीतोष्णादिद्वन्द्वयुक्तानभिभूतानामित्यर्थः योगीन्द्राणां महायोगरतानां परमहंसानामित्यर्थः हृदयमन्दिरेषु चित्तसद्मसु आविष्कृतं प्रकटितं निरञ्जनं निष्कलुषं ज्योतिःस्वरूपं तेजो रूपं येन तथाभूतः तत्सम्बुद्धौ। नास्ति अवधिः मेयो यस्य तादृशं यत् भवदुःखं संसारक्लेशः तेन व्याकुलं व्यथितं मां रक्ष रक्ष परित्राहि परित्राहि।

(८) उपसंहरति व्यवहार इति। अत्र ग्रन्थे मया व्यवहारोचितं छन्दः प्रायः प्रायेण कीर्त्तितम्। प्रस्तारादि प्रस्तार्य्यन्ते बहुगुरुभेदाद् विस्तार्य्यन्ते छन्दांसि अनेनेति प्रस्तारः तदादि पुनः

किन्तु न उक्तं हि यतः तत् प्रस्तारादिकथनं केवलं कौतुकम् कौतुकमयं ताडपत्रप्रबन्धे प्रयोजनाभावादिति भावः।

इति वि, ए, उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्येण विरचिता छन्दोमञ्जरीव्याख्या समाप्ता।

Digitized by Google

५६ हृहदारण्यक सटीक सभाष्य १०
६० सुश्रुत (वैद्यक) ४
६१ शार्ङ्गधर (वैद्यक) १
६२ वेतालपञ्चविंशतिः III
६३ पातञ्जलदर्शन(सभाष्यसटीक) २
६४ आत्मतत्त्वविवेक(बौद्धाधिकार) २
६५ शुक्तिकोपनिषत् ।
६६ उपमानचिन्तामणि ।
६७ नागानन्द नाटक १०
६८ पूर्णप्रज्ञ दर्शनम् सभाष्य १
६९ चन्द्रशेखरचम्पूकाव्य २
७० साहित्यदर्पणम् (मूलमात्र) III
७१ सामवेदस्य आरण्यसंहिता सायणाचार्यकृत भाष्यसहिता १
७२ विद्धशालभञ्जिकानाटिका सटीक १
७३ कारण्डव्यूह (बौद्धशास्त्र) २
७४ कुवलयानन्द अलङ्कार सटीक २
७५ प्रियदर्शिका नाटिका सटीक II
७६ सारस्वत व्याकरण सटीक पूर्वार्द्धम् १
७७ वासवदत्ता सटीक १
७८ पुष्पबाणविलास काव्य सटीक II
७९ मल्लिशतकम्, पदारविन्द-शतकम्, स्तुतिशतकम्, मन्दस्मित-शतकम्, कटाक्षिशतकम् १
८० मनुसंहिता टीका सहित ३
८१ नैषधचरितम् टीका सहित ५
८२ चन्द्रालोक प्राचीन अलङ्कार १०
८३ वीरमित्रोदय (स्मृतिशास्त्र) ५
८४ भावप्रकाश (वैद्यक) ५
८५ प्रबोधचन्द्रोदय नाटक सटीक १
८६ अनर्घराघवनाटक(मुरारिकृत) २
८७ दैवतब्राह्मण सभाष्य १
८८ षड्विंशब्राह्मणम् सभाष्य १
८९ मीमांसापरिभाषा १०
९० अर्थसंग्रह(लौगाक्षिमीमांसा) १
९१ रघुवंश सटीक १
९२ मेघदूत सटीक ।
९३ कथासरित्सागर (सम्पूर्ण) ६
९४ ईश्वरानुमानचिन्तामणि II
९५ न्यायदर्शन सभाष्य सवृत्ति २II
९६ सटीक वाल्मीकिरामायण बालकाण्डम् १
९७ साहित्यदर्पण सटीक १II
९८ मदनपालनिघण्टुः (वैद्यक) II
९९ संस्कृतशिक्षामञ्जरीप्रथमभागः ।
१०० संस्कृतशिक्षामञ्जरीद्वितीयभागः १०
१०१ संस्कृतशिक्षामञ्जरीतृतीयभागः II
१०२ श्रीहर्षचरित बाणभट्टकृत १
१०३ अमरकोष II
१०४ वेदान्तसूत्र सभाष्य सटीक १०
१०५ वेदान्तपरिभाषा II
१०६ वेदान्तसारसटीक II
१०७ सटीक निदान (वैद्यक) १II
१०८ कामन्दकी नीतिसार III
१०९ मल्लिकामारुतप्रकरणसटीक २
११० अत्रि, विष्णु, हारीत, याज्ञवल्क्य, उशना, अङ्गिरा, यम, आपस्तम्ब, संवर्त्त, कात्यायन, बृहस्पति, पराशर, व्यास, शङ्ख, लिखित, दक्ष गौतम, शातातप, वशिष्ठ प्रणीत संहिता (धर्मशास्त्र) १०

Digitized by Google

११९	मत्स्यपुराण	६	
११२	चरकसंहिता(वैद्यक) सम्पूर्ण	६	
११३	रसेन्द्रचिन्तामणि तथा रस- रत्नाकर (वैद्यक)	६	
११४	भगवद्गीता शाङ्करभाष्य आनन्द- गिरिकृतटीका तथा श्रुबोधिनीसमेत	४	
११५	शब्दशक्तिप्रकाशिका	॥	
११६	मालतीमाधव नाटक सटीक	॥०	
११७	सटीक भट्टिकाव्य	२	
११८	सटीक काव्यप्रकाश	४	
११९	सभाष्य गायिड्ल्यसूत्र	॥०	
१२०	लघुकौमुदीव्याकरणम्	॥०	
१२१	हनूमन्नाटकम्(हनुमन्नाटकम्)	॥	
१२२	दशरूपकम् (अलङ्कार)	२	
१२३	(चम्पूरामायणम्) भोजचम्पू	॥	
१२४	प्रपञ्चतन्त्रम् सटीक	२॥	
१२५	मार्कण्डेयपुराणम्	३	
१२६	गोलाध्यायः	॥	
१२७	गणिताध्यायः	१	
११८	पञ्चदशी (सटीक)	१॥	
१२९	पातञ्जलदर्शनस्य भोजवृत्तिः	१	
१३०	शकुन्तलानाटक सटीक	१	
१३१	शब्दरूपादर्शः	॥०	
१३२	बृहत्संहिता वा वाराही संहिता	२	
१३३	तर्कामृत (जगदीशकृत)	।०	
१३४	द्वात्रिंशत्पुत्तलिका	१	
१३५	उत्तररामचरित सटीक	१	
१३६	शङ्करविजय	१॥०	
१३७	मृच्छकटिकाप्रकरण सटीक	१	
१३८	काव्यादर्शसटीक (अलङ्कार)	१	
१३९	अष्टाङ्गहृदय संहिता	२	
१४०	शुक्रनीति सटीक	२	
१४१	गीतगोविन्द सटीक	॥०	
१४२	अग्निपुराणम्	५	
१४३	विष्णुपुराणम् सटीक	५	
१४४	मीमांसादर्शन सभाष्य	१२	
१४५	अध्यात्मरामायणम् सटीक	२	
१४६	महानिर्वाणतन्त्रम् सटीक	४	
१४७	मीमांसादर्शनस्य अधिकरणमाला	६	
१४८	श्रुतबोधः (छन्दोग्रन्थ)	⁄	
१४९	बालरामायणनाटक सटीक	२	
१५०	लिङ्गपुराणम्	५	
१५१	चण्डकौशिकनाटक सटीक	॥०	
१५२	चैतन्यचन्द्रोदयनाटक सटीक	२	
१५३	कलापव्याकरणम्	२	
१५४	कुसुमाञ्जलि सटीक	।०	
१५५	संगीतपारिजात	१॥०	
१५६	साङ्ख्यसार	।०	
१५७	नागानन्द नाटक सटीक	॥०	
१५८	सटीककाव्यदीपिका अलङ्कार	॥	
१५९	ब्रह्मवैवर्त्तपुराण सम्पूर्ण	१०	
१६०	वैशेषिकदर्शनम् सभाष्य	२	
१६१	कल्किपुराणम्	१	
१६२	चाणक्यशतकम् सटीक	⁄	

कलिकाता संस्कृतविद्यामन्दिरे वि, ए, उपाधिधारिणः
श्रीजीवानन्दविद्यासागर-भट्टाचार्य्यस्य सकाशाद् लब्धानि ।

Digitized by Google

This book is a preservation photocopy.
It was produced on Hammermill Laser Print natural white,
a 60 # book weight acid-free archival paper
which meets the requirements of
ANSI/NISO Z39.48-1992 (permanence of paper)

Preservation photocopying and binding
by
Acme Bookbinding
Charlestown, Massachusetts

1996

Digitized by Google

Digitized by Google


Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

3 2044 036 442 4



Digitized by Google